तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥- बृहदारण्यकोपनिषद् , 6/4/17

14. तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव - शत. ब्रा., 14/7/3/1
15. घोषा गोधा विश्ववारा अपालोपनिषन्निषत् । ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः ॥
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी । लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥
श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा । रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः॥ - बृहद्देवता, 2/82-84
16. तं त्रयो वेदा अन्वसृज्यन्त । अथ ह सीता सावित्री । सोमँ राजानं चकमे तस्या उ ह त्रीन् वेदान् प्रददौ । तै. ब्रा., 2/3/10/1-3
17. साऽब्रवीदिडा मनुम् । तथा वा अहं तवाग्निमाधास्यामि । यथा प्र प्रजया पशुभिर्मिथुनैर्जनिष्यसे । प्रत्यस्मिल्लोके स्थास्यसि । अभि सुवर्गं लोकं जेष्यसीति - तै.ब्रा. 1/4/6
18. भारद्वाजस्य दुहिता रूपेणा प्रतिमा भुवि। श्रुतावती नाम विभो कुमारी ब्रह्मचारिणी ॥ महाभारत, शल्य पर्व, 48/2
19. बभूव श्रीमती राजन् शाण्डिल्यस्य महात्मनः , सुता धृतव्रता साध्वी नियता ब्रह्मचारिणि । सा तु तप्त्वा तपो घोरं दुश्चरं स्त्रीजननेन ह, गता स्वर्गं महाभागा देवब्राह्मणपूजिता ॥ महाभारत शल्य पर्व 54/7/8
20. वेदाश्चाप्युत्तमस्त्रीभिः कृष्णाद्याभिरिवाखिलाः ।
21. उभे ते ब्रह्मवादिन्यौ, ज्ञान-विज्ञान - भागवत, 4/1/64
22. सततं मूर्तिमन्तश्च वेदाश्चत्वार एव च । सन्ति यस्याश्च जिह्वग्रे सा च वेदवती स्मृता ॥ ब्रह्म वै. प्रकृति खण्ड 2/14/64
23. अष्टाध्यायी, 3/3/21
24. एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः । यो अध्यापयति वृत्त्यर्थम् उपाध्यायः स उच्यते ॥ मनु., 2/140
25. अष्टाध्यायी, 4/1/49
26. आ जुहोता दुवस्यताऽग्निं प्रयत्यध्वरे । वृणीध्वं हव्यवाहनम् ॥ ऋग्वेद, 5/28/6
27. उपोप मे परा मृश मा मे दभ्राणि मन्यथाः । सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥ ऋग्वेद, 1/126/7
28. ऋग्वेद, 1/126 पर ऋषि दयानंद कृत भाष्य
29. सर्वाणि शास्त्राणि षडङ्गवेदान् काव्यादिकान् वेत्ति परञ्च सर्वम् । तन्नास्ति नोवेत्ति यदत्र बाला तस्मादभूच्चित्र पदं जनानाम् ॥ शंकर दिग्विजय ३/१६

संदर्भ ग्रन्थ सूची –

1. तैत्तिरीय ब्राह्मण *(सायण भाष्य सहित).* पूना : आनन्द आश्रम मुद्रणालय, 1934.
2. पतञ्जलि, *महाभाष्य (दो भागो में).* (व्या. एवं सम्पा.) पं. युधिष्ठिर मीमांसक.

3. पाणिनि, *अष्टाध्यायी* (दो खण्डों में). (सम्पा.) श्रीशचन्द्र. दिल्ली: मोतीलाल बनारसीदास, 1977.
4. यशोरा, नन्दलाल. *शंकरदिग्विजय.* हरिद्वार: रणधीरप्रकाशन, 2014.
5. गोयल, सतीश. *कामसूत्र.* डॉयमंड पॉकेट बुक्स प्रा. लि., 2017.
6. शास्त्री, रामचन्द्रवर्मा. *मनुस्मृति.* विद्याविहार, 2000.
7. शर्मा, रामस्वरूप (सम्पा.).*शतपथ ब्राह्मण.* दिल्ली: प्राचीन वैज्ञानिक अनुसंधान संस्थान, 1970.
8. सातवलेकर, श्रीपाद दामोदर (सम्पा.). *अथर्ववेद.* पारडी: स्वाध्याय मंडल, 1959.
9. सातवलेकर, श्रीपाद दामोदर (सम्पा.). *ऋग्वेद.* पारडी: स्वाध्याय मंडल, 1983.

विकास शर्मा

Vikas Sharma

Assistant Professor,

Sri Venkateswara College,

University of Delhi, Delhi

Address : RZ-10/271, Street No-7, Near Madanpuri,

Hanspark, West Sagarpur, New Delhi- 110046, India

joshi.vikas7@gmail.com

***

आधुनिक मनोविज्ञान का स्रोत वेद

- डॉ. अंजू सेठ

शोध सार-

वेदज्ञान के रत्नाकर हैं जिसमें विद्याओं का समावेश सूक्ष्मरूपेण उपलब्ध होता है | अतः मनु ने 'सर्वज्ञानमयी हि सः' की उद्घोषणा के द्वारा वेद की सर्वज्ञानमयता और सर्वव्यापकता की और संकेत किया है |ज्ञान के विविध पक्षों से परिपूर्ण वैदिक युग व्यवहार क्षेत्र में भी अतुलनीय तथ्यों एवं तत्त्वों से ओतप्रोत है | मानव जीवन के सभी पक्षों पर विहंगम दृष्टि से अवलोकन करते हुए दिन प्रतिदिन के व्यवहार पक्ष पर भी इस युग में विशेष दृष्टिपात किया गया |

मनोविज्ञान मानव व्यवहार का अभिन्न अंग है क्योंकि मनुष्य के सभी क्रियाकलाप उसकी चिन्तन प्रक्रिया निर्भयता, उसकी सकारात्मकता, विवेकशील, सोत्साही प्रवृत्ति, आशावादिता, कर्त्तव्य-परायणता, भय रहित स्वकार्यकुशलता आदि प्रवृत्तियों पर बल दिया गया है | प्रस्तुत लेख में वैदिक युग में उपलब्ध सभी मनोविज्ञान संबन्धी तथ्यों को मूल उद्धरण सहित प्रस्तुत कर आधुनिक मनोविज्ञान की पद्धति से तुलनात्मक एवं विश्लेषणात्मक रूप में प्रस्तुत करने का प्रयास किया गया है तथा वेद की व्यवहार्य उपयोगिता को स्पष्ट करने का प्रयास किया गया है | आज का मानव विविध व्याधियों से ग्रस्त है, उसके निवारणार्थ वैदिक उपाय भी प्रस्तुत किये गये हैं | वैदिक युग में उपलब्ध चिन्तन, मनन की पद्धति एवं कर्त्तव्य परायणतादि गुणों को विशिष्ट रूप से प्रस्तुत करने का प्रयास किया गया है | निष्कर्ष रूप में आधुनिक मनोविज्ञान एवं वैदिक मनोविज्ञान की तुलनात्मक समीक्षा भी प्रस्तुत करने का प्रयास किया गया है |

कुञ्जी शब्द - आधुनिक मनोविज्ञान, वेद, मनोरचनावाद, व्यवहारवाद, प्रकार्यवाद।

वेद ज्ञान के अथाह भंडार हैं जिनसे ज्ञान की विविध धाराएँ उत्पन्न होकर, परिवृद्ध एवं परिपुष्ट होती हुई विभिन्न विज्ञानों के रूप में अवतरित होती हैं। सभी प्रकार के ज्ञान-विज्ञान का मूल उत्स वेद ही हैं। **"वेदोऽखिलो धर्ममूलम्"** कहते हुए मनु ने इसी सार्वभौम तथ्य को उद्घाटित किया था। समस्त ज्ञान-विज्ञानवत् मनोविज्ञान के बीज वैदिक युग में

उपलब्ध है।

मानवजीवन ईश्वर प्रदत्त बहुमूल्य देन है, जिसमें समय-समय पर परिवर्तन एवं घटनाक्रम आते रहते हैं। इन क्रमागत घटनाचक्रों से मानव के मन व मस्तिष्क पर अद्‌भुत प्रभाव पड़ता है और उसकी सम्पूर्ण व्यवस्था ही अस्थिर हो जाती है। यही मानव-मनोविज्ञान है। इसी मनोविज्ञान का विशिष्टरूपेण वर्णन, विश्लेषण एवं विवेचन वैदिकयुग में सुष्ठुरूपेण प्राप्त होता है जिससे वर्तमानयुगीन मनोवैज्ञानिक भी विशिष्टरूपेण प्रभावित हुए प्रतीत होते हैं। वैदिकयुगीन मनोवैज्ञानिक तथ्यों का वर्तमानकालिक मनोवैज्ञानिक सिद्धान्तों पर प्रभाव विवेचन ही प्रस्तुत लेख का मुख्य उद्देश्य है।

ज्ञान-विज्ञान का प्रत्यक्षतः सम्बन्ध चिन्तन-मनन से है। चिन्तन व मनन की विविध श्रृंखलाओं द्वारा सभी दर्शन एवं विज्ञान उद्‌भूत होते हैं। चिन्तन परम्परा का उत्तरोत्तर विकास ही ज्ञान की अटूट शृंखला का महत्त्वपूर्ण कारण है। वर्तमानयुग में विज्ञान की अनेकानेक शाखाएँ हैं, उन्हीं शाखाओं में जिस शाखा ने जीवन के सभी क्षेत्रों में अपनी अमिट छाप छोड़ी, जिससे जीवन का प्रत्येक पल प्रभावित हुआ, जिस शाखा से समाज का प्रत्येक वर्ग प्रभावित हुआ और उसमें रूचि रखने लगा वह शाखा 'मनोविज्ञान' है। मानव जीवन का प्रमुख अंग बने 'मनोविज्ञान' का वर्तमानयुग में अत्यन्त उत्कर्ष स्थान पर है।

वर्तमान युग में मनोविज्ञान को "साइकॉलोजी" कहा जाता है जिसका वास्तव में अर्थ है - **"आत्मा का विज्ञान"** क्योंकि लैटिन भाषा में साइको (Psycho) का अर्थ आत्मा होता है और लोगस (Logus) का अर्थ है 'शास्त्र' या 'ज्ञान'। इसका क्रमिक विकास एक आधुनिक विषय के रूप में हुआ है।

पश्चिम देशों में पश्चिमी मनोविज्ञान के इतिहास में **'अरस्तू'** को इसका जन्मदाता कहा गया है। **अरस्तू** सदृश मनोवैज्ञानिक सिद्धान्तों का प्रतिपादन पूर्वशः उपलब्ध नहीं होता।

James Drever (जेम्स ड्रेवर) के मतानुसार प्राचीन दृष्टिकोण के अनुसार मनोविज्ञान को दर्शन का एक अंग बताया गया है -

Psychology is that part of philosophy which studies the mind and mental processes together with logic and ethics. It makes up that division of knowledge generally spoken of as mental philosophy.

- Psychology - The Study of Man's Mind.

Oxford English Dictionary में Part VIII में मनोविज्ञान का अर्थ "The

science of the nature functions and phenomena of the human soul or mind" दिया गया है। अर्थात् मानव की आत्मा अथवा मन की प्रवृत्ति प्रकार्यों एवं परिदृश्य का विज्ञान मनोविज्ञान कहलाता है।

श्री जे.सी. बैनर्जी आधुनिक मनोविज्ञान को दर्शन से उत्पन्न मानते हैं - We have already pointed out that psychology is originated from philosophहृy. As problems of philosophy, psychological concepts were defined, described and developed by philosophers.[1]

"वुडवर्थ" ने मनोविज्ञान को "व्यक्ति" की क्रियाओं का विज्ञान माना है।[2]

अतः मनोविज्ञान स्पष्टतः चिन्तन एवं मनन से सम्बन्धित होने के कारण **'मन'** से ही सम्बन्धित है क्योंकि सभी संवेदनाओं एवं अनुभूतियों का केन्द्र मानव मन ही है। मन के भीतर ही विचारात्मक संघर्ष एवं क्रियाओं का आंदोलन होता है।

पाश्चात्य विचारक इस तथ्य को जब भी समझ लें परन्तु वैदिक ऋषि मन की सत्ता एवं मन की अवस्थाओं पर सूक्ष्म विश्लेषण वैदिक युग में कर चुके थे। अतः मनस, मनोभाव, मन के पहलू सकारात्मकता के महत्त्व को बहुत पहले समझ सके थे।[3] ऋग्वेद में मनस् शब्द का प्रयोग अनेक स्थलों पर हुआ है। मरुद्गण, अश्विनी तथा उनके रथ की गति को मन के समान तीव्र बताया गया है।[4] इन्द्र को 'मनस्वान्' भी कहा गया है।[5]

ऋषियों को वह दिव्य दृष्टि ईश्वर प्रदत्त थी जिससे सर्वविध ज्ञान उन्हें प्रत्यक्ष था। **"ऋषयस्तु मन्त्रद्रष्टारः न तु कर्तारः"** डॉ. सीताराम जायसवाल ने अपने ग्रंथ में स्पष्टतः उल्लेख किया है कि भारतीय मनीषियों का योगदान पश्चिम भी स्वीकार करता है।[6] **डॉ. जायसवाल ने 'ब्रेट'** के अमरग्रंथ **"History of Psychology"** का निर्देश करते हुए स्पष्ट किया है कि इस ग्रन्थ के प्रथम भाग के अट्ठारहवें (18) अध्याय में **ब्रेट** में भारतीय मनोविज्ञान का उल्लेख किया है।

आधुनिक मनोविज्ञान पर दृष्टिपात करने से यूरोपीय एवं जर्मनी शाखा के रूप में

---

1 Fundamentals of Modern Psychology, p. 27.

2 Woodsworth, Psychology the Fundamentals of Human Adjustment, p. 16.

3 यज्जाग्रतो दूरमूदेति देवं तदुसुप्तस्य तथैव दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु। अथर्ववेद, शिवसंकल्पसूक्त

4 मनोजवसा वृषणा पदच्युता। ऋग्वेद 8.22.16.7

5 यो वात इव प्रथमो मनस्वान्। ऋग्वेद 2.12.1

6 डॉ. सीताराम जायसवाल - मनोविज्ञान की ऐतिहासिक रूपरेखा, पृ. 10

इसके विकास का ज्ञान होता है। अनेक सम्प्रदायों के रूप में स्वविचारों का प्रतिफलन पाश्चात्यों ने किया। इन सम्प्रदायों में मनोरचना, अस्तित्ववाद, व्यापारवाद, सम्बन्धवाद अर्थात् संयोजनवाद, अभ्यनुबंधनवाद अर्थात् अभ्यनुकूलनवाद, व्यवहारवाद का भी उल्लेख प्राप्त होता है, उनमें भी **गेस्टालट, फ्रायड, एडलर** एवं **युंग** के सम्प्रदाय प्रमुख माने जाते हैं।

पाश्चात्य मनोविज्ञान की सभी शाखाएँ यथा - **मनोरचनावाद, व्यवहारवाद, प्रकार्यवाद, व्यक्तित्त्वादादि** सभी वैदिक युग से प्रभावित प्रतीत होती है। मनोरचनावादी सम्प्रदाय में मन की तीन मानसिक अवस्थाओं का चित्रण प्राप्त होता है - संवेदन, भावना, प्रतिमा। मन और चेतना का भी विश्लेषणात्मक अध्ययन यहाँ इस सम्प्रदाय का योगदान है।

पाश्चात्य मनोविज्ञान के मनोरचनावाद की सभी धारणाएँ वैदिक युग में उत्स रूप में प्राप्त होती हैं। ऋक् संहिता में अनेकशः मन-विवेचन प्राप्त होता है।[7]

ऋग्वेद में स्पष्ट किया गया है कि वृत्तियाँ मन के पीछे दौड़ती हैं। वैदिक ऋषियों ने मन का सम्बन्ध शरीर एवं आत्मा दोनों से स्वीकार किया है,[8] क्योंकि आत्मा ही उसे नियन्त्रित करती है।[9] मन का स्थान दशेन्द्रियों से परे है श्रेष्ठ है। अपितु दश इन्द्रियों से पृथक् 'एक' कहा गया है।[10]

अथर्ववेद में यह शंका भी व्यक्त की गई है कि मन का आधार क्या है?[11] मनस् को वेद में 'देव' कहा गया है जो अन्तःकरण एवं अन्तरिन्द्रिय को द्योतित करता है वह संकल्पशक्तियुक्त है।[12]

ऋग्वेद में इन्द्र को मनस्वान् भी कहा गया है।[13]

1. मन के पक्ष - वैदिक वाङ्मय के मतानुसार शरीर, मन और आत्मा एक ही है। शरीर से लेकर मन की सूक्ष्म स्थितियों तक इसके पांच स्तर हैं -

(1) अन्नमय कोश

---

7 ऋग्वेदः - 10/71/87, 10/191/4

8 मनः पश्चादनुगच्छति रागयः। ऋ. 6.75-6

9 इमानि यानि पंचेन्द्रियाणि मनः षष्ठानि में हृदि ब्रह्मणा संशितानि। अथर्ववेद 19.9.5

10 न वि जानानि यदिवेदामस्मि निण्यः संनद्दो मनसा चरानि। अथर्ववेद 9/10/15

11 केनास्मिन् निहितं मनः। अथर्ववेद 10/2/19

12 यज्जाग्रतो दूरमूदेति देवं तदुसुप्तस्य तथैव दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु। अथर्ववेद, शिवसंल्पसूक्त

13 मनो जवसा वृषणा मदच्युत। ऋग्वेद 8.22.16

(2) प्राणमय कोश

(3) विज्ञानमयकोश

(4) मनोमय कोश

(5) आनन्दमय कोश।

उपनिषदों में इसका पर्याप्त विवेचन किया गया है। स्थूल से आरम्भ कर सूक्ष्म तक जाने की भारतीय परम्परा व प्रक्रिया का निर्वाह ऋषियों की सूक्ष्मदृष्टि का ही परिचायक था।[14]

मन को ही मनुष्यों के बन्धन व मोक्ष का कारण कहा गया है।[15]

उपनिषदों में मन के लिए पांच शब्दों का प्रयोग किया गया - मनस्, प्रज्ञा, ब्रह्म, विज्ञान और चित्त। अन्यत्र इन्द्रिय को विषय से, विषयों को मन से, मन को बुद्धि से, आत्मा को प्रबल माना गया है।[16]

उपनिषद् प्रदत्त मन विवेचन अत्यन्त सूक्ष्म एवं विशद है। बृहदारण्यकोपनिषद् में स्पष्ट किया गया है कि काम, संकल्प, श्रद्धा, अश्रद्धा, धैर्य, अधैर्य, बुद्धि, भय ये सब मन ही है। अर्थात् ये समस्त मनोभाव उपनिषद् काल में सूक्ष्मरीति से वर्णित किए गए।[17]

प्रसिद्ध पाश्चात्य मनोवैज्ञानिक **फ्रायड** द्वारा मन को विश्लेषित करते हुए अपने सिद्धान्त में मन के तीन स्तरों **चेतन, अवचेतन** एवं **अचेतन** को स्वीकार किया गया है। उपनिषदों में उसका वर्णन **जाग्रत, स्वप्न, सुषुप्ति** एवं **तुरीय** के माध्यम से किया गया है। माण्डूक्योपिनषद् में मन की चार अवस्थाएँ परिगणित की गई हैं - (1) विश्वजागृतावस्था

---

14 (i) मनोभावानन्दमय एव तिष्ठति तदानीमेवास्य स्वरूपमनुभूयते। एवं पृथान्नरसमयादे आत्मानस्ते एवानन्दमय सर्वस्वात् सूक्ष्मो ज्ञेयः। ऐतरेय आरण्यक 2.3.30

(ii) स एषः पुरुषः पचतिवस्तस्य यदुष्णं.... सः प्राणः सः वायुः। तैत्तिरीयोपनिषद् 2.25

15 मन एव मनुष्याणां कारणं बन्धमोक्षयोः। मैत्रायण्युपनिषद् 6/34

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः । स परेऽक्षरे आत्मनि सम्प्रतिष्ठते ॥ प्रश्नोपनिषद्

16 इंद्रियेभ्यः परा ह्यर्थाः अर्थभ्यश्च परं मनः ।। *मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः* ॥ कठोपनिषद् 1.3.10

17 (क) मनो ब्रह्मेति। बृहदारण्यकोपनिषद् 4.1.6

(ख) मनो ब्रह्मेति। तैत्तिरीयोपनिषद् 3.4

(2) तेजस् (सुषुप्ति अवस्था) (3) प्रज्ञा (गहननिद्रा) (4) तुरीयावस्था।[18]

आधुनिक मनोविज्ञान में जो अवधारणा **complex** की है उससे भी मिलता-जुलता वर्णन कठोनिषद् में हृदयग्रंथि और मुण्डकोपनिषद् में 'गुहाग्रंथि' शब्दों के माध्यम से प्राप्त होता है -

"*यदा सर्वे प्रभिद्यन्ते* हृदयस्येह ग्रन्थयः ।

अथ मर्त्योऽमृती भवत्येतावद्ध्यनुशासनम् ॥"[19]

तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो *विमुक्तो अमृतो भवति*।[20]

स्वप्न एवं सुषुप्ति (मन की अवस्था)

स्वप्न एक मानसिक प्रक्रिया है जिसका विश्लेषण प्राचीन एवं आधुनिक सभी मनोवैज्ञानिकों ने किया है -

ताः सर्वाः स्वापायामसि[21]

यो न जीवोसि न मृतो देवानाममृतगमोऽसि स्वप्न[22]

जीवित और मृत से परे बताते हुए स्वप्न को जाग्रत एवं निद्रावस्था से अलग विश्लेषित किया गया है।

फ्रायड के मतानुसार स्वप्न नींद के समय का मस्तिष्क का जीवन है।[23]

स्वप्न सम्बन्धी सूक्ष्म विश्लेषण **उपनिषदों** में उपलब्ध होता है। मन स्वप्न में अपने भोग की सामग्री स्वयं निर्मित कर लेता है।[24] प्रश्नोपनिषद् में निद्रा के स्वरूप का उत्तम विवेचन उपलब्ध है। स्वप्न की सुखद स्थिति में मानव प्रसन्न होता है और दुखद स्थिति में मनुष्य स्वप्न में रोने लगता है।[25]

पाश्चात्य मनोवैज्ञानिकों में **अरस्तू** ने स्वप्न को मानसिक क्रिया कहा। **फ्रायड** ने स्वप्न को जाग्रत अवस्था के अनुभवों की प्रतिच्छाया बताया। **फ्रायड** ने स्वप्न की पांच कार्य

---

[18] तुरीयदशापन्नेऽहं ब्रह्मास्मि। माण्डूक्योपनिषद् 1.3.7

[19] कठोपनिषद् 2.6.15

[20] मुण्डकोपनिषद् 3.2.9

[21] ऋग्वेद 7/55/8

[22] अथर्ववेद 6/46/1

[23] मनोविश्लेषण, सिंगमंड फ्रायड, पृ. 77-81

[24] प्रश्नोपनिषद् 4.1

[25] प्रश्नोपनिषद् 4.3.13

पद्धतियों का भी वर्णन किया - (1) संक्षेपण (2) विस्थापन (3) नाट्यीकरण (4) प्रतीकीकरण (5) परवर्ती विस्तार

एडलर ने अपने व्यक्तित्व मनोविज्ञान सिद्धान्त में हीनताग्रंथि एवं श्रेष्ठताग्रंथि को महत्त्वपूर्ण स्वीकार किया है। उनके मतानुसार प्रत्येक व्यक्ति स्वयं में पूर्ण नहीं होता। उसमें कुछ न कुछ कमी अवश्य होती है। इसी आधार पर उन्होंने आंगिक और मानसिक दो कमियों का उल्लेख कर उसका सूक्ष्म विश्लेषण किया है।

यूरोपीय मनोविज्ञान की दृष्टि से विचार करें तो स्पष्ट होता है कि यूरोपीय विचारकों में **प्लेटो, अरस्तू, गेलेन, संत, आगस्टाईन, फ्रांसिस बेकेन, ऐने, देकार्त** सदृश विद्वानों ने मनोविज्ञान के विकास में योगदान दिया है।

प्लेटो ने भी मानव मन और शरीर के सम्बन्ध में अपने विचार व्यक्त किए हैं। **अरस्तू** ने भी मन और शरीर के अटूट सम्बन्ध को स्वीकार कर मन की महत्ता को स्वीकारा है। **ह्यूम** एक जाने माने मनोवैज्ञानिक थे उन्होंने मानसिक कार्यों का आधार प्रत्यक्ष ज्ञान को स्वीकार किया है।

इस प्रकार सभी क्रियाकलापों का आधार मन है, ऐसा वेद स्वीकार करता है। मन की विलक्षणता को स्वीकार करते हुए प्रतिपादित किया गया है कि प्राणी के शरीर में रहता हुआ भी मन के द्वारा ही सर्वजगत् का व्यवहार चलता है।[26]

विषयः संनद्धो मनसा चरामि[27]

पाश्चात्य मनोविज्ञान में **प्रकार्यवाद** का मूल यही वैदिक मन्त्र प्रतीत होते हैं। अतः स्पष्टतः कहा जा सकता है कि पाश्चात्यों का मनोरचनावाद वैदिक युग से पूर्णतः प्रभावित था। कहीं-कहीं तो पूर्व सिद्धान्त ही अनुकरण किए गए हैं। जो भावना मन के विषय में वैदिक ऋषियों ने प्रदान की उसी के आधार पर **पाश्चात्य विद्वानों** ने अपने सुदृढ़ सिद्धान्तों का निर्माण किया।

पाश्चात्य मनोविज्ञान में भी **वैदिक संहिताओं** से प्रेरणा प्राप्त कर मन या चित्त के तीन स्तर व्यक्त किए गए हैं -

1. **चेतन** (consciocus)
2. **अवचेतन** (sub consciocus)
3. **अचेतन** (unconsciocus)

चेतन अर्थात् चित्त का वह रूप जो जागृत अवस्था में मानव के हृदय की परिधि से जुड़ जाता है। मानसिक या शरीर सम्बन्धी क्रियाओं के सम्पादन में जो स्वाभाविक आत्मज्ञान

---

26 ऋग्वेद 10/10/13

27 अथर्ववेद 9.10.15

प्राप्त होता है। वह चेतन मन का स्वरूप है। निष्क्रिय रहने पर भी मन चेतनशील रहता है। ऐसा ही विवेचन वैदिक ऋषि करते हैं -

"***यज्जाग्रतो दूरमुदैति* दैवं तदु सुप्तस्य तथैवैति ।**
दूरंगं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ।।"[28]

अवचेतन - चेतन और अचेतन की बीच की स्थिति में अवचेतन मन की अवधारणा विद्यमान रहती है। चेतन ज्ञान जहाँ स्पष्ट होता है अवचेतन उतना ही अस्पष्ट होता है। कुछ मानवीय अनुभव जो चेतनमन द्वारा संभव नहीं हो पाते वह अवचेतन की श्रेणी में आ जाते हैं। इसका भी विवेचन वैदिक वाङ्मय में उपलब्ध होता है -

"अत्रैष देवः स्वप्ने महिमानमनुभाति...
दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं
चाननुभूतं च सच्चासच्च सर्वं पश्यति।"[29]

वैदिक ग्रन्थों में चित्त और हृदय का मन के साथ ही प्रयोग देखने को मिलता है। यथा - **"चेतो हृदयम्"**।[30] मन और चित्त की समानता और सामंजस्य की बात की गई है।

अचेतन मन - मन की यह तृतीय अवस्था मानी जाती है क्योंकि इसका ज्ञान व्यक्ति को नहीं रहता। अचेतन मन एक ऐसी गुफा के समान होता है जिसमें विस्मृत अनुभव स्मृतियाँ अव्यवस्थित ढंग से विद्यमान रहती हैं।

पाश्चात्य मनोवैज्ञानिकों ने भी मन की तीनों अवस्थाओं का विवेचन किया है। जिसमें **फ्रायड** ने 'मन' की तुलना बर्फ की एक बड़ी चट्टान से की है जिसका केवल 1/10 भाग पानी के ऊपर दिखाई देता है 9/10 भाग पानी के भीतर विद्यमान रहता है।

युंग ने भी मन की उपमा सागर के साथ की है जिससे ज्ञात मन द्वीप के समान है।

फ्रायड के अनुसार कई मानसिक रोगों का कारण अचेतन मन होता है जिसके उपाचार हेतु स्वप्न का विश्लेषण किया जाता है।

फ्रायड के मत में चेतन मन वही है जिसका वर्णन दार्शनिकों ने किया हैं चेतन मन का संबंध वर्तमान से है। फ्रायड के मतानुसार मन को स्मृति के रूप में स्वीकार किया जा सकता है।

चेतन तत्त्व के विषय में स्पष्ट किया जाता है कि चेतना संचित कर्म करने की एक

---

28 अथर्ववेद, शिवसंकल्पसूक्त

29 प्रश्नोपनिषद् 4.5

30 चेतो हृदयम्। अथर्ववेद 4.7.11

योग्यता है। अर्थात् जिसके द्वारा सब कुछ जाना जाता है उसे किसके द्वारा जाना जाता है।[31] इस विषय में आधुनिक विचारक **डेकार्टे** के विचार भी इसी प्रकार के हैं।

मनोवृत्तियाँ

विशेषतः मनोरचनावादी सम्प्रदायों के अनुसार मन की संरचना और उसके प्रभाव को जानना ही मनोविज्ञान है।

मनोभावों का सूक्ष्म विश्लेषण वैदिक मंत्रों में प्राप्त होता है। क्योंकि भावनाओं का सम्बन्ध मन से है। 'विजयी' व्यक्ति का मन अनेक प्रकार का हो जाता है। प्रिय, अप्रिय, हर्ष आलस्यादि मनोभावों का विस्तृत विवेचन वैदिक युग में प्राप्त होता है।[32]

प्रत्येक प्राणी मननशीलन होने के कारण मनोवृत्तियों से युक्त होता है। वैदिक संहिताओं में मानव की मनोवृत्तियों का सूक्ष्म विवेचन एवं विश्लेषण ऋषियों की उस पूर्णदृष्टि का परिचायक है जो मनोवैज्ञानिक दृष्टिकोण से व्यक्ति के जीवन के प्रत्येक पहलू का सर्वविध निरीक्षण में संलग्न थे। क्रोध, भय, घृणा, प्रेम, मोह लोभ, काम, दया, भ्रातृप्रेम, आनन्द, दुखादि सभी मनोभाव वैदिक संहिताओं में यत्र-तत्र वर्णित हैं।

अतएव भारतीय मनोवैज्ञानिक मन के स्वरूप को जानने के उपाय ही नहीं वर्णित करते अपितु उसकी शक्तियों को उभारने का उपाय भी बताते हैं।[33] मन के मनोभावों का सूक्ष्म विवेचन इस प्रकार उपलब्ध प्राप्त होता है -

"प्राणान्प्रपीऽयेह संयुक्तचेष्टः क्षीणे क्षीणे नासिक्योच्छवसीत
दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः।"[34]

इसके अतिरिक्त आनन्द मोदादि का वर्णन वैदिकयुग में उपलब्ध होता है -

---

31 येनेदं सर्वं विजानाति न चैनं विजानीयात्। बृहदारण्यकोपनिषद् 4/5/15

32 प्रियाप्रियाणि बहुला आनन्दानुग्रो नन्दांश्च कस्माद् वहति पुरुषः। अथर्ववेद 10.2.9
आनन्दा मोदाः प्रमुदोऽभीमोदामुदाश्च ये हासो नरिष्टा नृत्तानि शरीरमनु प्राविशन्। अथर्ववेद 11/8/24

33 (i) श्वेताश्वरोपनिषद् 2/9
(ii) कामारत्तमगे संभवतीह मनसो। ऋग्वेद 10/129/4

34 Hindu psychology gives definite methods not only for knowing the nature of the mind but also for developing its powers. Swami Abhilananda. Hindu psychology it meaning for the west, p. 14.

"आनन्दा मोदाः प्रमुदोऽभीमोद्मुदश्च ये।

हासो नरिष्ठा नृत्तानि शरीरमनुप्राविशद्।"[35]

वैदिक युग की भांति यूरोपीय दार्शनिक **प्लेटो** ने मनोभावों या संवेगों के विषय में स्पष्ट रूप से व्यक्त किया है कि भावनाओं और संवेगों का संबंध आत्मा या मन से है न कि शरीर से। जबकि **अरस्तू** के अनुसार संवेगों का सम्बन्ध सुखमय एवं दुखमय अनुभवों से है।

स्टोइक के मतानुसार संवेगों के वश में जो व्यक्ति विद्यमान रहता है। उसका चरित्र दुर्बल हो जाता है और वह ईश्वर को प्राप्त करने में असफल रहता है। अतः संवेगरहित होकर ही ईश्वरप्राप्ति हेतु प्रयत्न करना चाहिए। अतः स्टोइक के मनोविज्ञान में इच्छाशक्ति संवेगों पर नियन्त्रण और जीवन में विवेकशक्ति की प्रमुख आवश्यकता को महत्त्वपूर्ण माना गया है।

चेतन तत्त्व और आत्मा - वैदिक युग में आत्म तत्त्व का अत्यन्त सूक्ष्म रूप में वर्णन प्राप्त होता है, जो पाश्चात्य मनोवैज्ञानिकों हेतु प्रेरणास्रोत बना है।

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः"[36]

"अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः"[37]

यूनानी दार्शनिक हिप्पोक्रेटीज के मस्तिष्क से सम्बन्धी विचार आधुनिक मनोविज्ञान के निकट है। उनके ग्रंथ **'On the Nature of Man'** में मनुष्य की रचना एवं मस्तिष्क सम्बन्धी विचार प्रस्तुत किए हैं।

अरस्तू ने भी चेतनतत्त्व का विवेचन किया है **'टॉमस एविवमस'** का नाम भी इसी शृंखला में उल्लेखनीय है। उनके अनुसार जीव का आधार आत्मा है। आत्मा या चेतन-तत्त्व ही समस्त कार्यों का मूल है। इसी प्रकार **देकार्त** ने इसी परम्परा का पालन करते हुए बताया है कि "मन और शरीर दोनों एक-दूसरे से भिन्न है। दोनों गुणों में पूर्णतः विषमता है।"

स्प्रिनोज्ञा ने शरीर और मन को एक ही वस्तु के दो पक्ष घोषित किया तथा उन्हें दोनों की ईश्वरीय सत्ता से युक्त माना है। अतः मन, मनोरचनावाद, मन की प्रवृत्तियाँ एवं संवेगों की दृष्टि से वैदिक ऋषियों ने पाश्चात्य मनोवैज्ञानिकों को प्रभावित कर अनेक सिद्धान्तों के निर्माण में प्रेरित किया।

व्यवहारवाद - पाश्चात्य मनोविज्ञान की मुख्य शाखा है, उसका भी विवेचन वैदिक युग में उपलब्ध है।

---

35 (i) अथर्ववेद 11/8/25

(ii) अध्यक्षो वाणी मनः कामः। अथर्ववेद 1/2/20

36 बृहदारण्यकोपनिषद् 4.5.6

37 मुण्डकोपनिषद् 2.2.5

मानव के समाज में उसके व्यवहार, परस्पर मेलजोल और लगाव इत्यादि के आधार पर व्यक्तित्व तीन प्रकार है - (1) बहिर्मुखी (2) अन्तर्मुखी (3) उभयमुखी। वैदिक संहिताएँ और ब्राह्मणग्रंथ कर्म एवं प्रवृत्तिप्रधान बहिर्मुखी व्यक्तित्व का ही प्रतिनिधित्व करते हैं। यथा -

अग्निना रयिमश्नवत् पोषमेव दिवेदिवे।[38]

अथास्मभ्यं सहवीरं रयिंदा।[39]

ताः न उर्जे दधातन। महे रणाय चक्षसे।[40]

अतः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः।[41]

इन सभी वर्णनों के अतिरिक्त - **ब्रह्मेतु माम्। मधुमेतु माम् ब्रह्मेव मधुमेतु माम्।**[42] अर्थात् ब्रह्मरूप मधु की कामना की गई है। श्रद्धा, विश्वास, भक्ति भी व्यक्तित्व के तत्त्वों में गिने गए हैं - **श्रद्धया देवो देवत्वमश्नुते।**[43]

व्यक्तित्व निर्धारक तत्त्वों का भी वैदिक युग में विवेचन प्राप्त होता है। यथा वंश परम्परा या अनुक्रम का वर्णन दर्शनीय है -

अहमस्मि वीरिणी इन्द्रपत्नी
ममपुत्रः शत्रुहणोऽथो मे दुहिता विराट् अताहमस्मि...

व्यवहारवाद के भी उत्स वैदिक युग में उपलब्ध थे। देवताओं के व्यवहार एवं प्रकृति विवेचन द्वारा निर्धारक तत्त्वों में व्यवहार का प्रमुख स्थान था।

प्राकृतिक परिवेश, सामाजिक परिवेश, माता-पिता का व्यवहार, मनोवैज्ञानिक परिवेशादि कारणों का व्यक्तित्व के निर्माण में महत्त्वपूर्ण स्थान है - **देवी जन्वियजीजनत्।**[44]

अतः व्यवहार सम्बन्धी विवेचन भी वैदिक युग में उपलब्ध होता है, जो व्यवहार के समर्थक विचारकों को प्रभावित करता रहा है। विविध देवताओं के व्यवहार विवेचन से वैदिक युग में व्यवहारवाद का सूत्रपात हो चुका था।

व्यक्तित्व

---

38 ऋग्वेद 1.1.3

39 अथर्ववेद 3/12/5

40 ऋग्वेद 10.9.1

41 मुण्डकोपनिषद् 3/1/8

42 तैत्तिरीयारण्यक 10/48

43 ऋग्वेद 10/56/9

44 ऋग्वेद 10/134/6

व्यक्तित्व व्यक्ति विशेष का गुणधर्म एवं पहचान है। पाश्चात्य देशों में व्यक्तित्व का अध्ययन 19वीं शताब्दी में मानव व्यवहार की एक शाखा के रूप में हुआ। व्यक्ति का नाम, आचार, व्यवहार, वेशभूषा, गुण, विद्या, बुद्धि, कर्मकौशल, दक्षता, अभिरूचि, आत्मविश्वास और स्वाभिमान व्यक्तित्व की श्रेणी में आते हैं।

वैदिक साहित्य में व्यक्तित्व सम्बन्धी तथ्य सर्वत्र उपलब्ध होते हैं क्योंकि व्यक्तित्व ही मानव का आईना है। उसे ही निजी विशेषताएँ व्यक्त होती है। पारिवारिक परिवेश को वैदिक युग में प्रमुख स्थान दिया गया है -

"य: सकृत्पापकं कुर्वीत्, कुर्यादिनत्ततोऽपरम्"[45]

"सहृदयं सामंस्यमविद्वेषं कृणोमि वः

अन्यो अन्यभिहर्यत वत्सं जातमिवाहन्या"[46]

इसके अतिरिक्त व्यक्तित्व के प्रकार एवं व्यक्तित्व के विकास हेतु विविध उपाय भी वैदिक युग में महत्त्वपूर्ण था।

अभिप्राय यह है कि वैदिक युग में मानव की सत्ता एवं उसका व्यक्तित्व एक अहं विषय था तथा उसके एवं उसके परिवार के विकास एवं परस्पर सम्बन्धों के विषय में भी पर्याप्त चर्चा होती रही थी। एक दूसरे के प्रति स्नेह, प्रेम, वात्सल्य सब कुछ यहाँ वर्णित है -

नित्यं च सुनू पित्रोः उपस्थे नित्यं च सुनू तनयं दधानाः।[47]

अतः वैदिक युग मनुष्य को अच्छी राह निर्देशित कर अच्छा बनाने वाला शास्त्र है। पाश्चात्य विचारक एवं मनोवैज्ञानिक भी व्यक्तित्व को मनोविज्ञान का मुख्य अंग मानते हुए उसका विवेचन करते हैं। सम्प्रदाय में सम्पूर्ण व्यक्ति के अध्ययन पर बल देते हैं। **गेस्टाल्डवादी सम्प्रदाय** के समर्थक विचारक भी सम्पूर्ण व्यक्ति का अध्ययन करते हैं। ये अपने अध्ययन में अन्तर्दृष्टि का विशिष्ट योगदान मानते हैं।

व्यक्तित्ववादी विचारकों ने **'एडलर'** का नाम विशिष्ट महत्त्वपूर्ण है। इसमें उनके द्वारा व्यक्ति की रचनात्मक शक्ति हीनताग्रंथि, श्रेष्ठताग्रंथि एवं स्मृति इत्यादि पर विशिष्ट बल दिया। उनके अनुसार प्रत्येक व्यक्ति की एक विशिष्ट जीवनशैली होती है और उसी से उसके व्यक्तित्व का निर्माण होता है। हीनता व श्रेष्ठता ग्रन्थियों के विवेचन भी उनके द्वारा की गई है। व्यक्ति अपने आपको श्रेष्ठ व न्यून समझ लेता है। **एडलर** भी स्मृतितत्त्व की प्रधानता को चेतन व अचेतन दो प्रकार की मानते हैं।

इसी प्रकार **कार्ल जी. युंग** भी वैयक्तिक एवं सामूहिक मनोविज्ञान का सिद्धान्त का

---

45 ऐतरेय ब्राह्मण 7/3/5

46 अथर्ववेद 3.30.1

47 ऋग्वेद 10/39/14

समर्थन करते हैं। **युंग** ने अंतर्मुखी और बहिर्मुखी व्यक्तित्व का विवेचन किया है। वैदिक संहिताओं का भांति उभयमुखी व्यक्तित्व का भी विवेचन किया है।

मार्टन प्रिन्स की व्यक्तित्व की परिभाषा-व्यक्तित्व व्यक्ति के समस्त जैविक जन्मजात विन्यासों एवं प्रवृत्तियों का योग है। व्यक्तित्व के आंतरिक एवं बाह्यपक्षों पर यहाँ बल दिया जाता है।

वर्डस्वर्थ - इनके अनुसार मनुष्य के व्यवहार के समस्त गुण महत्त्वपूर्ण हैं। उनके मत में व्यक्तित्व विभिन्न क्रियाओं का समूहमात्र नहीं है बल्कि मानव व्यवहार के गुणों का समुच्चय है।

आलपोर्ट नामक विचारक के मतानुसार व्यक्तित्व, व्यक्ति के भीतर उन मनोशारीरिक तंत्रों का गतिशील या गत्यात्मक संगठन है जो वातावरण में उसके अपूर्ण समायोजन को निर्धारित करते हैं। अर्थात् व्यक्तित्व मानव शरीर के मन एवं शरीर के आंतरिक गतिशील तंत्रों का वह संगठन है जिससे वह विशिष्ट व्यवहार को निर्धारित करता है। व्यक्तित्व निर्माण के निर्धारक तत्त्व एवं उनका योगदान पाश्चात्य मनोवैज्ञानिकों ने यथा प्रदान किया उसके उत्स वैदिक युग में उपलब्ध होते हैं।

वैदिक युग में पाश्चात्य मनोवैज्ञानिकों से आगे बढ़कर विभिन्न मनोचिकित्साओं एवं दिशाओं का भी निर्देश किया गया जिसका पाश्चात्य मनोवैज्ञानिकों में अभाव है। वैदिक युग के मन्त्रों में वह उत्साहदायिकी शक्ति एवं तत्त्व विद्यमान हैं जो व्यक्ति को मनोरोगों से बाहर निकालने में अत्यन्त समर्थ है -

अथर्ववेदो वेदः सोऽहमिति भैषजं निगदेत्।
वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके। [48]
***वि मातरं च पुत्रं च वि कुमारं* जरायुणाव जरायु पद्यताम् ॥**[49]
"अमुक्था यक्ष्मात्"[50]

संभवतः कोई शाखा या कोई पक्ष ऐसा अछूता रहा हो जो पाश्चात्य मनोवैज्ञानिकों हेतु आधारभित्ति का कार्य न कर पाया हो।

वस्तुतः सम्पूर्ण आधुनिक मनोविज्ञान को सुदृढ़ व सुस्थिर धरातल देने का श्रेय वैदिक युग को जाता है। कान्तदर्शी ऋषि अद्भुत मेधायुक्त होने के साथ-साथ अत्यन्त दूरदर्शी भी थे। उन्हें यह आभास हो गया था कि सभ्यता व संस्कृति के विकास के साथ अनेक मनोवैज्ञानिक समस्याएँ मुंह खोले हर युग के मानव को ग्रसित करने हेतु तैयार बैठी है। अतः परिणामस्वरूप उन ऋषियों ने सिसकती मानवता को अपनी आशीर्वादात्मक छाया से सभी

---

48 शांखायन श्रौतसूत्र 16/2/1

49 अथर्ववेद 1/11/5

50 अथर्ववेद 2/10/6

मनोवैज्ञानिक समस्याओं से निकालने हेतु सम्पूर्ण मार्ग निर्देशित का कार्यभार संभाला जिसे पश्चादवर्ती मनोवैज्ञानिकों ने सुनिर्मित सिद्धान्तों के रूप में प्रस्तुत कर मनोविज्ञान के क्षेत्र में क्रांति लाने का कार्य किया।

वैदिक ऋषि पाश्चात्य मनोवैज्ञानिकों से भी बहुत आगे बढ़कर सभी आधियों के मूल तत्त्वों के निवारण के उपाय भी निर्दिष्ट करते हैं बृहदारण्यकोपनिषद् में कहा गया -

कामक्रोधलोभमोहमदमात्सर्यमित्यरिषड्वर्गः।

"न वित्तेनः तर्पणीयो मनुष्यः" कहकर संतोष भावना एवं अरिषड्वर्ग के विजय की प्रेरणा देते हुए औपनिषदिक ऋषि श्रेय और प्रेय का अन्तर भी सूक्ष्म दृष्टि से समझा जाते हैं -

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
तयोःश्रेयः आददानस्य साधु भवति।।

किसी भी सिद्धान्त में श्रद्धा रखते हुए धन का स्वामी व्यक्ति स्वयमेव बन जाता है उसके लिए आधि व्याधि पालने की आवश्यकता नहीं रहती -

"श्रद्धया विन्दते वसुः।"[51]

हमेशा लक्ष्य उच्च रखते हुए रहने की शिक्षा देता हुआ वैदिक ऋषि आत्मविश्वास का संदेश देता है ताकि सभी मनोवैज्ञानिक आंधियाँ एवं समस्याएँ दूर हो सकें –

"उद्यानं ते पुरुष नावयानम्"[52]

"आत्मानं विद्धि" का संदेश मनोवैज्ञानिक समस्याओं से जूझने एवं उन्हें पराजित करने की अद्भुत शक्ति रखता है। तभी कहा गया -

"एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः।"[53]

अतएव उत्तिष्ठ जाग्रत प्राप्य वरान् निबोधत के संदेश का पालन करते हुए हमें अपने वैदिक ज्ञान और उसमें निहित मनोवैज्ञानिक तत्त्वों का सूक्ष्म निरीक्षण एवं पर्यवेक्षण करना चाहिए जिससे प्रेरणा प्राप्त कर आधुनिक मनोविज्ञान की विविध शाखाएँ प्रस्तुत हुईं और वर्तमान समय में पल्लवित, पुष्पित हो रही है। परन्तु मुख्य धारा का सूत्रपात वैदिक युग में ही हो गया था। अतएव वैदिक धरोहर को संभालना एवं संजोना हमारा मुख्य व प्रथम ध्येय होना चाहिए।

संदर्भ ग्रंथ सूची -

---

51 ऋग्वेद

52 अथर्ववेद

53 ऋग्वेद

1. ऋग्वेदसंहिता (सम्पा.) सातवलेकर, स्वाध्याय मंडल, पारडी-1933.
2. यजुर्वेदसंहिताः सुबोधभाष्य दामोदर सातवलेकर, स्वाध्याय मंडल, पारडी, सूरत।
3. अथर्ववेदसंहिताः (सुबोधभाष्य) दामोदर सातवलेकर, स्वाध्याय मंडल, पारडी, सूरत।
4. ऐतरेय आरण्यकः (सम्पा.) विनायक, गणेश आप्टे, आनन्दाश्रम मुद्रणालय, पूना-1945.
5. तैत्तिरीयोपनिषद्ः (शांकरभाष्य), गीताप्रेस, गोरखपुर।
6. प्रश्नोपनिषद्ः वाणीविलास प्रेस संस्करण।
7. कठोपनिषद् (शांकरभाष्य), गीताप्रेस, गोरखपुर।
8. मुण्डकोपनिषद्, वाणी विलास प्रेस संस्करण।
9. बृहदारण्यकोपनिषद् (शांकरभाष्य), गीताप्रेस, गोरखपुर।
10. मांडूक्योपनिषद्, गीताप्रेस, गोरखपुर।
11. श्वेताश्वतरोपनिषद् - आनन्दाश्रम, संस्कृत ग्रंथावली, पूना।
12. ऐतरेय ब्राह्मण - (सायणभाष्य) डॉ. हाग द्वारा सम्पादित, मुम्बई।
13. मनोविश्लेषणः सिगमंड फ्रायड।
14. मनोविज्ञान की ऐतिहासिक रूपरेखा - डा. सीताराम जायसवाल।
15. Psychology the Fundamentals of Human Adjustments - Wordsworth.
16. नवीन व्यवहारिक मनोविज्ञानः - रामपाल सिंह, विनोद पुस्तक भंडार, आगरा।
17. प्रयोगात्मक मनोविज्ञान - डा. शशि तिवारी, नाग पब्लिर्शस, दिल्ली-1981.
18. भारतीय मनोविज्ञान एवं शिक्षा - डा. सीताराम जायसवाल, आर्य बुक डिपो, दिल्ली।
19. भारतीय मनोविज्ञानः - डा. जगदीश विद्यालंकार।
20. Introduction to Psychology: 6th Edition by Ernest R. Hilgard and Richard C. Atkinson, Oxford.
21. Introduction to Psychology: James W. Kalat, North Caroline State University.
22. The Psychology Influence of Persusation - Robert B. Cialdini, Colliness Business.

डॉ. अंजू सेठ
एसोसिएट प्रोफेसर
संस्कृत विभाग, सत्यवती महाविद्यालय
दिल्ली विश्वविद्यालय
dr.anjuseth@gmail.com

***

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

आधुनिकसंस्कृतसाहित्ये नवीनकाव्यविधा 'सॉनेट्'

- ओमनदीपशर्मा

शोधसारः -

परिवर्तमाने संसारेऽस्मिन् साहित्येऽपि परिवर्तनानि आयान्ति। समाजस्य आधुनिकतां दृष्ट्वा साहित्येऽपि आधुनिकता परिदृश्यते। समाजे प्रयोगाः भवन्ति अतः साहित्ये अपि बहुविद्प्रयोगाः कविभिः कुर्वते। संस्कृतसाहित्यं सामान्यतया स्वप्राचीनतायाः कृते एव प्रसिद्धमस्ति परन्तु संस्कृतस्य एतदेव वैशिष्ट्यम् वर्तते यत् संस्कृतभाषा यावत् प्राचीना तावत् अर्वाचीनापि अस्ति। अस्माकं संस्कृतसाहित्ये यदा कदा नूतनप्रवृत्तयः अपि द्रष्टुं शक्नुमः। आधुनिकसंस्कृतसाहित्ये हाईकु-छिञ्ञो-तांका-गज़ल-कव्वाली-टप्पे-इत्यादयः अनेकाः नवीनकाव्यविधाः सन्ति यामधिकृत्य संस्कृतसाहित्यरचना प्रवर्तमाना जायते। एतासु नवीनकाव्यविधासु एव एका स्वनितम् (सॉनेट्) नामकं विधा यस्याः अस्मिन् शोधपत्रे सेतिहासं साङ्गोपाङ्गं विवरणं प्रस्तूयते । पत्रेस्मिन् स्वनितविधायाः इतिहासः, भारतागमनम् नामकरणं च स्वनितविधायाः स्वरूपम् सिद्धान्तश्च संस्कृतभाषायाम् अस्य प्रयोगकर्तारः तेषां कृतयश्च- इत्यादिभिः बिन्दुभिः'आधुनिकसंस्कृतसाहित्ये नवीनकाव्यविधा सॉनेट्' नामकं विषयं स्पष्टीकर्तुं प्रयासो करिष्यते।

सॉनेट् शब्दः इटेलियन्भाषायाः ऽonettoशब्दस्य लघु स्वरूपमस्ति, यस्य संस्कृते परिवर्तितं नाम स्वनितम्। संस्कृतभाषायां सॉनेट्काव्यस्य सर्वप्रथमरचना असमराज्यवास्तव्य-आनन्दरामवरुहमहोदयेन कृतम् । ततः परं वीरेन्द्रभट्टाचार्यमहोदयेन सॉनेट्काव्यानि रचितानि।

राधावल्लभत्रिपाठीमहोदयैः अस्य काव्यस्य नाम "स्वनितम्" इतिरूपेण कृतम् । अन्यकेचित कवयः अस्य नाम चतुर्दशपदी अपि कृतवन्तः । मराठीकविभिः सुनीतम् इति अस्याः विधायाः कृते प्रयुज्यते । संस्कृतसाहित्य सामान्यतयाः शेक्सपीयरसॉनेट्-विधायां रचना कृयते। पूर्वेषु यद्यपि सॉनेट्काव्येषु प्रमुखरूपेण प्रकृति-प्रेमवर्णनमेव भवति स्म परञ्च संस्कृतसॉनेट्काव्येषु अन्यविषयापि दृष्टिगोचराः भवन्ति।

कुञ्ची-शब्दाः – सॉनेट्, स्वनितम्, आधुनिकसंस्कृतसाहित्यम्।

साहित्यं समाजस्य दर्पणः भवति । परिवर्तमाने संसारेस्मिन् साहित्ये अपि परिवर्तनानि आयान्ति । समाजः आधुनिकताम् आप्नोति चेत् साहित्यमपि आधुनिकताम् प्राप्नोति । समाजे प्रयोगाः भवन्ति चेत् साहित्ये अपि नैकान् प्रयोगान् कुर्वन्ति कवयः । एष एव नियमः संस्कृतभाषायाः साहित्ये अपि निवेशयति ।

संस्कृतसाहित्यम् सामान्यतया स्वप्राचीनतायाः कृते एव प्रसिद्धम् अस्ति परन्तु संस्कृतस्य एतदेव वैशिष्ट्यम् अस्ति यत् संस्कृतभाषायाः साहित्यं यावत् प्राचीनम् अस्ति तावत् अर्वाचीनमपि अस्ति । आ ऋग्वेदात् आधुनिककाव्यरचनापर्यन्तं संस्कृतभाषा सर्वत्र परिराजते। संस्कृतसाहित्ये नितान्त-आधुनिकप्रवृत्तयः अपि द्रष्टुं शक्यन्ते। आधुनिकसंस्कृतसाहित्ये हाईकु-छिञ्ञो-तांका-गज़ल-कव्वाली-टप्पे-आदयः नैकाः नवीनकाव्यविधाः सन्ति याः अधिकृत्य संस्कृतसाहित्यरचना प्रवर्तमाना अस्ति । एतासु नवीनकाव्यविधासु एव एका अस्ति सॉनेट् विधा; यस्याः अस्मिन् शोधपत्रे सेतिहासं साङ्गोपाङ्गं विवरणं प्रस्तोष्यते । अस्मिन्नेव क्रमे –

सॉनेट्-विधायाः इतिहासः
सॉनेट्-विधायाः भारतागमनम् नामकरणञ्च
सॉनेट्-विधायाः स्वरूपम्
संस्कृतभाषायां सॉनेट्-विधायां प्रयोगकर्तारः कवयः तेषां कृतयश्च
सॉनेट्-विधायां विविधविषयाः

उपर्युक्तैरुपशीर्षकमाध्यमैः 'आधुनिकसंस्कृतसाहित्ये नवीन काव्यविधा सॉनेट्' नामकं विषयं स्पष्टीकर्तुं प्रयासाः करिष्यन्ते ।

1.1 सॉनेट्-विधायाः इतिहासः –

‘सॉनेट्’ शब्दः इटेलियन्भाषायाः‘Sonetto’[1] शब्दस्य लघु स्वरूपमस्ति । एषा लघुध्वन्या सह मेडोलियन् अथना ‘ल्यूटवाद्ययन्त्रे’ गायमाना लघु कविता आसीत् । सॉनेट्-विधायाः जन्मनः विषये विद्वत्सु मतभिन्नता अस्ति । केचन विद्वान्सः एतस्याः विधायाः जन्म प्राचीनग्रीकसुक्तिषु स्वीकुर्वन्ति अन्ये एनाम् इंग्लेंडदेशस्य तथा स्कॉट्लेंडदेशस्य प्राचीनविधा स्वीकुर्वन्ति । सॉनेट्-विधायाः प्रचलितं रूपं ख्रिस्तस्य त्रयोदश्यां शताब्द्यां परिदृश्यते । **फ्रॉ गुइत्तोनमहोदयः**(1235-1294)सॉनेट्-विधायाः जनकः स्वीक्रियते[2]। इटलीदेशस्य कवि **केपल लॉफ्ट्**-महोदयः सॉनेट्-विधायाः अन्वेषणार्थं ‘फ्रॉ गुइत्तोनमहोदयं’ साहित्यस्य ‘कोलम्बस्’इत्युपाधिना पर्यलङ्करोत् । सॉनेट्-विधायां फ्रॉन्स-देशस्य कविभिः, इंग्लेण्डदेशस्य

---

[1] (क) Online Etymology dictionary, sonnet , https://www.etymonline.com/search?q=sonnet
(ख)Oxford dictionary अनुसारेणइटेलियन्भाषायाम् अस्य Sonettoशब्दस्य मूलशब्दः ‘Suono’ अस्ति ।
[2]Christopher Kleinhenz (Editor) ,2003, Medieval Italy an encyclopedia, vol-2(L-Z),Publication-Routledge, पृष्ठ- 304

'सरे' तथा 'स्पेन्सर'-आदि कविभिः अपि काव्यरचना कृता । जर्मनिभाषायां **पेट्रार्कनशैल्यां** सॉनेट्काव्यानां रचना अभूत् । आङ्ग्लभाषायां सॉनेट्काव्यरचना **शेक्सपियर , मिल्टन् , वर्डसवर्थ कीटसादि**कविभिः कृता[3] । षोडशशताब्द्यां **थॉम्सवॉट् तथा हेनरीहावर्ड** (सरे) महोदयाः आङ्ग्लभाषायां सॉनेट्-रचनां कृतवन्तः[4]।

1.2 सॉनेट्-विधायाः भारतागमनम् नामकरणश्च-

भारतदेशे आङ्ग्लजनानाम् आगमनोपरान्तं यदा भारतदेशे आङ्ग्लभाषायाः प्रसारः जातः आसीत् तदा भारतीयजनानां सॉनेट्-काव्ये रुचिरुत्पन्ना अभवत् । भारतीयोपमहाद्वीपे डोगरी-आङ्ग्ल-गुजराती-हिन्दी-कश्मीरी-मलयालम्-मणिपुरी-मराठी-नेपाली-उडिया-सिन्धी-उर्दू-संस्कृतादिभाषासु सॉनेट्-रचना प्रारभत । हिन्दीसाहित्ये सॉनेट्काव्यस्य आगमनं विंशत्यां शताब्द्याम् आरभत । प्रारम्भे हिन्दीभाषायाः केचन एव कवयः सॉनेट्काव्यरचनाम् अकुर्वन् । स्वतन्त्रोत्तरकाले हिन्दीभाषायाः कविः त्रिलोचनः सॉनेट्काव्यस्य रचनां प्रारभत । एतमेव भारते हिन्दीसॉनेट्काव्यस्य स्थापकः मन्यते । कवित्रिलोचनेन एव सॉनेट्काव्यस्य भारतीयकरणं कृतम् । एवं हि संस्कृतभाषायां सॉनेट्काव्यस्य सर्वप्रथमरचनाप्रयासः असमराज्यवास्तव्येन आनन्दरामवरूहमहोदयेन कृतम् । आनन्दरामो महता प्रयत्नेन पेट्रार्क-स्पेन्सारीय-शेक्सपियीर-मिल्टनीयानां शिल्पशैल्यां संस्कृतसॉनेट्साहित्यमलंकृतवान् । अस्य प्रथमोद्धाहरणम् आनन्दरामस्य 'English Sanskrit Dictionary' इत्यस्य मङ्गलाचरणे ग्रन्थविसर्जने शिरोनाम्नः सॉनेट्काव्यानि प्राप्यन्ते । ततः परम् वीरेन्द्रभट्टाचार्यमहोदयेन सॉनेट्काव्यानि रचितानि ।

कविना 'सॉनेट्' इत्यस्य नाम 'कपालिकासंस्तवकश्चेति' प्रदायि । राधाभल्लभत्रिपाठीमहोदयैः अस्य काव्यस्य नाम **'स्वनितम्'**[5] इति कृतम् । कैश्चित् कविभिः अस्य नाम 'चतुर्दशपदी' अपि कृतम् । मराठीकविभिः **'सुनीतम्'**नाम अस्य विधायाः कृते प्रयुज्यते ।

1.3 सॉनेट्-विधायाः स्वरूपम्-

रचनादृष्ट्या सॉनेट्काव्यानि द्विविधानि सन्ति प्रथमानि पेट्रार्कनसॉनेट् वा इटालियनसॉनेट्काव्यानि इत्यिविधीयन्ते । अत्र चतुर्दशपङ्क्तयः भवन्ति इति अस्य काव्यस्य सर्वमान्यं रूपम् । एतासु चतुर्दशपङ्क्तिषु अष्टक-षोडकनामकौ द्वौ प्रमुखभागौ भवतः । अत्र प्रथमे अष्टके सामान्यतः प्रश्नः पृच्छयते अथवा समस्या उपस्थाप्यते द्वितीये षोडकभागे तस्य

---

[3]M.H Abrams, Geoffery Galt Herpham,2015,A Glossary of Literary Terms -11th edition , Pub-Cengage learning India private limited. Delhi -पृष्ठ-370

[4]तत्रैव-,पृष्ठ-370

[5]राधावल्लभत्रिपाठी, अङ्क- अक्टूबर-दिसम्बर 2017, स्वनितषोडशी-संस्कृतप्रतिभा,उन्मेषः-65, पृष्ठ-28

प्रश्नस्य समस्यायाः वा उत्तरम् समाधानञ्च प्रदीयते । अत्र अन्त्यानुप्रासक्रमः **'कखखक+कखखक, गघङ+गघङ'** इति भवति ।

अपराणि सन्ति शेक्सपीयरसॉनेट् अथवा एलिज़वेथियनसॉनेट्काव्यानि । आङ्ग्लसॉनेट् एतेषामेव अपरं नाम । अत्र अपि चतुर्दशपङ्क्तयः भवन्ति परन्तु अत्र अष्टक-षोडकक्रमः न भवति । अस्मिन् शेक्सपीयरसॉनेट्काव्येऽस्मिन् चतस्रपङ्क्तिसमायुक्ताः त्रयः श्लोकाः भवन्ति अन्ते द्वयोः पङ्क्त्योः अर्धः श्लोकः भवति । अत्र पूर्वेषु त्रिषु श्लोकेषु विचाराभिव्यक्तिः भवति अन्ते पङ्क्तिद्वये कविना स्वसन्देशः प्रदीयते । आङ्गलभाषायाम् इदं पङ्क्तियुग्मं**'हेमर'** इति कथ्यते । अस्य अन्त्यानुप्रासक्रमः **'कख कख गघ गघ ङच ङच छछ'** प्रकारेण भवति ।

संस्कृतसाहित्ये सामान्यतया शेक्सपीयरसॉनेट्शैल्यां रचना क्रियते । उदाहरणरूपेण राधावल्लभस्य सॉनेट्काव्यम् अत्र प्रस्तूयते – (अन्त्यानुप्रासक्रमः अन्ते निर्दिष्टः अस्ति)

"अट्लाण्टानगरी गरीयसि मया देशे च दृष्टा पुन- (क/A)
दृष्ट्वा पुष्पततिं वसन्तसमये सन्तोषमाप्तं मनः। (ख/B)
न्यूयार्के भ्रमितं खचुम्बिभवने ताराञ्चिते खे यथा। (क/A)
कुल्याभिः परिपूरितेऽपि गमितं पीटर्सबर्गे तथा। (ख/B)
वर्णैश्चित्रविचित्ररम्यभवनैर्युक्तस्य वै का कथा। (ग/C)
प्राहानामपुरस्य भाति खलु तद् गन्धर्वसृष्टिर्यथा।। (घ/D)
रम्या सा वियनापुरी विहगवच्चोड्डीय खे संस्थिता। (ग/C)
साहित्यस्य च संस्कृतेश्च निनदैः जोगुञ्जति स्पन्दिता।। (घ/D)
संरब्धं बहुगर्वविस्मयमयं दृष्टं तथा लन्दनं (ङ/E)
कान्तारे बहुवृक्षराजिवितते चैकं यथा नन्दनम्।। (च/F)
जापाने भ्रमितं सुशिल्पमहिते विज्ञानविभ्राजिते (ङ/E)
बैङ्काके लसिते तथैव विहृतं सौन्दर्यसारायिते। (च/F)
दृष्टं सर्वमिदं परन्तु न क्वचित् तं प्राप्तवानीश्वरम्। (छ/G)
दर्शं दर्शमिदं तथापि नगरं तुष्टोऽस्मि बालेश्वरम्"।। (छ/G)

श्लोकसंरचनायामपि द्रष्टुं शक्यते यत् स्वरूपानुसारेण एव पूर्वेषु त्रिषु श्लोकेषु विविधदेशानां नगराणां च वर्णनं, तत्रत्या सुन्दरतायाः वर्णनं च कृतमस्ति अन्तिमयोः द्वयोः

पङ्क्त्योः**'दृष्टं सर्वमिदं परन्तु न क्वचित् तं प्राप्तवानीश्वरम्'**माध्यमेन उपरोक्तधारणायां प्रहारः कृतः अस्ति ।

1.4 संस्कृतभाषायां सॉनेट्-विधायां प्रयोगकर्तारः तेषां कृतयश्च

जाधवपुरविश्वविद्यालये नियुक्ता श्रीमतीरीताचट्टोपाध्याययानुसारेण संस्कृतभाषायां सॉनेट्काव्यस्य प्रथमः कविः आनन्दरामः आसीत्[6]। असम् नीवास्तव्यस्य अस्य पूर्णं नाम **आनन्दरामवरूहः** आसीत् । आनन्दरामेण एव 1880 ख्रिस्ताब्द्यां संस्कृतसाहित्ये सॉनेट्काव्यस्य प्रथमः प्रयोगः कृतः आसीत् । अस्य सॉनेट्काव्यप्रयेगेषु पेट्रार्कनशेक्सपीरययोः उभयोः सम्मिश्रणम् अस्ति । आनन्दरामस्य सॉनेट्काव्यप्रयोगः तस्य (Sanskrit English Dictionary) शब्दकोशस्य भूमिकायां **ग्रन्थविसर्जनम्** नाम्ना प्राप्यते ।

यद्यपि सॉनेट्काव्यानाम् आदिप्रयोगकर्ता आनन्दरामः अस्ति तथापि गुणपरिमाणदृष्ट्या स्थापनादृष्ट्या च अस्य श्रेयः वङ्गदेशीय**वीरेन्द्रकुमारभट्टाचार्यमेव** गच्छति[7] यतोहि 1969 ख्रिस्ताब्द्यां प्रकाशितः संस्कृतसाहित्यस्य प्रथमः सनेट्संग्रहः **'कलापिका'**[8] वीरेन्द्रकुमारस्य एव अस्ति । अस्मिन् पञ्चाशत् सनेट्काव्यानि सन्ति । ततः परम् आधुनिककविकोविदाः **डॉ. राधाभल्लभत्रिपाठी-अभिराजराजेन्द्रमिश्रमहोदयाः** अस्यां परम्पराम् अग्रे सरन्तः सन्ति । डॉ राधाभल्लभत्रिपाठीवर्येण साहित्याकादम्यः प्रतिभानामकपत्रिकायां **स्वनितषोडशीनाम्ना**षोडश-सनेट्काव्यानां संग्रहः प्राप्यते[9] ।

अस्मिन् एव क्रमे कर्नाटकदेशीयः **'शतावधानी आर गणेशः'** विवेकानन्दस्य अन्तिमदिनानां घटनामधिकृत्य **सौगन्धिका**नामके संग्रहे कानिचन सॉनेट्काव्यानि प्राप्यन्ते[10] । **'हरेकृष्णमेहरमहोदयस्य** अपि कानिचन सॉनेट्काव्यानि प्राप्यन्ते [11] । **सुदीप्तमुंशीमहोदयेन**[12] स्वकीये Shakespeare's Sonnets in Sanskrit नामके ब्लागमध्ये

---

[6]Rajiv Konwar , Published on 15/12/2010, Scholar on sonnets' trail ……, , the telegraphhttps://www.telegraphindia.com/states/north-east/scholar-on-sonnets-trail-anandaram-penned-first-sanskrit-lyric-poem-in-1880/cid/453689

[7]वर्तमानवाङ्गादेशस्य शिलहट-जनपदे 1917ईशवीये संवत्सरे जनिं लभमानो वीरेन्द्रः भारतीयसर्वकाराधीने प्रथमं कार्यं कुर्वन्नपि परं दर्शनशास्त्रस्याध्यापको वभूव ।

[8]वीरेन्द्रकुमारभट्टाचार्यः–1969, कलापिका,संस्कृतपुस्तकभाण्डारः, कोलकाता,

[9]संस्कृतप्रतिभा, अङ्क- अक्टूबर-दिसम्बर 2017- उन्मेषः-65 पृष्ठ-28

[10] Author S. Ranganath, (Editer) (Late) Prof. Achyutanand Dash, 2009, Modern Sanskrit Writings in KARNATAKA,Page no. 75, , Rashtriya Sanskrit Sansthan,

[11]हरेकृष्णमेहर- 9/7/2018, आशा सॉनेट्काव्य http://hkmeher.blogspot.com/2018/09/aasha-sanskrit-sonnet-dr-harekrishna.html

[12] सुदीप्तमुंशी,

शेक्सपीयरकवेः चितानां सॉनेट्काव्यानां अनुवादः कृतः अस्ति । 2013 तः इदानीम् पर्यन्तं सः शताधिकानां सॉनेट्काव्यानां अनुवादं कृतवान् । अस्मिन् परमपरायाम् अन्येऽपि कवयः सन्ति ये सॉनेट्काव्येषु सिद्धहस्ताः सन्ति परन्तु तेषां रचनाः अप्रकाशिताः सन्ति ।

1.5 सॉनेट्-विधायां विविधविषयाः

कवेः रचना तस्य मनोस्थित्याः अनुगुणं भवति । कवि स्वतन्त्रः भवति । तस्या सृष्टिः नियतिकृतनियमरहिता भवति । कवि प्रसन्नः अस्ति चेत् तस्य काव्येषु अपि तस्याः प्रसन्नतायाः प्रतिबिम्बं दृश्यते । अस्मिन् क्रमे कवि कदाचिद् विधायाः स्वरूपस्यापि अतिक्रमणं करोति । संस्कृतसॉनेट्काव्ये इदमेव परिदृश्यते । पूर्वं यद्यपि सॉनेट्काव्ये प्रमुखरूपेण प्रेमप्रकृतियोः वर्णनम् एव क्रियते स्म, परन्तु आधुनिकसंस्कृतसॉनेट्काव्येषु अन्यविषयाः अपि दृष्टिगोचराः भवन्ति ।

राधाभल्लभत्रिपाठीमहोदयस्य रचनायां नैकाः प्रयोगाः द्रष्टुं शक्यन्ते । यथा मनुष्यस्य अथकप्रयासानां वर्णनं , तस्य आशानां वर्णनं प्रस्तूयते । प्रयासानां निष्फलता, आशानां छिन्नत्वं भग्नमनसः स्थितेः वर्णनम् निम्नलिखित सॉनेट्काव्यस्य अन्तिमयोः द्वयोः पङ्क्त्योः स्पष्टं परिभासते -

अदृश्यैः शत्रुभिः सार्धं भूयः सङ्घट्टनं कृतम् ।
त्यक्त्वा सुरम्यमुद्यानमरण्यं सङ्कुलं वृतम् ।।
विहायालौकिकं स्थानं दिव्यमामोसम्भृतम् ।
मरुप्रदेशवासाय स्वयमेव व्रतं धृतम् ।।
इन्द्रियाश्वान् समायोज्य प्रेरिता ये मनोरथाः ।
तेषां पुच्छेषु संलग्ना अस्माकं सततं व्यथाः ।
अन्धे तमसि मज्जद्भिर्विहिता विविधाः कथाः
प्रभातज्योतिषां रम्याश्चर्चा यासु सुगुम्फिताः ।।
आशा तथापि न त्यक्ता काल एष्यति स ध्रुवम् ।
सर्वे प्रतीक्षमाणाः स्मः प्रतिक्षणं च यं वयम् ।।
फलिष्यन्ति यदाऽस्माकं हस्तारोपितपादपाः ।
येषां चर्चाभिरस्माभिः विनीताः कति न क्षपाः ।।
प्रभाते किन्तु पश्यामो हस्तारोपितपादपान् ।
राजमार्गात् समायातैर्वाहनैः क्षतविक्षतान् ।[13]

26/07/2013,ShakespearesonnetinSanskrit http://shakespearesonnetinsanskrit.blogspot.com/2013/07/sonnet-4.html

[13]अभिराजराजेन्द्र मिश्र (सम्पादकः), अङ्क- अक्टूबर-दिसम्बर 2017-स्वनितषोडशीसंस्कृतप्रतिभा उन्मेषः-65, पृष्ठ-28

एवं हि अभिराजराजेन्द्रमिश्रादिकवीनां सॉनेट्काव्यानि सन्ति यत्र विविधानां विषयानां वर्णनं परिदृश्यते, यत्र आङ्ग्लसॉनेट्परम्परातः कश्चित् भिन्नः कर्तुं प्रयासः दृश्यते । आधुनिकाः संस्कृतकवयः नैकान् नवीनान् विषयान् स्वीकृत्य सॉनेट्काव्यरचनायां सलग्नाः सन्ति।

उपसंहारः- त्रयोदशशताब्द्याम् उत्पन्नस्य सॉनेट्काव्यस्यागमनं संस्कृतभाषायां एकोनविंशत्यां शताब्द्यामेव अभूत्, परन्तु संस्कृतभाषायाम् एतस्याः विधायाः स्थापनायाः श्रेयः वीरेन्द्रभट्टाचार्यमेव गच्छति । यतोहि अस्य एव प्रयासैः 1969 ख्रिस्ताब्द्यां सॉनेट्काव्यानां कपालिकानामकस्य काव्यसंग्रहस्य प्रकाशनं जातम् । तदनन्तरं नेकैः कविभिः प्रयासैः एषा विधा आधुनिकसंस्कृतसाहित्यस्य परिचितविधारूपेण विराजमाना जाता । अद्यत्वेऽपि आधुनिककवयः स्वलेखन्या अस्मिन् विधायां प्रयोगकुर्वन्तः सन्ति । प्रतिदिनं नवीनैः प्रयोगैः राधाभल्लवत्रिपाठीमहोदयाः ,अभिराजराजेन्द्रमिश्रमहोदयाश्च नवकवीनां नेतृत्वं कुर्वन्तः सन्ति ।

ओमनदीपशर्मा
शोधछात्रः
संस्कृत एवं पालि विभागः, पञ्जाबीविश्वविद्यालयः पटियाला
OmanShastri@gmail.com
OmandeepSharma
Research Scholar
Department of Sanskrit &Pali, Punjabi University, Patiala
कार्यालयः-
Department of Sanskrit, Govt. College For Girls,
Y.P.S. Road –Patiala 147001

***

उत्तरमीमांसायामद्वैतवेदान्तदर्शने पदार्थतत्त्वविमर्शः

- श्यामसुन्दरसाधुखाँ

शोध सारः –

'**मान्**' धातोः अनन्तरं '**सन्**' , '**आ**' प्रत्यययोगेन मीमांसा शब्दः निष्पद्यते । '**मान्**' धातोः अर्थः विचारः, सन् प्रत्ययस्यार्थ इच्छाप्रकाशनम्, अतः मीमांसा शब्दस्य अर्थः वेदार्थविचारमूलक-शास्त्रम्। छान्दग्योपनिषदि विचारार्थे मीमांसाशब्दस्य प्रयोगः दृश्यते। अत्र वेदस्य कर्मकाण्डस्य विचारः वर्तते, अर्थात् मीमांसा वेदस्य गूढार्थस्य निर्णायिकपद्धतिविशेषः। कर्मकाण्डात्मकं मीमांसादर्शनं '**पूर्वमीमांसा**' एवञ्च ज्ञानकाण्डात्मकं वेदान्तदर्शनम् '**उत्तरमीमांसा**' इति कथ्यते। महर्षिवेदव्यासशिष्यः जैमिनिः मीमांसादर्शनस्य प्रवर्तकः। तस्मात् कारणात् मीमांसादर्शनं जैमिनिदर्शनमिति कथ्यते। जैमिनिना कृतः मीमांसासूत्रम् अस्य दर्शनस्य भित्तिः। अयं ग्रन्थः द्वादशाध्यायात्मकम् वर्तते। अत्र 2744 सूत्राणि विद्यन्ते। ग्रन्थोऽयं आनुमानिकं द्विशतम् (200) ईषवीये विरचितः। मीमांसादर्शने षट् प्रमाणानि स्वीक्रीयन्ते। तद्यथा प्रत्यक्षं अनुमानम् उपमानम् शब्दः अर्थापत्तिः अनुपलब्धिश्च। वेदस्यान्तिमो भागो वेदान्तः इति कथ्यते। उपनिषत्तु वेदस्यान्तिमो भागः। वेदस्य विभिन्नशाखासु उपनिषदो बहुलतया परिदृश्यन्ते। तासु विभिन्नाः सिद्धान्ताश्च दृश्यन्ते। उपनिषत्सु स्थलविशेषे विरोधभावः दृश्यते। तद्विरोधभावस्य समाधानार्थं बादरायणेन ब्रह्मसूत्रं विरचितम्। वेदान्तदर्शनस्य मूलभूतग्रन्थः '**ब्रह्मसूत्रम्**'। महर्षिः वेदव्यासरचितः ब्रह्मसूत्रस्योपरि विविधभाष्यभेदैः विभिन्नानि वेदान्तदर्शनानि समुद्भूतानि। तेषु शंकराचार्यकृतं शारीरकभाष्यम् अधिकसमादृतम्। तेन प्रचारितः अद्वैतमार्ग एव वेदान्तदर्शन रूपेण वर्तमाने प्रचलितः भवति। वस्तुतः वेदान्तदर्शने पदार्थद्वयं स्वीक्रियते। तद्यथा ब्रह्म माया च।

कुञ्ची-शब्दाः – उत्तरमीमांसा, अद्वैतवेदान्तदर्शनं, पदार्थतत्त्वविमर्शः, ब्रह्म, माया ।

उपक्रमणिका-

पदस्यार्थः पदार्थः इति व्युत्पत्या अभिधेयत्वं पदार्थसामान्यलक्षणम्। तत्र वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः स्वीकृताः। न्यायदर्शने प्रमाण-प्रमेय-संशय प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जातिनिग्रह-स्थानाः षोडशपदार्थाः सन्ति। सांख्यदर्शने पञ्चविंशतिः तत्त्वानि तथा पदार्थाः स्वीकृताः। तद्यथा प्रकृतिः पुरुषः अहंकारः महत् एकादशेन्द्रियाणि पंचतन्मात्रा पंचमहाभूतानि च। योगदर्शने षडविंशतिः तत्त्वानि सन्ति। सांख्यदर्शने यानि तत्त्वानि सन्ति तान्येव, एवञ्च ईश्वरः।

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

अद्वैतवेदान्तनये ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः। अर्थात् ब्रह्म एकमात्रं सत् वस्तु जीवः ब्रह्मैव तद् भिन्नम् अन्यत् सर्वं जगत् मिथ्यारूपम्। वस्तुतः इदं जगत् ब्रह्मणः मायया सृष्टं भवति। मायायाः अपर नाम अविद्या। अतः निर्णेतुं शक्यते यत् अद्वैतवेदान्ते द्वौ पदार्थौ स्तः यथा ब्रह्म माया च।

ब्रह्म -

शंकराचार्येण स्वकीयब्रह्मसूत्रभाष्ये ब्रह्मणः परिभाषा दत्ता। तद्यथा नामरूपाभ्याम् अव्यक्तम्, अनेककर्तृभिः भोक्तृभिश्च संयुक्तम्, ईदृशक्रियाणां फलानाञ्च आश्रयः, यस्य देशका-लनिमित्तादीनि व्यवस्थितानि वर्तन्ते। मनसाऽपि यस्य रचनायाः स्वरूपं विचारयितुम् अशक्यम्, अस्य जगतः उत्पतौ, स्थितौ लये च यः सर्वज्ञः सर्वशक्तिमान् कारणीभूतः वर्तते तद्ब्रह्मेति।

"अस्य जगतो नामरूपाभ्यां व्याकृतस्योनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्त-क्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः करणात् भवति, तद्ब्रह्मेति वाक्यशेषः।"[1]

शंकराचार्यस्य उपर्युक्तलक्षणानुसारं ब्रह्मणः विशेषताः सर्वव्यापकता, अधिष्ठानता, सर्वज्ञ-ता, सर्वशक्तिमत्ता च वर्तन्ते। उपर्युक्तपरिभाषया अभिज्ञायते यत् ब्रह्म शांकरवेदान्तस्य प्रकृष्टतमं तत्त्वं वर्तते। वस्तुतः ब्रह्म एकं सूक्ष्मं तत्त्वं वर्तते। यस्य निर्देशनं वाण्या मनसा वा असम्भवं वर्तते। तस्य अभावं नैव स्वीकर्तव्यमिति तात्पर्यम्। तद्यथा -

"वाङ्मनसातीतत्वमपिब्रह्मणो नाभावाभिप्रायेणाभिधीयते।"[2]

ब्रह्मणः सत्तां स्वीकुर्वाणः शङ्कराचार्यः स्पष्टतया विलिखति - **"ब्रह्मावसानोऽयं प्रतिषे-धोनाभावावसानः।"**[3]

ब्रह्मणः सत्ता व्यावहारिक-दैशिक-कालिक-वैचारिकसत्ताभ्यः विलक्षणं वर्तते। ब्रह्मणः असत्पदार्थत्वेन प्रतिपादनस्य शङ्का शङ्कराचार्येण पूर्वाविदिताऽऽसीदतः शङ्कराचार्यः शून्य-वादमेनं नैव समर्थयति। तेन च गद्यते-

"बाह्यार्थ विज्ञानशून्यवादोऽयमितरेतरविरुद्धमुपदिशता सुगतेन स्पष्टकृतात्मनःसम्बन्धप्र-लापित्वं, प्रद्वेषो वा प्रजासु विरुद्धार्थप्रतिपत्त्या विमुह्येयुरिमाः प्रजाः इति।"[4]

शंकराचार्यस्यानुसारं मायाशक्त्या सबलत्वात् ब्रह्म कार्यत्वेन, परंब्रह्म च कारणत्वेना-भीधीयते। **"कार्यमाकाशादिकं बहुप्रपञ्चं जगत्। कारणं परंब्रह्म।"**[5]

---

[1] ब्रह्मसूत्र-शाङ्करभाष्यम् -1.1.2

[2] तत्रैव- 3.2.22

[3] तत्रैव- 3.2.22

[4] तत्रैव- 2.2.32

[5] ब्रह्मसूत्र-शाङ्करभाष्यम् - 2.1.14

ब्रह्मणः लक्षणम् –

ब्रह्मणः द्विविधं लक्षणं वर्तते। तद्यथा स्वरूपलक्षणं तटस्थलक्षणञ्च। स्वरूपलक्षणं च स्वरू-पान्तर्गतत्वे सति व्यावर्त्तकम्। सच्चिदानन्दत्वं ब्रह्मणः स्वरूपलक्षणम्। अर्थात्सत-चित्-आनन्दं ब्रह्मेति तस्य स्वरूपलक्षणम्। अनेन ब्रह्म सत्स्वरूपं, ब्रह्म चित्स्वरूपं, ब्रह्म आनन्दस्वरूपमिति ज्ञायते।

"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।"[6], **"जन्मादस्य यतः"**[7] इत्येतानि ब्रह्मणः तटस्थलक्षणानि। तटस्थल-क्षणं तु जगज्जन्मादिकारणत्वमिति अर्थात् – यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तदेव तटस्थलक्षणम्। तटस्थलक्षणं तूपलक्षणम्, उपलक्षणं नाम अविद्यमानत्वे सति व्यावर्तकम्। यथा – काकवद्देवदत्तगृहम्। वस्तुतः नेदं लक्षणं युक्तम्। 'जटाभिः तापस' इत्यत्र विद्यमानापि जटा तापसे उपस्थलक्षणम्। क्वचिच्च विद्यमानमप्येतद्व्यावृत्तिर्न्यूनाधिकवृत्तितया तत्र न विशेषणं, किन्तूपलक्षणम्। यत्र यत्र तापसत्वं तत्र तत्र जाटावर्त्तत्वमिति न नियमः, न वा यत्र तापसत्वं नास्ति तत्र जटा भवतीति नियमः। अतस्तापसत्वन्यूनाधिकवृत्तितया तापसे जना न विशेषणं, किन्तूपलक्षणम्।

ब्रह्मणः सगुणत्वं निर्गुणत्वं च-

इस प्रकार एकाग्र अवस्था की समाधियों की उपलब्धियों का परिणाम जीवात्मा को निरुद्ध अवस्था की ओर अग्रसर करना होता है। तब वह उस विवेक और वैराग्य का और अधिक सूक्ष्मता से अवलोकन करता है जिससे उसे एकाग्र अवस्था की उपलब्धियाँ हुईं। तब वह और अधिक विवेक व वैराग्य प्राप्ति की ओर अग्रसर होता है, जिससे उसे ईश्वर की प्राप्ति हो सके। एकाग्र अवस्था में योगी को अनुभूति होती है कि जिस आनन्द की प्राप्ति उसे हो रही है, क्या वह शाश्वत है ? उसे ज्ञात होता है कि वह आनन्द शाश्वत न होकर शरीर रहने मात्र तक ही है। तब वह विवेक व वैराग्य की उच्च अवस्था को पाना चाहता है, जिससे उसका ईश्वर से साक्षात्कार हो। वह एकाग्र अवस्था से ऊपर उठकर निरुद्ध अवस्था की ओर अग्रसर होता है।

निरुद्ध अवस्था में पहुँचते ही, मन का कार्य वहीं पर समाप्त अथवा शान्त हो जाता है, क्योंकि मन का लक्ष्य जीवात्मा को भोग से अपवर्ग की ओर अग्रसर करना होता है।

इस प्रकार दो प्रकार की समाधियों की चर्चा योगदर्शन में की है – **सम्प्रज्ञात** समाधि एवम् **असम्प्रज्ञात** समाधि। एकाग्र अवस्था में होने वाली चार समाधियों का एक सामूहिक नाम सम्प्रज्ञात, सबीज अथवा सालम्बन समाधि है, जिसमें उपर्युक्त 27 तत्वों का साक्षात्कार योगाभ्यासी को क्रमशः होता है। निरुद्ध अवस्था में जो समाधि लगती है, वह असम्प्रज्ञात, निर्बीज अथवा निरालम्बन समाधि कहलाती है। इस समाधि में जीवात्मा का परमात्मा से मिलन होता है। इसी **सम्प्रज्ञात** समाधि को महर्षि पतञ्जलि ने **समापत्ति** शब्द से भी कहा है -

'**क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः**'[7]

अर्थात् स्फटिक मणि की भाँति निर्मल व अभ्यास-वैराग्य के द्वारा क्षीणवृत्तियों वाले तथा ग्रहीता (आत्मा), ग्रहण (सत्व, रजस्, तमस, महत् तत्त्व रूपी बुद्धि, अहंकार, मन, पञ्च-ज्ञानेन्द्रियाँ, पञ्च-कर्मेन्द्रियाँ व पञ्च-तन्मात्राएँ या सूक्ष्मभूत) और ग्राह्य (पञ्च-स्थूलभूत) आलम्बनों में स्थित या **एकाग्र चित्त** का उन-उन आलम्बनों में तद्रूप या तदाकारित हो जाना

---

[7] योगदर्शन — 1.41

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

'**समापत्ति**' है। यह समापत्ति भी चार भेदों वाली है – सवितर्का, निर्वितर्का, सविचारा और निर्विचारा।

1) सवितर्का समापत्ति में पञ्च-महाभूतों का शब्द, अर्थ और ज्ञान के विकल्पों से मिश्रित साक्षात्कार होता है।

2) निर्वितर्का समापत्ति में इन्हीं पञ्च स्थूलभूतों का अर्थमात्र निर्भास होता है।

3) सविचारा समापत्ति में 22 पदार्थों अर्थात् पञ्च-सूक्ष्मभूत, पञ्च-ज्ञानेन्द्रियाँ, पञ्च-कर्मेन्द्रियाँ, मन, अहङ्कार, महत्तत्त्वरूपी बुद्धि, त्रिधा (सत्व, रजस्, तमस्) प्रकृति व जीवात्मा का शब्दार्थ ज्ञान होता है।

4) निर्विचारा समापत्ति में सविचारा समापत्ति के ही 22 पदार्थों का अर्थमात्र ज्ञान होता है।

इसी निर्विचारा समापत्ति के निर्मल हो जाने पर योगी को अध्यात्म प्रसाद प्राप्त होता है – '**निर्विचारवैशारद्येऽध्यात्मप्रसादः**'[8]। वैशारद्य को स्पष्ट करते हुए महर्षि वेदव्यास का कथन है– '**अशुद्ध्यावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यम्**'।[9]

अर्थात् चित्त की निर्मलता दो प्रकार से होती है – एक, विवेक और वैराग्य से इस मन पर आए अशुद्धि रूप आवरण अथवा पञ्च-क्लेश – अविद्या, अस्मिता, राग, द्वेष, अभिनिवेश – के समाप्त होने पर चित्त निर्मल होता है। दूसरा, रजोगुण व तमोगुण के अभिभूत हो जाने पर व सत्त्वगुण का उद्रेक होने पर चित्त शान्त होता है व निर्मलता आती है। ये दोनों प्रकार की निर्मलता निर्विचारा समापत्ति की उत्कृष्ट अवस्था में साधक को प्राप्त होती हैं। ऐसी स्थिति में साधक को दिव्य प्रसाद – अध्यात्म प्रसाद – की प्राप्ति होती है। अध्यात्म प्रसाद की प्राप्ति होने पर साधक को यथार्थ विषयक, युगपत्सर्वार्थग्राही, व स्पष्ट प्रज्ञा प्रकाश होता है। इसी प्रज्ञाप्रसाद पर आरूढ हो योगी स्वयं शोकादि से रहित हो, शोक करते हुए सभी प्राणियों को, पृथ्वी पर स्थित सभी प्राणियों को, पर्वत पर स्थित प्राणी की भाँति देखता है -

'**प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् । भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञोऽनुपश्यति**' ।।[10]

यही अध्यात्म प्रसाद ही ऋतम्भरा प्रज्ञा है, जिसे श्रीमद्भगवद्गीता में स्थित-प्रज्ञ के नाम से कहा गया है। इस ऋतम्भरा प्रज्ञा की प्राप्ति के तीन उपाय महर्षि वेद-व्यास ने बताए हैं –

'**आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम्** '।।[11]

आगम अर्थात् **शब्द-प्रमाण** शास्त्र-अध्ययन एवं शास्त्र-श्रवण से, **अनुमान-प्रमाण** अथवा न्याय-शास्त्र से एवं ध्यानभ्यास के आनन्द अर्थात् **प्रत्यक्ष-प्रमाण** से योगी सर्वोत्कृष्ट योग को प्राप्त

---

8 योगदर्शन — 1.47

9 सांख्यप्रवचनभाष्य – 1.47

10 सांख्यप्रवचनभाष्य – 1.47

11 सांख्यप्रवचनभाष्य – 1.48

करता है। वस्तुतः प्रत्यक्ष अथवा साक्षात्कार का विषय होने से ऋतम्भरा-प्रज्ञा विशेषार्थ का विषय होने से, आगम और अनुमान-ज्ञान से भिन्न विषय वाली होती है - **'श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्'**।[12]

समाधिप्रज्ञा का लाभ होने पर योगी के प्रज्ञाकृत नये-नये संस्कार उत्पन्न होते हैं व ऋतम्भरा प्रज्ञा से उत्पन्न संस्कार अन्य संस्कारों का बाधक होता है -

'समाधिप्रज्ञाप्रतिलम्भे योगिनः प्रज्ञाकृतः संस्कारो नवो नवो जायते । तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी'।[13]

जिस प्रकार ऋतम्भरा प्रज्ञा से उत्पन्न संस्कार व्युत्थान अथवा लौकिक-संस्कारों के बाधक होते हैं, ठीक उसी प्रकार निर्बीज समाधि के संस्कार ऋतम्भरा-प्रज्ञा से उत्पन्न संस्कारों के भी बाधक होते हैं –

'तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः'।[14]

वस्तुतः ऋतम्भरा प्रज्ञा ऐसा विशुद्ध अथवा सर्वोत्कृष्ट ज्ञान है, जो एक ही जन्म में प्राप्त हो जाए, यह आवश्यक नहीं। अष्टाङ्ग-योग के माध्यम से, अत्यन्त पुरुषार्थ करते हुए, घोर तप कर, उत्तम विधि को अपनाते हुए ही इसे प्राप्त किया जा सकता है। ऋतम्भरा प्रज्ञा को प्राप्त करना मनुष्य का एकमात्र प्रयोजन है, जो योग के माध्यम से सम्भव है।

सन्दर्भ-ग्रन्थ-सूची -

1. **पातञ्जल-योगदर्शन**, (व्यास-भाष्य सहित), (सम्पादक) डॉ. सुरेशचन्द्र श्रीवास्तव, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2002.
2. **श्रीमद्भगवद्गीता**, –गीताप्रेस, गोरखपुर.
3. **मनुस्मृति** – (व्याख्याकार) (दृष्टि व्याख्या) डॉ. प्रवीण प्रलयङ्कर (भाग 1-2), न्यू भारतीय बुक कॉर्पोरेशन, दिल्ली, प्रथम संस्करण, 2004.
4. **मनुस्मृति** (द्वितीय अध्याय) कुल्लूकभट्ट कृत 'मन्वर्थमुक्तावली' सहित (सम्पादक एवं व्याख्याकार) ('चन्द्रिका' व्याख्या) डॉ. राकेश शास्त्री, विद्यानिधि प्रकाशन, दिल्ली, प्रथम संस्करण, 1999.

डॉ.हरीश,
सहायक-प्राध्यापिका, संस्कृत-विभाग,
किरोड़ीमल महाविद्यालय, दिल्ली विश्वविद्यालय, दिल्ली-110007.
Email : dr.ms.harish@gmail.com
Res. Address : C4-A/60-A, Janak Puri, New Delhi – 110 058.

***

[12] योगदर्शन — 1.49

[13] योगदर्शन — 1.50

[14] योगदर्शन — 1.51

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

काव्यत्वाधिष्ठानमीमांसा

- गिरीशकुमारः

शोधसारः –

शोधपत्रेऽस्मिन् साहित्यशास्त्रस्य बीजभूतमुपादानम् लोकजीवने तस्योपयोगिता च निरूपिता । साहित्यशास्त्रीयसम्प्रदायानाश्रित्य जीवातुभूततत्वानां विषये यत्मतवैभिन्न्यमस्ति तदत्र विवेचितमस्ति । निखिलभारतीयवाङमयस्य सारभूतं साहित्यशास्त्रं मानवजीवनस्य समेषां पक्षाणां सजीवं चित्रणं करोति । वैदिकवाङ्मयमनतिक्रम्यैव शास्त्रान्तराणि यथा प्रसक्तानि लोके तथैव साहित्यशास्त्रमपि वेदानामाधारभित्तिमाश्रयति गुणरीतिध्वन्यलङ्कारादिप्रमुखसौन्दर्याधायकानि तत्वानि वेदेऽपि प्राप्यन्ते । अत एव काव्यशास्त्रस्य सोत्पत्त्यर्थम् उपादानसामग्री वेदेभ्य: एव लभ्यते । काव्यनिर्माणविज्ञानं काव्यस्य तत्त्वविज्ञानमित्युभयमपि साहित्यविधाया: लक्ष्यलक्षणात्मकत्वं निगमयति । रामादिवत्प्रवर्तितव्यं न रावणादिवत् इति संक्षिप्त: साहित्यशास्त्रार्थो लोकवेदाविरुद्ध: । एवञ्च प्रबन्धकाव्यानां शिल्पविज्ञानमर्थचिन्तनञ्चेत्युभयमपि साहित्यसम्प्रदायस्य प्रमेयतममिति संक्षेप: । बीजञ्चास्य काव्यशास्त्रस्य मन्त्रब्राह्मणात्मकोऽपौरुषेयो वेद: । भारतीयकाव्यशास्त्रस्य प्रथमस्तथा प्रमुखो विचारकेन्द्रः काव्यशरीरमेव भवति । एतदन्तर्गतं काव्यस्य मौलिकविशेषताया अथवा लक्षणस्यापि विचारो क्रियते । तत्कालं यावत्विषयेऽस्मिन् परम्पराद्वयं प्रवाहे विद्यते स्म । अत्र एका साऽसीद् यत्र केवलं शब्दस्य काव्यता स्वीकृताऽस्मिन्, तथा द्वितीया यत्र शब्दार्थयोः समुदायमादाय काव्यस्य प्रचलनमासीत् । "लोकप्रवृत्तिर्हि भिन्नाः" इति नयेन प्रायशः सम्प्रदायप्रवर्त्तकैः आलंकारिकैः स्वस्वरूच्यनुसारेण काव्यत्वाधायकानि तत्त्वानि वर्णितानि । एवं हि साहित्यशास्त्रस्य प्रायः षट् सम्प्रदायाः प्रचलिताः सन्ति । रसतत्त्ववादिनः सहृदयसंवेद्यमुक्ताफलविच्छुरितच्छायाप्रतिमं व्यङ्गयार्थमेव प्राधान्येन परिचिन्तयन्तः तदाधारकं गुणालङ्कारादिजन्यं बाह्यसौन्दर्यमेव व्यवस्थाप्यन्ति । अतः काव्यतत्त्वज्ञाः रस एव हेतुश्चमत्कारोत्पादने नितरां प्रतिष्ठाप्रदं काव्यत्वाधायकं तत्त्वमिति स्वीकुर्वन्ति ।

कुञ्ची-शब्दाः – षट् सम्प्रदायाः, उत्पत्तिवादः, अनुमितिवादः,भुक्तिवादः, अभिव्यक्तिवादः ।

सर्वशास्त्राणामथवा निखिलभारतीयवाङ्मयस्य सारभूतं साहित्यशास्त्रं मानवजीवनस्य समेषां पक्षाणां सजीवं चित्रणं करोति । तस्य किमैतिह्यं कश्च परिचयः इति सर्वासां जिज्ञासानां समाधानार्थमादौ तस्य शास्त्रस्य संक्षिप्तः परिचयः

समुपस्थाप्यते । वैदिकवाङ्मयमनतिक्रम्यैव शास्त्रान्तराणि यथा प्रसक्तानि लोके तथैव साहित्यशास्त्रमपि वेदानामाधारभित्तिमाश्रयति । काव्यमीमांसायां राजशेखरः अलङ्कारशास्त्रोत्पत्तौ तद्विषयिणीम् एकाम् आख्यायिकां प्रस्तौति । तदेव श्रीकण्ठ: परमेष्ठिवैकुण्ठादिभ्य: शिष्येभ्य: उपदिदेश । अत एवेदं निश्चीयते यदनेनेदमपि सुनिश्चितं भवति यत् काव्यशास्त्रस्यापि उत्पत्ति: भगवत: शङ्करदेवादभूत् । तत: देवा: ऋषयश्च शिक्षिता: अभूवन् । अष्टादशोपदेशकत्वद्वारा शास्त्रमिदमष्टादशाधिकरणकं सञ्जातम् । केन किं शिक्षितं इति विषयेऽपि काव्यमीमांसा द्रष्टव्या । तथाहि- **"अथातः काव्यं मीमांसयिष्यामहे ,यथोपदिदेश श्रीकण्ठ: परमेष्ठिवैकुण्ठादिभ्य: चतुष्टयेभ्य: शिष्येभ्य: सोऽपि भगवान् स्वयंभूरिच्छाजन्मेभ्य: स्वान्तेवासिभ्य: तेषु सारस्वतेयो वृन्दीयसामपि काव्यपुरुष आसीत् । स च सर्वसमर्थविदं दिव्येन चक्षुषा भविष्यदर्थदर्शनं भूर्भुव: स्वस्त्रितयवर्तिनिषु प्रजासु हितकाम्यया प्रजापति: काव्यविद्याप्रवर्तनायै प्रायुङ्क्तः। सोऽष्टादशाधिकरणीं दिव्येभ्यः काव्यविद्या स्नातकेभ्य: सप्रपञ्चं प्रोवाच"** १ तत्रैव राजशेखरेण पुन: प्रपञ्चितम् **"तत्र कवि रहस्यं सहस्राक्ष: समाम्नासीत्, औक्तिकमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेताः, यमकं यमः, चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्य: औपम्यभौपकायनः, अतिशयं पाराशर: अर्थलेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणोपादानिकमुपमन्युः, औपानिषदिकं कुचमारः, इति ततस्ते पृथक्-पृथक् स्वशास्त्राणि विरचयञ्चक्रुः"** २ यद्यपि राजशेखरेण काव्यशास्त्रीयरचनाविषये महर्षीणां योगदानमवलोक्य उपरि निर्दिष्टा आख्यायिकैषा निबद्धा परन्तु आधुनिके वैज्ञानिके काले जना: आख्यायिकासु न विश्वसन्ति । काव्यशास्त्रीयगुणरीतिध्वन्यलङ्कारादिप्रमुखसौन्दर्याधायकानि तत्वानि वेदेऽपि

प्राप्यन्ते । अत एव काव्यशास्त्रस्य सोत्पत्यर्थं उपादानसामग्री वेदेभ्य: एव लभ्यते । इत्यपि समीचीनमस्ति **“वेद: स्वयमेव अमरकाव्यमिति”** नाम्ना लोके प्रथितो वर्तते । तत्रोक्तमस्ति – **“पश्य देवस्य काव्यं न ममार न जीर्यति** ”३ तथा **“अग्नि र्विश्वानि काव्यानि विद्वान्** ” ४ अन्योऽपि **“आदेवालनामभव: केतुरग्रे मन्द्रो विश्वानि काव्यानि विद्वान् एवं तम् गाथया पुराण्या पुनानैभ्यनुषति”**५ एभि: विवेचनै: सम्यगवबोधयितुं शक्यते यत् साहित्यशास्त्रस्य जननी श्रुतिरेवास्ति । वेदवेदाङ्गादिषु साहित्यशास्त्रस्य तत्वानि समुपलभ्यन्ते । तत्र प्रबन्धकाव्यरूपेण वाल्मीकीयरामायणमेव प्रथमं काव्यमिति भारतीयानां सर्वसम्मत: पक्षो वर्तते । इदमेवाग्रेतराणां कृते लक्षणात्मकं दिग्विनिर्देशकमस्तीति । रामोपासना ऋग्वेदकालादेव लोके प्रसृता वर्तते रामतारकषडक्षरमन्त्रस्य तन्मूलकत्वादिति । ऋग्वेदे अधोलिखितमन्त्रे कृत्स्नमपि रामचरितं समुपलभ्यते । यथा - **भद्रो भद्रया सचमान आगात्स्वसारं जारोऽभ्येतिपश्चात्। सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्नुशद्भिर्वर्णैरभि राममस्थात्।** ६ अस्यार्थ: नीलकण्ठभाष्ये एवं व्याख्यात: - “ **भद्र: – रामभद्र:, भद्रया-सीतया सह ,सचमान:- वनं प्रति सज्जमान: , आगात् – पंचवटीं समागत: । पश्चात् रामे लक्ष्मणे च मायामृगव्याजेन स्थानान्तरिते ,जार:– परस्त्रीदूषक: रावण: , रामात्परोक्षे स्वसारं – रामाश्रमं ,अभ्येति- आगत: । ततो रावणे हते सति, उषद्भिर्वर्णै:- कान्तियुक्तवर्णोपलक्षित: अग्नि: रामदारै: सह रामस्याभिमुखम् अस्थात् – स्थितवान्”**७ रामायणेऽपि श्रीराम: रामभद्रशब्देन स्मृतोऽस्ति । भद्रापदमपि दुर्गास्पदम् । दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् इत्याथर्वणी श्रुति: । रामायणपदमपि रामश्च रामाचेति एकशेषन्यायेन रामाया अयनमिति पदच्छेदाच्च श्रीसीतारामयोरुभयोरपि बोधकम् । अत एव- “ काव्यं रामायणं प्रोक्तं सीतायाश्चरितं महत् ” इति आदिकाव्ये लिखितम् । इदमपि रामायणमादिकाव्यरूपेण

रामतापनीयोपनिषदुपबृंहणम् । भूषणतिलककारादीनां प्रौढव्याख्यानेनावगम्यते । उपनिषदामपौरुषेयत्वादेव तासां कालादिनिर्धारणं वेदबाह्यमेव । इदं रामायणमहाकाव्यं सन्दर्भमादर्शीकृत्यादिकविगोष्ठीगरिष्ठेन महामुनिना भरतेन दृश्यकाव्यपरम्परा प्रावर्त्यत । उत्तररामचरितस्य चतुर्थेऽङ्के तदतीवस्पष्टरूपेण द्रष्टुं शक्यते । पुनश्च ऋग्वेद एव- **सं रूद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारे अवद्य आगात्**

वम्रस्य मन्ये मिथुना विवव्री अज्जमभीत्यारोदयन्मुषायन्।। ८

अस्मिन् मन्त्रे " **सः – रामः ,रूद्रेभिः – हनुमानादिभिः सहायैः, ऋभ्वा – अग्निशुद्धया देव्या सीतया सह, गयम् – स्वस्थानम् , आगात् –आगतवान् । आरे अवद्य – दूरनिरस्तदोषः सीतां रावणहृतां सर्वदेवसन्निधौ संशोध्यत्यर्थः, अशस्तवारो हित्वी – प्रतिकूलकाले रजकनिन्दया सीतां तत्याज् । एतत्सर्वं संभविष्यं रामायणं वभ्रस्य – वाल्मीकेः मिथुने – यमलशिष्यौ कुशलवौ, विवव्री – तस्मादधीत्य लोके विशेषेण वितृतवन्तौ"**९ एवं रामकथायाः वाल्मीकिकुशलवहनुमदादिपात्राणां मन्त्रभागेषु उपलब्धिर्जायिते । रामतापनीयोपनिषदि - **ओं यो हवै रामचन्द्रः सभगवानद्वैत् परमानन्द आत्मा। यः सच्चिदानन्दाद्वैतकचिदात्मा भूर्भुवः स्वस्तस्मै नमो नमः।।** १०इत्याद्युक्तम् । अवतारसिद्धान्तश्च श्रुतिपुराणरामायणमहाभारतादौ प्रसिद्धः। वेदबाह्यैरनुसन्धानापरपर्यायैरतितमाम् उद्धूलितोऽपि मन्त्रब्राह्मणात्मेकेऽनाद्यपौरुषेये वेदे तदुपबृंहणात्मकस्मृतिपुराणेतिहासादौ परमार्थसिद्धान्तः । यथा- **प्रजापतिश्चरति गर्भेऽन्तरजीयमानो बहुधा विजायते। तस्य योनिं परिपश्यन्ति धीरातस्मिन्हतस्थुर्भुवनानि विश्वा।।** ११ इति यजुषा प्रतिपाद्यते। वेदबाह्यैरवतारवादोऽभ्युपेयते । एतावता कोटि-कोटिकण्ठोद्धृष्टोऽस्ति एव । आदिकाव्यावतारप्रयोजनं तु मूलरामायणे एव महर्षिणा नारदेन प्रोक्तम्- **पठन द्विजो**

वागृषभत्वमीयात् स्यात्क्षत्रिय: भूमिपतित्वमीयात्। वणिग्जन: पुण्यफलत्वमीयात् जनश्च शूद्रोऽपि महत्त्वमीयात्।। १२इत्यादि । एतदनुसृत्यैव भामहाचार्य: स्वकीये काव्यालंकारे काव्योपनिबन्धननिषेवणाच्चातुर्वर्ण्यस्य चातुर्वर्ग्यफलोपलब्धिरिति प्रतिपादयति- **धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्तिं प्रीतिं च साधु काव्यनिषेवणम्।** १३ काव्यनिर्माणविज्ञानं काव्यस्य तत्त्वविज्ञानमित्युभयमपि साहित्यविधाया: लक्ष्यलक्षणात्मकत्वं निगमयति । रामादिवत्प्रवर्तितव्यं न रावणादिवत् इति संक्षिप्त: साहित्यशास्त्रार्थो लोकवेदाविरुद्ध: । एवञ्च प्रबन्धकाव्यानां शिल्पविज्ञानमर्थचिन्तनञ्चेत्युभयमपि साहित्यसम्प्रदायस्य प्रमेयतममिति संक्षेप: । बीजञ्चास्य काव्यशास्त्रस्य मन्त्रब्राह्मणात्मकोऽपौरुषेयो वेद: । भारतीयकाव्यशास्त्रस्य प्रथमस्तथा प्रमुखं विचारकेन्द्रं काव्यशरीरमेव भवति । एतदन्तर्गतं काव्यस्य मौलिकविशेषताया अथवा लक्षणस्यापि विचारो क्रियते। काव्यलक्षणनिरूपणपरम्परा –प्रवाहे धाराद्वयी प्रतीतिपथमवतरति। अत्र एका साऽसीद् यत्र केवलं शब्दस्य काव्यता स्वीकृता,तथा द्वितीयायां शब्दार्थयोः समुदायमादाय काव्यस्य स्वरूताऽङ्गीकृता वर्तते। प्रथमस्य प्रवर्त्तकः आचार्य दण्डि आसीत् । अनेन ईष्टार्थव्यवच्छिन्ना पदावलीत्यत्र काव्यत्वं स्वीकृतम् । शब्दार्थयुग्मवादस्य द्वितीयपरम्पराया प्रवर्त्तकः आचार्य भामह आसीत्। तेन सहितौ शब्दार्थौ काव्यमुक्तम्। भामहस्य सहित शब्दो व्याख्या सापेक्षो वर्तते। अस्य स्पष्टीकरणेन धाराद्वयमजनि । एका साऽस्ति यत्र साहित्यनामकस्य सम्बन्धतत्त्वस्य कल्पना क्रियते । तथा तेन सम्बन्धानां तेषां तत्वानामपि विचारो विधीयते । यानि तत्वानि शब्दात् अर्थाच्च भिन्नानि सन्ति, किन्तु तत्रैवानुस्यूतानि सन्ति । अस्यां धारायां साहित्यशब्दः स्थानं न लभते । अत्र केवलं काव्यशब्दमेव स्थानमाप्नोति। द्वितीयधारायाः प्रवर्त्तकः स्वयमाचार्य आनन्दवर्धनोऽस्ति। अस्माकं

काव्यशास्त्रं वैदिकपरम्परामनुगच्छति । वैदिकदर्शनेऽपि प्रतिपादितं यत् ईश्वरस्य परावस्थायामेव कैवल्यं भवति। व्यवहारदशायां तु पदपदार्थयोः कल्पना जायते। यथा चोक्तमाचार्यमम्मटभट्टेन- **"अखण्ड बुद्धिर्निग्राह्यो वाक्यार्थ एवं वाच्यार्थः वाक्यमेव वाचकम्"** १४ इति येप्याहुः तैरप्यविद्यापदपतितैः पदपदार्थकल्पना कर्त्तव्यैति। सर्वैः दर्शनकारैः ब्रह्मणः एवं तदीयं मायायाः पृथक्- पृथक् फलवत्वमिति स्वीकृतम्। एवमेव तत्परम्परानुसारिभिरस्माभिः शब्दार्थयोः स्वस्वफलवत्वमिति स्वीकृतम्। आर्थीव्यंजनारूपेणार्थस्य एवं शाब्दीव्यंजनामाध्यमेन शब्दस्य फलवत्ता भवति। उक्तं च - शब्दवाचकः सन् वाच्योऽपि भवति। शब्दस्यार्थगतः अर्थस्य शब्दगतः सम्बन्धः तादात्म्यसम्बन्धो भवति। परं चात्र तादात्म्यसम्बन्ध अभेदमूलक एवास्ति, शब्दार्थयोः नित्यसम्बन्धः । महाकवीनां सरणौ कनिष्ठिकाधिष्ठितेन कालिदासेन रघुवंशमहाकाव्यस्य मंगलाचरणे उक्तं यथा- **वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वती परमेश्वरौ।।** १५ पण्डितराजेनाप्युक्तं रसगंगाधरे **-"शब्दार्थयोरनुसन्धानं विना न व्यंजनोल्लासः"**१६ , साहित्यशास्त्रस्य प्राणभूता व्यंजनावृत्तिः। शब्दार्थयोरत्र षष्ठीविभक्तौ एककालावच्छिन्नत्वात् उभयोरनुसन्धानं भवति। वेदपुराणादिकमपि न शब्दमात्रमपितु शब्दार्थमयम्। शब्दार्थयोः काव्यत्वे लोकव्यवहार एव प्रमाणम्। काव्यं श्रुतमिति काव्यं बुद्धमित्यपि व्यवहारात् । अर्थज्ञानपूर्वकमेव शब्दस्य प्रयोगाद् शब्दार्थयोः सहभावो भवति । शब्दार्थयोः सत्यपि काव्यत्वविषये भामहवामनानन्दवर्धनाचार्याऽभिनवगुप्तपादानां प्रामाण्यं स्वीकरणीयमेवोपजीव्यविरोधस्यानौचित्यात् । तस्मात्शब्दार्थयोः काव्यत्वं निर्बाधम् । सूक्ष्मदृष्ट्या काव्यत्वं किम् □ यो धर्मो यस्यावच्छेदकः स तद्धर्माविच्छिन्नः । तथा च लक्ष्यतावच्छेदकं काव्यत्वं चेत् लक्ष्यता काव्यत्वावच्छिन्ना इत्यतः सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यमिति लक्षणम् । आलंकारिकाणां समक्षे

प्रधानो विषयो काव्यस्यात्मनो विवेचनमासीत् । तत्किं वस्तु विद्यते यस्य सत्तायां काव्यत्वं तिष्ठतीति जिज्ञासायां काव्यजीवातुभूततत्त्वविषये मतवैभिन्न्यादेव सम्प्रदायानां स्थापना जाता । सम्प्रदायशब्दस्यार्थः प्रस्थानम् । प्रस्थानम् इति शब्दस्यार्थः आचार्येण अभिनवगुप्तपादेन प्रोक्तं यत् परम्परयो येन मार्गेण व्यवहरन्ति तत्प्रस्थानम् अर्थात् मार्गः । "लोकप्रवृत्तिर्हि भिन्नाः" इति नयेन प्रायशः सम्प्रदायप्रवर्त्तकैः आलंकारिकैः स्वस्वरूच्यनुसारेण काव्यत्वाधायकानि तत्त्वानि वर्णितानि ।

एवं हि साहित्यशास्त्रस्य प्रायः षट् सम्प्रदायाः प्रचलिताः सन्ति । **1 अलंकारसम्प्रदायः 2 वक्रोक्तिसम्प्रदायः 3 रीतिसम्प्रदायः 4 रससम्प्रदायः 5 ध्वनिसम्प्रदायः 6 औचित्यसम्प्रदायः।** आचार्यो वामनः **काव्यं ग्राह्यमलङ्कारात्""सौन्दर्यमलङ्कारा:"** १७ इति मन्यते । भामहमते यः अलङ्करोतीति स अलङ्कारः । रसः चेदन्यमलङ्करोति सोऽपि रसवदलङ्कारः । अतः तेन अलङ्कारा एव काव्यस्य जीवनाधायकतत्त्वरूपेण स्वीकृताः। वामनेन रीतीनां गुणाश्रितत्वं गुणानां च रसधर्मत्वमङ्गीकृत्य काव्यस्यात्मरूपेण रीतिरत्र स्वीकृता । कुन्तकाचार्येणापि कविप्रतिभानिर्वत्यमुक्ति– वैचित्र्यमेव काव्यत्वाधायकं तत्वं स्वीकृतम् । एवमेव आचार्येण क्षेमेन्द्रेण औचित्यं स्वीकृतम्। तन्मते औचित्योपनिबन्धनं विना रसरीतिगुणालङ्कारास्तुच्छा सन्तः काव्यमुपहासास्पदं कुर्वन्ति। काव्ये यत्र रसरीतिगुणालंकाराणामौचित्यपूर्णविधानं भवति तत्रैव रसादिकाः चमत्कारजनकाः भवन्ति । आनन्दवर्धनमते काव्यस्यात्मा ध्वनिरिति । आचार्याणां मतवैभिन्न्याद् समीक्षणधिया निष्कर्षरूपेणेदं वक्तुं शक्यते यत् काव्यस्योत्कर्षकोपकारिणश्च गुणालङ्काररीतयः , दोषाः काव्यस्यापकर्षकाः , काव्यस्याधायकं तत्वं रसः । यथा चोक्तम्-**"काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः**

काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवदिति"।

१८ एवं नाङ्गित्वमलङ्कारादीनाम् अपितु अङ्गत्वमेव सिद्धं भवति । यत्र रसध्वनिर्नास्ति तत्रालङ्कारादीनां प्रयोगोऽपि व्यर्थः । काव्यकलेवरे विशिष्टपदरचनारीतिरपि सर्वत्र रसाद्यात्मनोऽङ्गतया शोभते न काव्यत्वाधायकतया । वक्रोक्तेरलङ्काररूपत्वात् तस्याः गौणत्वं संसाध्य काव्यत्वाधायकत्वं खण्डितम्, यद्यपि क्षेमेन्द्रमते औचित्यं परनिवृत्तिरूपेण स्वीक्रियते तथापि सूक्ष्मपर्यालोचनेन प्रतीयते यत् औचित्यस्योपयोगिताऽङ्गिनो रसादेः साधनतयैवास्ति न तु काव्यत्वाधायकतया । रसतत्त्ववादिनः सहृदयसंवेद्यमुक्ताफलविच्छुरितच्छायाप्रतिमं व्यङ्गयार्थमेव प्राधान्येन परिचिन्तयन्तः तदाधारकं गुणालङ्कारादिजन्यं बाह्यसौन्दर्यमेव व्यवस्थाप्यन्ति । अतः काव्यतत्त्वज्ञाः रस एव हेतुश्चमत्कारोत्पादने नितरां प्रतिष्ठाप्रदं काव्यत्वाधायकं तत्त्वमिति स्वीकुर्वन्ति । अथ कोऽयं रसः? इति जिज्ञासायां काव्यपठनेन श्रवणेन चाभिनयदर्शनेन यादृशानन्दो भवत्यस्मात् एवानन्दो रस इति सार्वजनिकोऽनुभवः । कानि साधनानि सन्ति यानि रसं निष्पादयन्तीति चेत्? **विभावानुभवव्यभिचारिसंयोगाद्रसनिष्पत्तिः"**१९ इति रससूत्रं बहुभिर्व्याख्यातम् । यद्यपि भरतप्रतिपादितं रससूत्रमापाततोऽतीव सुकरमिव प्रतीयते। किन्तु वस्तुस्तथा नास्ति। तत्र सूत्रे संयोगात् इति निष्पत्ति इति च पदयोर्व्याख्यायाम् आचार्येषु मतवैभिन्यं दृश्यते । सहृदयजिज्ञासूनां हृदये सन्देहसन्दोहस्समुत्पद्यते, अतः विविधा व्याख्या विलोक्यते । तत्र प्रमुखा चत्वारो व्याख्याकाराः सन्ति । तद्यथा-

1भट्टलोल्लटेन मीमांसादर्शनमाश्रित्य उत्पत्तिवादः

2श्री शङ्कुकेन न्यायदर्शनमाश्रित्य अनुमितिवादः

3भट्टनायकेन सांख्यदर्शनमाश्रित्य भुक्तिवादः

4 अभिनवगुप्तपादेन वेदान्तदर्शनमाश्रित्य अभिव्यक्तिवादः

अत्रापि चतुर्षु व्याख्याकारेषु अभिनवगुप्तपादस्य मतं रसनिष्पत्त्यनुकूलत्वात् वेदान्तदर्शनमूलत्वात् मनोवैज्ञानिकचिन्तनपरत्वात् यथार्थभावेन रसविश्लेषणाच्च अद्यत्वेऽपि सर्वैः काव्यतत्त्वज्ञैः नीरक्षीरविवेकिभिः गृह्यते प्रशस्यते च । एवं मीमांसान्यायसांख्यवेदान्तादिदर्शनानामपि काव्यशास्त्रे अवदानं दरीदृश्यते। अवदाननिरूपणात् पूर्वं रसविषयकं मतबाहुल्यं सम्प्रेक्ष्य इदं कल्पयितुं शक्यते यल्लोके यथा एकमेव आम्रफलं जनाः स्वस्वरूच्यनुसारेण चूषणक्रियया, त्वचं निस्सार्य, खण्डशः कृत्वा, रसं च निसार्य सेवन्ते तथैव तत्तदाचार्याणां शेमुषिभिर्नानारूपतयाऽवसितोऽपि रस एव हेतुश्चमत्कारोत्पादने नितरां प्रतिष्ठाप्रदं काव्यत्वाधायकं तत्त्वमिति काव्यतत्त्वज्ञाः स्वीकुर्वन्ति ।

सन्दर्भः

1काव्यमीमांसा, पृ0 १–३,

2 काव्यमीमांसा पृ0 ३–५

3 अथर्ववेद १०–८–३२

4 ऋग्वेद ३–१–१७

5 ऋग्वेद१०–६–४३, १–१

6 ऋग्वेद-१०–३–३

7 मन्त्ररामायण – पृ0 सं0 ११४ – १३१ मन्त्रस्य व्याख्या, १-१-०१,०२

8 ऋग्वेद-१०–१९–०५

9 मन्त्ररामायण – पृ0 सं0 १८ – ५ मन्त्रस्य व्याख्या 10

रामतापनीयोपनिषद् ४ खण्ड – १

11 शुक्लयजुर्वेद ३१ अध्याय १९ मन्त्र

12 वाल्मीकि रामायण १-१– १००

13 काव्यालंकार १–२

14 काव्यप्रकाश ५ उल्लास — पृ0 सं0 २५७

15 रघुवंश

16 रसगङ्गाधर २- १३८ पृ0

17 काव्यालङ्कारसूत्र

18 साहित्यदर्पण १–१५ पृ0 सं0

19 नाटयशास्त्र ६-१- ३१ वृत्ति

सन्दर्भग्रन्थसूची -

1 अथर्ववेद: - स्वामी परोपकारिणी सभा अजमेर, 1976

2 काव्यालंकारसूत्रवृतिः आ0 वामनः सम्पादक (कपिल देव गिरि) चौखम्भा संस्कृत संस्थान 1983 3 शुक्लयजुर्वेद संहिता मागरा प्रिटिंग प्रेस दिल्ली 1960 4 ऋग्वेद संहिता चैखम्बा संस्कृत सीरिज ओफिस वाराणसी 1965 5 मन्त्ररामायण नीलकण्ठ चतुर्धर सम्पादक (डा0 प्रभुनाथ द्विवेदि) उत्तरप्रदेश संस्कृत संस्थान लखनऊ 26 जनवरी 1998
6 काव्यमीमांसा राजशेखर: सम्पादक (पं मधुसूदन मिश्र) चौखम्भा संस्कृत सीरिज ओफिस वाराणसी 1934 7 नाट्यशास्त्रम् भरतमुनि: सम्पादक (सुधा रस्तोगि) कृष्णदास अकादमी वाराणसी 1989

8 कालिदासग्रन्थावली कालिदास: सम्पादक (ब्रह्मानन्द त्रिपाठी) चौखम्भा सुरभारती वाराणसी 2005 9 रसगङ्गाधर पं. राजजगन्नाथ: सम्पादक (पं बदरीनाथ झा) चौखम्भा सुरभारती वाराणसी 1955 10 वक्रोक्तिजीवितम् आ० कुन्तक: सुशील कुमार दे द एल्म प्रेस कलकता 1928

11 वाल्मीकिरामायणम् वाल्मीकि गीताप्रेस,

गौरखपुर 2010 12 साहित्यदर्पणम् आ०विश्वनाथ: सम्पादक (शेष राज रेग्मी) चौखम्भा सुरभारती वाराणसी 2001 13 काव्यालंकार: आ० भामह: देवेन्द्रनाथ राष्ट्रभाषा परिषद् पटना 1932 14 ध्वन्यालोक आ० आनन्दवर्धन सम्पादक (आ० जगन्नाथ पाठक) चौखम्भा सुरभारती वाराणसी 2009 15 संस्कृतसाहित्य का इतिहास आ० बलदेव उपाध्याय चौखम्भा सुरभारती वाराणसी 2001 16 रामतापिनीयोपनिषत् परमहंस आनन्दवन सम्पादक (श्री अनन्तराम शास्त्री) सम्पूर्णानन्द संस्कृत विश्वविद्यालय 1999

डा0 गिरीशकुमारः (सहायकाचार्यः)

राजकीय संस्कृत महाविद्यालय क्यारटू शिमला(हि0प्र0)

Dr Girish Kumar Assistant professor

Govt. skt. College Kiartoo SHIMLA (H.P)

Email id – Gs80689@gmail.com

Postal address –

Trikant Niwas Lower Cemetry Sanjauli Shimla

Himachal Pradesh

Pin code – 171006

***

काव्यस्यात्मा चमत्कारः

- मनोज-कुमार-वर्मण:

शोधसारः –

अलङ्कारशास्त्रे शब्दार्थमयस्य काव्यशरीरस्यात्मत्त्वनिरूपणे कृतप्रयत्ना: पण्डिता: ध्वनिरसादीनात्मरूपेणागृह्णत, किन्तु चमत्कारं न केऽपि प्रत्यजानत। नवीनैः कैश्चित्पण्डितप्रवरै: काव्ये **चमत्कारजीवितं** प्रत्यपादि। अयं चमत्कारस्तु काव्यस्य स्थिरतत्त्वम्। अयमलौकिकानन्दजनक: परमब्रह्मरूपश्च।

कुञ्ची-शब्दाः - कूटशब्दा: - चमत्कार:, आत्मा, सार:, सहृदय:, सम्प्रदाय: ।

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयताया:।

(शिशुपालवधम्-४/१७)

लोकोत्तराह्लादजनकशब्दार्थात्मककाव्येऽलौकिकानन्दस्य हेतु: क:? इत्येतद्विषये विवदन्ते विपश्चित:। तेषु केचनालंकारममपरे गुणं, केचिद्रीतिमितरे रसमन्ये ध्वनिं, परे वा वक्रोक्तिं, केचिद्वौचित्यं स्वीकुर्वन्ति।[1] किन्तु एतेषु चमत्काराभिधो न कश्चिद्विशेष: पूर्वपूर्वाचार्यैरुल्लिखित:। परवर्तिसमये विभिन्नै: नवीनैराचार्यै: चमत्कारस्य काव्यात्मत्वं स्वीकृतम्। चमत्कारत्वापरपर्याया रमणीयता। कदाचिद्वा चाकचक्यं[2], चमत्कृतिरपि । काव्यं पठत: सहृदयस्य सङ्कल्पविकल्पात्मके मनसि सम्भावनातीतस्य कस्यचिदर्थस्य सहसाह्लादात्मिक: प्रकाश: चमत्कार:। अयं चमत्कारो रीतिध्वनिरसालङ्काराणां सार:।[3]

विश्वेश्वरकविचन्द्र-विश्वनाथदेव-हरिप्रसाद-वागीश्वरविद्यालंकारादिभिराचार्यैरलंकारशास्त्रे चमत्कारस्य महत्त्वपूर्णं स्थानं प्रदीयते। प्रसिद्धप्रस्थानव्यतिरेकिण: काव्यमार्गस्य चमत्कारस्य तु स्थिति: काव्यशास्त्रे नास्ति, यतो हि रसालंकारध्वनिरीतिवक्रोक्त्यौचित्यानां षण्णां काव्यसम्प्रदायानामेव विदुषां मध्ये प्रसिद्धिर्जाता। एष्वेव काव्यसम्प्रदायेषु तदन्तर्भावो भवितुं शक्नोति। अत एव तस्य स्वतन्त्रा सत्ता नाङ्गीकर्तुं शक्यते। अस्मिन् विषये प्रत्युत्तररूपेण इदं वक्तुं शक्यते यत्- यतो हि चमत्कारपदस्य व्युत्पत्तिप्रवृत्तिनिमित्तका विविधा अर्था लक्ष्यलक्षणानि च दृश्यन्ते, अतोऽस्य सम्प्रदायस्य पृथग् अस्तित्वमवश्यमेव अभ्युपेतव्यम्। वस्तुतस्तु चमत्कारं विना शब्दार्थरूपं काव्यशरीरं निर्जीवं भवति।

---

[1] इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन वा इति त्रयः पक्षाः। आद्योऽपि अलंकारतो गुणतो वेति द्वैविद्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविद्यम्।इति पञ्चसु पक्षेषु आद्य उद्भटाङ्गिभिरङ्गीकृतः द्वितीयो वामनेन तृतीयो वक्रोक्तिजीवितकारेण चतुर्थो भट्टनायकेन पञ्चम आनन्दवर्धनेन।(अलंकारसर्वस्वस्य टीकाकारेण समुद्रबन्धेन लिखितम्, पृ: ४) (Ruyyaka, The Alamkara Sutra of Rajanaka Sri Ruyyaka, Ed. T.Ganapati Shastri, Trivandrum Sanskrit Series No.50, Trivandrum , Authority of the Govt. of His Highness the Maharajah Travancore, p.4)

[2] चमत्करोति य: काव्ये चमत्कार: स उच्यते। चमतोऽपरपर्यायश्चाकचक्यं स्मृतं बुधै:॥(काव्यचमत्कार:, विषयावतरणिका, पृ:२)

[3] रसे सारश्चमत्कारो रीतौ सारश्चमत्कृति:। ध्वनौ सारश्चमत्कृति: सोऽलंकारेऽपि वर्तते॥(काव्यचमत्कार:, विषयावतरणिका,पृ:२)

अस्य चमत्कारस्यार्थ: क:? अस्य व्युत्पत्ति: का? अस्य चमत्कारस्य प्रकृतं स्वरूपं वा किम्? –इति प्रस्तुतेऽस्मिन् प्रबन्धे सामान्येनालोच्यते। रामायणचम्पूकाव्यस्य टीकाकारेण रामचन्द्रेण बुधेन्द्रेण चमत्कारशब्दस्य व्याख्यायां स्पष्टतया लिखितम्-

> "सचमत्कारं चमत्कारसहितं यथा तथा । चमदित्यनुकरणशब्द:। चमत्कारलक्षणं तु 'सुखदु:खाद्भुतानन्दैर्हर्षाद्यैश्चित्तविक्रिया। चमत्कार: ससीत्कार: शरीरोल्लासनादिभि:"इति। [चम्पूरामायणम् (युद्धकाण्डम्), पृ:३४९][4]

राघवेण सरलरूपेणास्य व्याख्या प्रदीयते-

> It appears to me that originally the word camatkāra was an onomatopoeic word referring to the clicking sound we make with the tongue when we taste something delectable, and in the course of its semantic enlargements, camatkāra came to me a sudden fillip to any feeling of a pleasurable type.[5]

आचार्येण रामप्रतापेन तस्य काव्यचमत्कारग्रन्थस्य विषयावतरणिकायां चमत्कारस्य पञ्चविधा व्युत्पत्ति: प्रदर्शिता। चमत्करोतीति चमत्कार:, चमत्+कृ+अण् कर्तरि, अथवा चमत्+कृ+घञ् भावे। रामप्रतापेन प्रदर्शिता पञ्चविधा व्युत्पत्ति: अधस्तात् प्रदीयते-

१. चमत्करोतीति चमत्कार:, कर्तरि प्रयोग:
२. चमत्क्रियते (सामाजिक:) अनेनेति चमत्कार:, कर्मणि करणे च प्रयोग:
३. चमत्करणं चमत्कार:, भावे प्रयोग:
४. चमत्क्रियतेऽसौ चमत्कार:, चमत्कृतार्थ:
५. चमत्कारोऽस्मिन् विद्यते इति चमत्कार:, चमत्कारि काव्यम्, अधिकरणे लाक्षणिक: प्रयोग:।

काव्ये य: चमत्करोति, स चमत्कार:। स: सामाजिकानां चेत:सु काव्यार्थानास्वादयति।[6] अयं चमत्कार: काव्यस्य परमं तत्त्वं, पुनश्च काव्यमपि चमत्कारस्य सार:। तथा हि सहृदयानां सर्वदा काव्ये, काव्यस्य चमत्कारे च प्रवृत्तिर्भवेत्।[7] अयं चमत्कार: परमानन्ददायक:[8], ब्रह्मरूपश्च[9]।

आचार्येण क्षेमेन्द्रेण तस्य औचित्यविचारचर्चायां काव्यस्य प्राणरूपेण औचित्यमुपस्थापितम्। इदमौचित्यं तु चमत्कारकारि। ननु किं चमत्कारकारि? यत् चमत्कारं करोति तत् चमत्कारकारि। चमत्कारिता नाम रमणीयता लोकोत्तराह्लादगतज्ञानगोचरता[10] इति यावत्। चमत्कारस्तु सहृदयानाम्

---

[4] भोजराज:, चम्पूरामायणम्, सम्पा. वावुदेव शर्मा, बोम्बाइ, निर्णय सागर प्रेस, १९१४ (च.सं),पृ: ३४९

[5] Raghavan,V., Studies on Some Concepts of the Alaṃkâra Śâstra, The Adyar Library Series Vol.33, Madras, The Adyar Library and Research Centre, 1973[Revised Ed.], P.294

[6] चमत्करोति य: काव्ये चमत्कार: स उच्यते। आस्वादयति काव्यार्थान् सामाजिकस्य चेतसि।। (काव्यचमत्कार: १/१०४)

[7] काव्यसारश्चमत्कार: काव्यं सारश्चमत्कृते:। तस्मात् काव्ये चमत्कारे भावकानां भवेद्रुचि:॥ (काव्यचमत्कार: १/१०५)

[8] एष एव चमत्कार: परमानन्ददायक:। (काव्यचमत्कार: १/१०७)

[9] ब्रह्मरूपं चमत्कारं नित्यं स्मरति यो नर:। (काव्यचमत्कार: १/१०८)

[10] रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेष:।[Jagannatha, The Rasagangadhara of Jagannatha Pandita, Ed. Pandit Durgaprasad & Kashinath Pandurang Parab, Kavyamala Series No. 12, Bombay, Nirnay Sagar Press, 1888, P.4]

आनन्दविशेष:।[11] कविकण्ठाभरणे क्षेमेन्द्रेणायं चमत्कार आलोच्यते। पञ्चसन्धिषु चमत्कृतिरन्यतमा।[12] चमत्कारं विना कवेर्न कवित्वं, काव्यस्य वा न काव्यत्वं जायते।[13] तथा हि उक्तम्-

एकेन केनचिदनर्घमणिप्रभेण
काव्यं चमत्कृतिपदेन विना सुवर्णम्।
निर्दोषलेशमपि रोहति कस्य चित्ते
लावण्यहीनमिव यौवनमङ्गनानाम्॥ इति।

[कविकण्ठा.३/२]

अतश्चमत्कारजनकस्यौचित्यस्याभावात्काव्यस्य न काव्यत्वम्। क्षेमेन्द्रस्यानया उक्त्या प्रमीयते यत् - क्षेमेन्द्रेण एव प्रथमं चमत्कारस्य बीजमवापि। तन्मतेऽयं चमत्कारो दशविध: -

१. अविचारितरमणीय: २. विचार्यमाणरमणीय: ३. समस्तसूक्तिव्यापी ४. सूक्तैकदेशदृश्य: ५. शब्दगत: ६. अर्थगत: ७. शब्दार्थगत: ८. अलंकारगत: ९. रसगत: १०.प्रख्यातवृत्तिगतश्च

विश्वनाथाचार्येण तस्य साहित्यदर्पणग्रन्थे रसस्य काव्यप्राणत्वं स्वीकृतम्। किन्तु तस्य प्रपितामहेन श्रीमन्नारायणपादेन अस्य रसस्य जीवितत्वेन चमत्कार: स्वीकृत:। तथा ह्युक्तम्- "रसे सारश्चमत्कार: सर्वत्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रस:।" इति।[14] अलंकारकौस्तुभकारोऽपि रसस्य साररूपं चमत्कारं स्वीकरोति।[15]

अग्निपुराणे चैतन्यचमत्काररसानां समता प्रतिपादिता।[16] वक्रोक्तिजीविते बहुश: चमत्कारशब्द उल्लिखित:।[17] आचार्यस्य जगन्नाथस्य रसगङ्गाधरे काव्यलक्षणव्याख्यानसमये चमत्कार: शब्द: उल्लिखित:।[18] काव्यजगत्ययं चमत्कार: लोकोत्तराह्लादं जनयति। अयं तु सहृदयानामानन्दविशेष:।[19] मम्मटाचार्यस्य काव्यप्रकाशे शृङ्गारादिरसानामलौकिकचमत्कारकारित्वं प्रतिपादितम्।[20]

---

[11] सौन्दर्यं च चमत्कृत्याधायकत्वम्। चमत्कृतिरानन्दविशेष: सहृदयहृदयप्रमाणक:। [Jagannatha, The Rasagangadhara of Jagannatha Pandita, Ed. Pandit Durgaprasad & Kashinath Pandurang Parab, Kavyamala Series No. 12, Bombay, Nirnay Sagar Press, 1888, P.157]

[12] तत्राकवे: कवित्वाप्ति:: शिक्षा प्राप्तगिर: कवे:। चमत्कृतिश्च शिक्षाप्तौ गुणदोषोद्गतिस्तत:॥ पश्चात्परिचयप्राप्तिरित्येते पञ्च सन्धय:।[कविकण्ठा.१/३-४]

[13] न हि चमत्कारविरहितस्य कवे: कवित्वं, काव्यस्य वा काव्यत्वम्।[कविण्ठा.,तृतीय: सन्धि:,पृ:१०८]

[14] तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम्। तदाह धर्म्मदत्त: [धर्मस्वग्रन्थे] स्वग्रन्थे – 'रसे सारश्चमत्कार: सर्वत्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रस:॥' [Kane, P.V., The Sâhityadarpaṇa of Viśvanâtha, Bombey, Nirnay Sagar Press, 1923(2nd ed.), Appendix-E, P.1]

[15] रसे सारश्चमत्कारस्तं विना न रसो रस:। तच्चमत्कारसारत्वे सर्वत्रैवाद्भुतो रस:॥ (अलंकारकौस्तुभ: ५/७२)

[16] अक्षरं परमं ब्रह्म सनातनमजं विभुम्। वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्॥ आनन्द: सहजस्तस्य व्यज्यते स कदाचन। व्यक्ति: सा तस्य चैतन्यचमत्काररसाह्वया॥ (अग्निपुराणम्- ३३९/२)

[17] लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।(वक्रोक्तिजीवितम् - १/२), काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।(वक्रोक्तिजीवितम् - १/५), अलौकिकचमत्कारकारि काव्यैकजीवितम्।(वक्रोक्तिजीवितम् - १/५६)

[18] रमणीयार्थप्रतिपादक: शब्द: काव्यम्। रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चाह्लादगत: चमत्कारत्वापरपर्याय: अनुभवसाक्षिको जातिविशेष:। (रसगङ्गाधर:, पृ:४)

[19] सौन्दर्यं च चमत्काराधायकत्वम्। चमत्कृतिरानन्दविशेष: सहृदयहृदयप्रमाणक:। (रसगङ्गाधर:, पृ:१५७)

[20] अलौकिकचमत्कारकारी शृङ्गारादिको रस:। (काव्यप्रकाश:, चतुर्थ उल्लास:)

विश्वेश्वरस्य चमत्कारचन्द्रिकायां विदुषामानन्दस्य कारणरूपेण चमत्कारोऽभिधीयते। चमत्कारस्यास्य सप्तहेतव: खलु गुणरीतिरसवृत्तिपाकशय्यालंकारा:। तथा ह्युक्तम्-

चमत्कारस्तु विदुषामानन्दपरिवाहकृत्।
गुणं रीतिं रसं वृत्तिं पाकं शय्यामलंकृतिम्।
सप्तैतानि चमत्कारकारणं ब्रुवते बुधा:॥[21] इति।

चमत्कारगतदृष्ट्या तेन काव्यस्य त्रिधा भेद: कृत:[22] -१) चमत्कारिकाव्यम् (शब्दचित्रम्) २) चमत्कारितरकाव्यम् (अर्थचित्रं गुणीभूतव्यङ्ग्यम्) ३) चमत्कारितम: (व्यङ्ग्यप्रधानम्)

विश्वेश्वरकविचन्द्रस्य काव्यलक्षणे चमत्कारशब्द: प्राथम्येन अनुप्रविष्ट:। तथा ह्युक्तम्- "वागर्थौ सचमत्कारौ काव्यं काव्यविदो विदु:।" इति। (चमत्कारचन्द्रिका,प्रथम: विलास:)। परवर्तिकाले १७२९ ख्रीस्ताब्दे हरिप्रसादस्य काव्यालोके काव्यस्यात्मा चमत्कृतिरिति प्रतिपादिता।

विशिष्टशब्दरूपस्य काव्यस्यात्मा चमत्कृति:।
उत्पत्तिभूमि: प्रतिभा मनागत्रोपपादितम्॥[23] इति।

चमत्कारवादिनां मते चमत्कार: खलु काव्यस्य आत्मा। अस्मात् चमत्कारादेव अलौकिकानन्द: अभिव्यज्यते। अयं चमत्कारस्तु स्थिरं तत्त्वम्।[24] यत्काव्यं सहृदयहृदये चमत्कारमुत्पादयति, तदेव प्रकृतं ध्वनिकाव्यम्।[25] अत: सुन्दरमौचित्यपूर्णं, चमत्कारसमन्वितं, ललितपदयुक्तं काव्यं सहृदयानां हृदये आनन्दोत्पादकम्।[26] तथा हि प्राचां मते विशिष्टशब्दरूपस्य शब्दार्थमयस्य काव्यस्य वा चमत्कार एव काव्यात्मा।[27] आचार्यस्य रामप्रतापस्य मतेऽपि सुखातिशयहेतुत्वात् चमत्कार एव काव्यस्यात्मा।[28] तस्मात् चमत्कारिकाव्यस्य काव्यत्वम्, अचमत्कारिकाव्यस्य चाकाव्यत्वम्।[29]

आचार्येण रामप्रतापेण स्वाभीप्सितकाव्यलक्षणे चमत्कारादिमद्वाक्यस्य तथा चमत्कारात्मकस्य वाक्यस्य काव्यसंज्ञे स्वीकृते। तथा ह्युक्तम्-

---

[21] Raghavan,V., Studies on Some Concepts of the Alaṃkâra Śâstra, The Adyar Library Series Vol.33, Madras, The Adyar Library and Research Centre, 1973[Revised Ed.], P.295

[22] Viśveśvara classifies poetry into three classes on the basis of the nature of the camatkâra. The three classes are camatkâri (Śabdacitra), camatkâritara (Arthacitra and guṇĭbhûtavyaṅgya), and camatkâritama (Vyaṅgya-pradhâna). [Raghavan,V., Studies on Some Concepts of the Alaṃkâra Śâstra, The Adyar Library Series Vol.33, Madras, The Adyar Library and Research Centre, 1973[Revised Ed.], P.296]

[23] In 1729 A.D. Hariprasâda, son of Mâthuramiśra Gaṅgeśa, wrote his kâvyâloka (Peterson's Third Report Pp.356-7) in seven chapters. He solved the problem of poetry in a straight and simple manner by taking his stand on Çhamatkâra which he called the '*soul* (âtman) of poetry. [Raghavan,V., Studies on Some Concepts of the Alaṃkâra Śâstra, The Adyar Library Series Vol.33, Madras, The Adyar Library and Research Centre, 1973[Revised Ed.], P.296]

[24] विस्मयगर्भश्चमत्कार: स्थिरं काव्यस्य जीवितम्।(काव्यचमत्कार: ५/१२३)

[25] सा सूक्तिर्नु ध्वनिर्यत्र ध्वनिरसौ ध्वनिर्मत:। क्षिप्रं सचेतसश्चित्ते सूते यस्तु चमत्क्रियाम्॥(काव्यचमत्कार: ५/१२६)

[26] औचित्येन समाकीर्णं चमत्कारसमन्वितम्। ललितश्च पदैर्युक्तं काव्यं कस्मै न रोचते॥ (काव्यचमत्कार: ५/१२७)

[27] विशिष्टशब्दरूपस्य वागर्थसहितस्य वा। काव्यस्यायं चमत्कारो बुधैरात्मा प्रकीर्तित:॥ (काव्यचमत्कार: ५/१२९)

[28] भाव्यमाने चमत्कार: सुखातिशयकारणम्। वस्त्वलंकाररूपोऽपि काव्यस्यात्मा मतं मतम्॥(काव्यचमत्कार: ५/१३०)

[29] सचमत्कारकाव्यस्य काव्यत्वमुपपद्यते। अचमत्कारिकाव्यस्य काव्यत्वं नोपपद्यते॥(काव्यचमत्कार: ५/१३१)

चमत्कारादिमद्वाक्यं चमत्कारात्मकं तथा।
आप्लुत: काव्यसंज्ञां द्वे मते स्वीकृते मया॥ (काव्यचमत्कार: - ५/५१)

चमत्कारात्मके काव्ये ध्वनिरीतिरसादय: चमत्कारं व्यञ्जन्ति, अपि च एते चमत्कारस्य अङ्गतां प्रयान्ति।[30] अयं चमत्कार एव काव्यस्यात्मा, अचमत्कारि काव्यं काव्येषु न गण्यते। तथा ह्युक्तम्-

काव्यस्यात्मा चमत्कार: स एव काव्य जीवितम्।
अचमत्कारि काव्यं तु काव्येषु नैव गण्यते॥
(काव्यचमत्कार: - ५/५८)

रसादिभि: साकं चमत्कारस्य द्विविध: कार्यकारणभावरूप: सम्बन्ध: वर्तते। प्रथमं तावच्चमत्कारो रसादीनां कारणं, द्वितीयं तावद्रसादय: चमत्कारस्य कारणम्। प्रथमं मतं साहित्यदर्पणे उद्धृतं[31], द्वितीयं मतं चमत्कारचन्द्रिकायां विश्वश्वरेण कविचन्द्रेण रसादीनां चमत्कारकारणत्वं निरूपितम्।[32]

परिशेषे वक्तुं शक्यते यत्काव्ये रसादय: तिष्ठन्तु, वा न तिष्ठन्तु, तत्र चमत्कारस्थितिरावश्यिकी। किन्तु चमत्कारवादिन: रसरीत्यादीन् विहाय चमत्कारतत्त्वं व्याख्यातुमशक्ता:। पुनश्च रसादीनामौचित्याभावाच्चमत्कारोऽपि न जायते। चमत्कारस्य स्वतन्त्रा सत्ता अङ्गभूतानां गुणालङ्कारादीनामभावात् कथं जायते?- इति विद्वद्भिर्विचार्यम्। ध्वनिरसौचित्यादयस्तु काव्यस्य चमत्कारधर्मा:। अत: पृथक्तया चमत्कारस्वीकारे का युक्तिति चिन्तनीयम्। यद्यपि तत्त्वमिदं सम्पूर्णं नवीनं, तथापि समीक्षकाणां भूयस्या आलोचनाया आवश्यकता वर्तते। सामान्येयमालोचना दिङ्मात्रेण प्रदर्शितेति शम्।

सहायका ग्रन्था:

१. क्षेमेन्द्र:, २०१३, औचित्यविचारचर्चा (श्रीमोहनझाशास्त्रिणा कृता प्रभाटीकासमेता), सम्पा. श्रीव्रजमोहनझा, विद्याभवनसंस्कृतग्रन्थमाला-११८, वाराणसी, चौखम्बा विद्याभवन
२. क्षेमेन्द्र:, १९३३, औचित्यविचारचर्चा, सम्पा. ढुण्ढिराजशास्त्री, हरिदास संस्कृतग्रन्थमाला-२५,वनारस सिटी, चौखम्बा संस्कृत सीरिज अफिस
३. क्षेमेन्द्र:, १९३३, कविकण्ठाभरणम्, सम्पा. ढुण्ढिराजशास्त्री, हरिदास संस्कृतग्रन्थमाला-२४,वनारस सिटी, चौखम्बा संस्कृत सीरिज अफिस
४. जगन्नाथ:, २०२० (विक्रमसंवत्), रसगङ्गाधर: (प्रथमो भाग:), मधुसूदनीटीका, सम्पा. मधुसूदनशास्त्री, बनारस:, काशी हिन्दु विश्वविद्यालय:
५.द्वैपायनमुनि:, १९००, अग्निपुराणम्, सम्पा. आनन्दाश्रमस्थपण्डिता:, आनन्दाश्रमसंस्कृतग्रन्थावलिग्रन्थाङ्क: -४१, आनन्दाश्रम:, आनन्दाश्रममुद्रणालय:
६. भोजराज:, १९१४ (च.सं), चम्पूरामायणम्, सम्पा. वसुदेवशर्मा, मुम्बाइ, निर्णयसागरमुद्रणालय:,
७. रामप्रताप:, २००२, काव्यचमत्कार:, जम्मू, हाइब्रो पाब्लिकेशन्

---

30 चमत्कारत्मके काव्ये ध्वनिरीतिरसादय:। व्यञ्जन्तीमं चमत्कारं प्रयान्ति च तदङ्गताम्॥(काव्यचमत्कार: ५/५७)

31 साहित्यदर्पण:-३/३

32 गुणं रीतिं रसं वृत्तिं पाकं शय्यामलंकृतिम्। सप्तैतानि चमत्कारकारणं ब्रुवते बुधा:॥(चमत्कारचन्दिका, प्रथमो विलास:)

८. Amarasimha, 1913, The Nāmaliṅgānuśāsana (Amarakosha), Ed. Krishnaji Govind Oka, Poona, Law Printing Press

९. Anandavardhana, 1953, The Dhvanyāloka of Ānandavardhanāchārya, Ed. Pt. Srisobhit Mishra, The Haridas Sanskrit series No.66, Banaras, The Chowkhamba Sanskrit Series Office

१०. Apte, 1963, Vaman Shivram, The Student's Sanskrit-English Dictionary, Delhi, Sri Jainendra Press

११. Dr. Raghavan, V., 1963, Bhoja's Śṛṅgāra Prakāśa, Madras, The Theosophical Society

१२. Kane, P.V., 1923 (2nd ed.), The Sāhityadarpaṇa of Viśvanātha, Bombay, Nirnay Sagar Press

Manoj Kumar Barman,
(मनोज-कुमार-वर्मण:)
(Assistant Professor)
Shahid Matangini Hazra Govt. College for Women,
(Chakshrikrishnapur, Kulberia, Purba Medinipur, PIN-721649, WB)
E-mail: barman.manoj86@gmail.com

Residential Address:
Vill- Chandipur, P.O. - Math Chandipur,
Dist. - Purba Medinipur, PIN-721659, W.B.

***

काश्मीरस्थ स्तोत्रों में प्रतिपादित दर्शन, संस्कृति एवं उपासना पद्धति

- रमेश चन्द्र नैलवाल

शोध सार-

ऐतिहासिक तथा साहित्यिक दृष्टि द्वादशशताब्दी तक काश्मीर प्रदेश विविध संस्कृतियों और धार्मिक सम्प्रदायों का केन्द्र था। परन्तु धीरे-धीरे इस्लाम मत के आगमन से यह संस्कृति विनष्ट हो गई। संस्कृत कवियों द्वारा विविध स्तोत्र रचे गये, तथापि परवर्ती कवियों पर भी इसका प्रभाव देखा जाता है । इस समय काश्मीर भक्ति साहित्य को छः प्रकार बाटा जा सकता है – १. प्रकीर्ण २. प्रबन्ध ३. शास्त्रवर्णी/स्तोत्र रूप में उपस्थापित शास्त्रग्रन्थ ४. संकीर्ण ५. शिवपरकाख्यान और कृतियाँ, ६. मङ्गलाचरण।भक्तिमत काश्मीर में प्राचीनकाल से ही प्राप्त होता है, नीलमत पुराण में भक्ति के विषय में स्तोत्र इत्यादियों के कीर्तन का उल्लेख प्राप्त होता है। सर्वप्रथम उत्पलदेव के ‘शिवस्तोत्रावली’ नामक स्तोत्र में भक्ति का स्वरूप प्रदर्शित होता है, पुनः इसके ही समकाल में भट्टनारायण ने ‘ स्तवचिन्तामणि’ नामक स्तोत्र की रचना की, जो शैवभक्ति का सर्वोत्तम उदाहरण है।‘शिवो भूत्वा शिवं यजेत्’ ऐसाआम्नाय में कहा गया है, यहाँ देहपात की ही शिवता स्वीकार की है। परन्तु काश्मीर स्तोत्रों में इसके विपरीत ‘भक्त’ का ही महत्त्व है, उत्पल के मत में ‘भक्तो भूत्वा शिवं यजेत्’ यही समीचीन है, क्योंकि परमेश्वर का पारमार्थिक सारभूत शरीर भक्ति से अद्वैतशोधित होता है। अतः भक्तिदर्शन का अपना वैशिष्ट्य है। उनके मत में भक्त से भगवान् की अद्वैतसिद्धि के लिए सभी युक्तियाँ साधन ही हैं। प्राय स्तोत्र स्तुति प्रधान होते हैं, तथापि वहाँ दार्शनिक तत्त्वों का उल्लेख, उपासना पद्धति का निर्देश और संस्कृति का बोध भी बहुधा प्राप्त होता है। काश्मीर स्तोत्रों में भी शैवदर्शन विविध तत्त्वों और शैव, वैष्णव संस्कृति सर्वथा दृष्टिगोचर होती है।

कुञ्जी शब्द – काश्मीरस्थ स्तोत्र, दर्शन, संस्कृति एवं उपासना ।

‘शिवो भूत्वा शिवं यजेत्’ ऐसा आम्नाय में कहा गया है, यहाँ देहपात को ही शिवता स्वीकार की है। परन्तु काश्मीर स्तोत्रों में इसके विपरीत ‘भक्त’ का ही महत्त्व है, उत्पल के मत में ‘भक्तो भूत्वा शिवं यजेत्’ यही समीचीन है, क्योंकि परमेश्वर का पारमार्थिक सारभूत शरीर भक्ति से अद्वैतशोधित होता है। अतः भक्ति दर्शन का अपना वैशिष्ट्य है। उनके मत में भक्त से भगवान् की अद्वैतसिद्धि के लिए सभी युक्तियाँ साधन ही हैं। प्राय स्तोत्र स्तुति प्रधान होते हैं, तथापि वहाँ दार्शनिक तत्त्वों का उल्लेख, उपासना पद्धति का निर्देश और संस्कृति का

बोध भी बहुधा प्राप्त होता है। काश्मीर स्तोत्रों में भी शैवदर्शन विविध तत्त्वों और शैव, वैष्णव संस्कृति सर्वथा दृष्टिगोचर होती है।

दर्शन –

काश्मीरप्रदेश प्राचीनकाल से ही शैवदर्शन का प्रमुख केन्द्र रहा है। दर्शनानुसार में यह विश्व शिवमय है, अतः जीव भी शिव ही है। शिव आनन्दावस्था में सृष्टि का सृजन करता है[1], अतः सृष्टि अवस्था में सर्वशक्ति युक्त शिव ही अपनी मायाशक्ति से सङ्कुचित होकर 'जीव' कहा जाता है। अतः किञ्चित्कर्तृत्व युक्त जीव के सर्वकर्तृत्व सिद्धि के लिए विविध मार्ग शैवदर्शन में कहे गये हैं, उन मार्गों में मोक्षप्राप्ति एवं स्वरूप साक्षात्कार हेतु भक्ति भी साधनरूप है। शिवस्तोत्रावली के प्रथमश्लोक में भक्ति का वैशिष्ट्य बताते हुए उसकी अनुपाय के रूप में सिद्धि करते हैं । जिसको बिना ध्यान तथा बिना जप के विधिरहित रुप से अर्थात् ईश्वर के अनुग्रह से ही शिवात्मा प्रभु का प्रकाश प्राप्त हो उस भक्तिशाली की हम स्तुति करते हैं[2]। श्रीमद्भगवद्गीता में भी कहा गया है कि – जो श्रद्धायुक्त होकर अनवरत परमेश्वर को भजता है, वही उत्तम योगी है[3]। अतः भक्ति अनुपाय रूप होने से साध्य ही है ऐसा प्रधान रूप से काश्मीरस्थ स्तोत्रों में प्राप्त होता है। काश्मीरस्थ स्तोत्र साहित्य भक्ति के साथ दार्शनिक तत्त्वों से भी युक्त है। प्रायः आचार्यों ने दार्शनिक सिद्धान्तों के आधार पर ही स्तुति की है। जिनमें शैवदर्शन के विविध सिद्धान्त और तत्त्व स्पष्टरूप दृष्टिगोचर होते हैं।

परमशिव (परमतत्त्व) –

शिवस्तोत्रावली में परमतत्त्व के रूप में परमशिव की स्तुति है, इस प्रकार उत्पलदेव ने साक्षात्कार युक्त परमशिव की अनुभूति इसमें वर्णित की है। उत्पलदेव काश्मीर शैवदर्शन के प्रमुख आचार्य है, अत एव इनकी यह रचना भी शैवदर्शन के विविध सिद्धान्तों से युक्त है । काश्मीर दर्शन अद्वयवादी दर्शन है, यहाँ शक्तितत्त्व युक्त परमशिव की ही अन्तिम सत्ता है। समस्त विश्व परमशिव की अभिव्यक्ति ही है। अपनी स्वातन्त्र्य शक्ति से परमशिव स्वयं अपने में ही विविध रूप से आभासित होते हैं। यह अवस्था 'प्रकाशविमर्शमय' कहलाती है। परमतत्त्व शिव और शक्ति का अभेद है, दोनों का तादात्म्य वह्नि और दाहकता के समान नित्य है, इनका व्यतिरेक सर्वदा असम्भव है[4]। काश्मीरस्थ स्तोत्रों में उपास्य परमशिव है, जो

---

[1] आनन्दोच्छलिता शक्तिः सृजयात्मानमात्मनः ॥ प्रत्यभिज्ञाहृदय (अनु०- जयदेवसिंह, भूमिकायां उद्धृतः) पृ० १०

[2] न ध्यायतो न जपतः स्याद्यस्याविधिपूर्वकम् । एवमेव शिवाभासस्तं नुमः भक्तिशालिनम् ॥ *शिवस्तोत्रावली* १/१

[3] मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते युक्ततमा मताः ॥ *श्रीमद्भगवद्गीता* २/१२

[4] शक्तिश्च शक्तिमद्रूपाद्व्यतिरेकं न वाञ्छति । तादात्म्यमनयोर्नित्यं वह्निदाहतयोरिव ॥ बिम्बप्रतिबिम्बवाद ३

अद्वितीय[5], सदसन्मय[6], सभी पुरुषों का आश्रयरूप[7], त्रिभुवन नाथ[8] और भक्तिप्रिय[9] इत्यादि विविध विशेषणों से स्तुत्य है।

परमशिव के ऐश्वर्य और विविध शक्ति के कारण विविध नाम हैं। उनमें नाथ, ईश, भगवान्, विभु, प्रभु, शम्भु, शिव इत्यादि प्रमुख हैं। समस्त विश्व के नियन्ता और स्वामी होने से 'नाथ' कहे जाते हैं[10]। योगशास्त्र के अनुसार क्लेश, कर्म, विपाक और आशय से वियुक्त ईश्वर कहलाता है, अत एव शैवस्तोत्रों में इन गुणों से युक्त परमशिव 'ईश्वर' कहलाता है[11]। धनसम्पत्ति में ऐश्वर्य के कारण वह 'भगवान्' कहलाता है[12]। सर्वव्यापक, चिरस्थायी और सुदृढ़शक्ति वाला होने से वह 'विभु' कहलाता है[13]। अनुग्रह निग्रह इत्यादि कार्यों में समर्थ होने से 'प्रभु' नाम से सुप्रसिद्ध है[14]। इस प्रकार शान्ति प्रदायक और सुखस्वरूप होने से वह ' शम्भु'[15] और 'शिव'[16] नाम प्रसिद्ध है। परमानन्द के व्याख्यान करते हुए संसार के विविध भौतिक सुखों का अनित्यत्व सिद्ध करते है, परमसुख का आनन्द न तो धन के मद के समान और न ही अङ्गना के आलिङ्गन के समान है। और दीपक, सूर्य, चन्द्र इत्यादि के प्रकाश के समान कोई प्रकाश भी वह नही है, अपितु विस्मृत-निधि के प्राप्ति के समान अद्वैत परमशिव का परमानन्द होता है[17]। अतः विस्मृत स्वरूप के विज्ञान होने पर जो आनन्दं होता है, वैसा अखण्ड आनन्द अन्यत्र दुर्लभ है । अतः प्रत्यभिज्ञा ही श्रेयस्कर है।

---

5 उपहासैकसारेऽस्मिन्नेतावति जगत्त्रये । तुभ्यमेवाद्वितीयाय नमो नित्यसुखासिने ॥ *शिवस्तोत्रावली* २/१८

6 सतोऽवश्यं परमसत्सञ्च तस्मात्परं प्रभो । त्वं चासतस्सतश्चान्यस्तेनासि सदसन्मयः ॥ *शिवस्तोत्रावली* ३/१८

7 उत्तमः पुरुषोऽन्योऽस्ति युष्मच्छेषविशेषितः । त्वं महापुरुषत्वेको निःशेषपुरुषाश्रयः ॥ *शिवस्तोत्रावली* ३/१४

8 दासस्य मे प्रसीदतु भगवानेतावदेव ननु याचे । दाता त्रिभुवननाथो यस्य न तन्मादृशां दृशो विषयः ॥ *शिवस्तोत्रावली* १९/१५

9 त्वं भक्त्या प्रीयसे भक्तिः प्रीते त्वयि च नाथ यत् । तदन्योन्याश्रयं युक्तं यथा वेत्थ त्वमेव तत् ॥ *शिवस्तोत्रावली* १६/२१

10 एषा पेशलिमा नाथ तवैव किल दृश्यते । विश्वेश्वरोऽपि भृत्यैर्यदर्च्यसे यश्च लभ्यसे ॥ *शिवस्तोत्रावली* १७/४५

11 ता एव परमर्थ्यन्ते सम्पदः सद्भिरीश याः । त्वद्भक्तिरससम्भोगविस्रम्भपरिपोषिकाः ॥ *शिवस्तोत्रावली* १/२३

12 समुल्लसन्तु भगवन् भवद्भानुमरीचयः । विकसत्वेष यावन्मे हृत्पद्मः पूजनाय ते ॥ *शिवस्तोत्रावली* ५/८

13 सर्व एव भवल्लाभहेतुर्भक्तिमतां विभो । संविन्मार्गोऽयमाह्लाददुःखमोहैस्त्रिधा स्थितः ॥ *शिवस्तोत्रावली* १/१०

14 प्रहर्षाद्वाथ शोकाद्वा यदि कुड्याद्घटादपि । बाह्यादथान्तराद्भावात्प्रकटीभव मे प्रभो ॥ *शिवस्तोत्रावली* ९/१७

15 पशुजसमानवृत्तामवधूय दशामिमां कदा शम्भो । आस्वादयेय तावकभक्तोचितमात्मनो रूपम् ॥ *शिवस्तोत्रावली* ९/१७

16 शिव शिवेति नामानि तव निरवधि नाथ जप्यमानेऽस्मिन् । आस्वादयन् भवेयं कमपि महारसमपुनरुक्तम् ॥ *शिवस्तोत्रावली* ५/२३

17 आनन्दोऽत्र न वित्तमद्यमदवन्नैवाङ्गनासङ्गवत्, दीपार्केन्दुकृतप्रभाप्रकरवत् नैव प्रकाशोदयः ।

शिव और शक्ति का अभेद –

काश्मीर शैवदर्शन अन्य दर्शनों से पृथक् है। न तो यहाँ वेदान्त के समान अद्वैत है, न तो शून्य अपितु अन्य ही कुछ है। शिव और शक्ति का एकत्त्व अद्वय रूप ही यहाँ परमतत्त्व है। दोनों का तादात्म्य सम्बन्ध है, शिव ही सृजन अवस्था में क्रिया में स्थित होकर शक्ति कहलाता है। उपासना में यद्यपि शिव और शक्ति के दो रूप है, तथापि मूल रूप से दोनों एक ही हैं। उत्पलदेव शिव और शक्ति के अद्वय की उपासना करते हुए कहते हैं कि – जिस क्षेत्र में आप देवी सहित नित्य प्रमुदित होकर सर्वदा निवास करते हैं, वही मैं भी निवास करूँ[18]। अतः उत्पल ने अद्वययुक्त शिव के शिवशक्ति से समन्वित परमशिव रूप की अर्चना शिवस्तोत्रावली में की है।

परमशिव का निर्गुणत्व –

शिवस्तोत्रावली में भगवान् के सगुणरूप भी प्राप्त होता है, यद्यपि शैवदर्शन अद्वयवादी दर्शन है, तथापि भक्ति के सन्दर्भ में भक्त परमशिव के कल्पित स्वरूप की स्तुति करता है। भक्त उस प्रकाश स्वरूप को देखते हुए कहता है कि – परमानन्द से युक्त आपकी कान्ति मुझे समाधि अवस्था के प्रकाश के समान प्रकाशित प्रतीत होती है, यदि वह कान्ति व्युत्थानदशा में भी नित्य उदित हो तो मैं विधिवत् आपकी ही पूजा करूँगा[19]। भक्त को परमेश्वर का सगुण आकार सर्वदा अभिलषित है, वह सर्वदा परमात्मा का सान्निध्य चाहता है। अत एव भक्त कहता है कि – सगुण अथवा निर्गुण जो कुछ भी आप हैं, परन्तु समावेश भक्तियुक्त भक्त के लिए व्युत्थान दशा में भी आप सुधामय ही है[20]।

परमशिव का निर्गुणत्व –

काश्मीर स्तोत्रों में प्रमातृभेद से परमेश्वर के विविध स्वरूप प्राप्त होते हैं। जैसे अनेकत्र उसके सगुणरूप की बाह्य उपायों से अर्चना प्राप्त होती है, वैसे ही साम्भवा अवस्था में स्थित साधक का अनुभव इससे पृथक् ही है । वहाँ परमेश्वर का निर्गुणरूप ही प्रधान है, अत एव भक्त बाह्यपूजा का निषेध करते हुए कहता है कि – उसके नामस्मरण से जिह्वा श्रान्त और

हर्षः सम्भृतभेदमुक्तिसुखभूर्भारावतारोपमः, सर्वाद्वैतपदस्य विस्मृतनिधेः प्राप्तिः प्रकाशोदयः ॥ *अनुत्तराष्टिका* ४

[18] यत्र देवीसमेतस्त्वमासौधादा च गोपुरात् । बहुरूपः स्थितस्तस्मिन्वास्तव्यः स्यामहं पुरे ॥ *अनुत्तराष्टिका* ५/७

[19] नाथ विद्युदिव भाति विभाते या कदाचन ममामृतदिग्धा । *शिवस्तोत्रावली* ४/८

[20] साकारो वा निराकारो वान्तर्वा बहिरेव वा । भक्तिमत्तात्मनां नाथ सर्वथासि सुधामयः ॥ *शिवस्तोत्रावली* १६/२२

मन खिन्न हो गया, परन्तु उसकी प्राप्ति नही हुई, क्योंकि कैसे इसके अरूप का ध्यान और निर्गुण का नाम सम्भव है? उसी प्रकार पूर्ण का आवाहन कैसा? नित्य स्वच्छ के लिए पाद्य-अर्घ्य और आचमन इत्यादि का क्या प्रयोजन[21]? निर्मल के लिए स्नान, जिसके उदर में विश्व समाहित है उसका वस्त्र से क्या, रमणीय के लिए गन्ध, अलङ्कार इत्यादि की क्या आवश्यकता? इसी प्रकार निरालम्बन के लिए यज्ञोपवीत, निर्गन्ध के लिए पुष्प, प्राणरहित के लिए धूप और चक्षु हीन के लिए दीपक से क्या लाभ? नित्य तृप्त का नैवेद्य से, सर्वव्यापक का ताम्बूल से, अनन्त का प्रदक्षिणा से और अद्वितीय के लिए नमन से क्या लाभ[22]?

जो स्वयं प्रकाश स्वरूप है उसका दीपक से क्या, निर्विकल्प रूप परमेश्वर का स्तोत्र से प्रयोजन क्या? अन्तर और बाह्य रूप से पूर्ण के लिए विसर्जन से क्या लाभ? सर्वत्र भेदरहित के लिए बाह्ययज्ञ से क्या[23]? भैरवस्तोत्र में इसका उल्लेख प्राप्त होता है, भक्त कहता है कि – व्रत, दान, स्नान, तप इत्यादि संसार के दुःख दूर करते हैं, यह तो सत्य ही है, परन्तु आपके विषय में चर्चा करने वाले शास्त्ररूपी परामृत की चिन्ता चित्त में शान्ति की धारा बहाती है[24]। अतः शैवस्तोत्रों में परमेश्वर के सगुण एवं निर्गुण दोनों रूपों का वर्णन है।

सृष्टि –

शैवदर्शन में सृष्टि छत्तीस तत्वों से युक्त है, वह सृष्टि परमशिव की आनन्दावस्था का बहिर्प्रकाशन रूप है। परमशिव स्वातन्त्र्य शक्ति से युक्त है, उसे किसी अन्य तत्त्व की आवश्यकता नही है। वह रसोल्लास युक्त होकर स्वेच्छा से अपने स्वरूप में भेद स्थापित करता है, अतः सृष्टि परमेश्वर की आनन्दावस्था का प्रसरण है। परमेश्वर का यह स्वातन्त्र्य 'अनर्घ' कहलाता है[25]। वह परमशिव स्वात्मा में ही सृष्टि और संहार का प्रवर्तक है, जैसे निर्मलदर्पण में नगर, भूमि, जल इत्यादि पृथग्भाव से रहित होने पर भी पृथक् अवभासित होते हैं, वैसे ही चित्तत्त्व परमशिव विश्वव्याप्त छत्तीस पदार्थों से पृथक् न होकर भी पृथक् ही प्रतीत होते हैं[26]। काश्मीर शैवदर्शन के अनुसार समस्त सृष्टि के मूल में शक्तितत्त्व है। उसकी

---

21 पूर्णस्यावाहनं कुत्र सर्वाधाराय चासनम् । स्वच्छस्य पाद्यमर्घ्यश्च शुद्धस्याचमनं कुतः ॥ *महोपविंशतिका* १ ३

22 नित्यतृप्तस्य नैवेद्यं ताम्बूलं च कुतो विभोः। प्रदक्षिणामनन्तस्याऽद्वितीयस्य कुतो नतिः ॥ *महोपविंशतिका* १६

23 अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् । भेदहीनस्य विश्वत्र कथं च हवनं भवेत् ॥ *महोपविंशतिका* १८

24 शङ्कर सत्यमिदं व्रतदानस्नानतपो भवतापविदारि । तावकशास्त्रपरामृतचिन्ता स्यन्दति चेतसि निर्वृतिधारम् ॥ *भैरव स्तोत्र* ८

25 अमुष्मात् सम्पूर्णात् वत रसमहोल्लाससरसान्निजां शक्तिं भेदं गमयसि निजेच्छाप्रसरतः । अनर्घं स्वातन्त्र्यं तव...... । क्रमस्तोत्र १२

26 निर्मल मुकुरे यद्वद्भान्ति भूमिजलादयः । अमिश्रास्तद्वदेकस्मिंश्चिन्नाथे विश्ववृत्तयः ॥ *बिम्बप्रतिबिम्बवाद* ४

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

अभिव्यक्ति के अनेक कारण हैं। सृष्टि, स्थिति और संहार में परमशिव शक्ति के विना प्रवर्तित नही होता है। अतः शक्ति को छोड़कर लोकयात्रा प्रवर्तित होती है[27]। यहाँ उत्पल ने शिव और शक्ति का अभिन्नत्व प्रदर्शित कर दोनों की जगत्कारणता सिद्ध की है।

सृष्टि की अभिव्यक्ति और प्रलय शिव और शक्ति के 'प्रकाश-विमर्शमय' स्वरूप का प्रसार और सङ्कोच है। शैवदर्शन में छत्तीस तत्त्व सृष्टिक्रम में क्रमशः ही एव शिव से प्रारम्भ होकर पृथिवी पर्यन्त छत्तीस तत्त्वों का क्रम है। इस विषय में उत्पलदेव ने कहा है कि मैं छत्तीस त्तत्त्वों का के से युक्त काय, वाणी और चित्त के कर्मों से परमेश्वर की अर्चना सदा करता हूँ। अतः उत्पलदेव छत्तीस त्तत्त्वों के कर्म द्वारा परमशिव सर्वदा पूजते हैं[28]। ये छत्तीस त्तत्त्वों का समावेश युक्त भक्ति में उल्लसित है, अत एव वह भक्त पूजा महोत्सव विलक्षण ही है, जहाँ इन छत्तीस त्तत्त्वों का समन्वय होता है[29]।

प्रत्यभिज्ञा –

शैवदर्शन में प्रत्यभिज्ञा ही मुक्ति है, अर्थात् अपने स्वरूप का अनुसन्धान ही प्रत्यभिज्ञा है। भक्ति का यह विलक्षण लक्षण शङ्कराचार्य ने विवेकचूडामणि में दिया है। परिच्छिन्नता को छोड़कर नित्य, शुद्ध और व्यापक स्वभाव का ज्ञान ही प्रत्यभिज्ञा है। अभिनव के मत में पूर्व में अननुभूत अविच्छिन्न रूप से स्वात्मा का अवभास ही प्रत्यभिज्ञा है[30]। काश्मीर स्तोत्रों मे भी भक्तकवि विस्मृत अपने स्वरूप की ही आकाङ्क्षा करता है। उनके मत में इस संसार में आनन्द न वित्तप्राप्ति के मद के समान, न स्त्री समागम के समान है और न ही उस आनन्द में दीप, सूर्य, चन्द्र इत्यादि के प्रकाश के समान कोई प्रकाश है, अपितु भेदरहित सुख ही यहाँ प्राप्त होता है। अत एव विस्मृत निधि के प्राप्ति के समान अद्वैततत्त्व का आनन्द होता है[31]। अर्थात् ज्ञान के परिमित होने से परिच्छिन्न प्रमाता अपना स्वरूपज्ञान होने पर अपरिच्छिन्न और व्यापक होता है, वही प्रत्यभिज्ञा है।

अज्ञान –

---

27 जय त्रैलोक्यसर्गेच्छावसरासद्वितीयकः। जयैश्वर्यभरोद्वाहदेवीमात्रसहायकः॥ *बिम्बप्रतिबिम्बवाद* १३/१३

28 त्वद्धाम्नि चिन्मये स्थित्वा षट्त्रिंशत्तत्त्वकर्मभिः। कायवाक्चित्तचेष्टादयैरर्चये त्वां सदा विभो॥ *बिम्बप्रतिबिम्बवाद* १७/११

29 कोऽप्यसौ जयति स्वामिन्भवत्पूजामहोत्सवः। षट्त्रिंशतोऽपि तत्त्वानां क्षोभो यत्रोल्लसन्त्यलम्॥ *बिम्बप्रतिबिम्बवाद* १७/३०

30 प्रतीपमात्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा। *ईश्वरप्रत्यभिज्ञाविमर्शिणी* (अनु. कृष्णानन्दसागरः) पृ० १२

31 आनन्दोऽत्र न वित्तमद्यमदवन्नैवाङ्गनासङ्गवत्, दीपार्केन्दुकृतप्रभाप्रकरवत् नैव प्रकाशोदयः।
हर्षः संभृतभेदमुक्तिसुखभूर्भारावतारोपमः, सर्वाद्वैतपदस्य विस्मृतनिधेः प्राप्तिः प्रकाशोदयः॥ *अनुत्तराष्टिका* ४

अज्ञान शब्द के विविध दर्शनों में विविध स्वरूप है। नैयायिकों के मत में ज्ञानाभाव ऐसा अभाव अर्थ में नञ् समास है, वेदान्तियों के मत में ज्ञान से अभिन्न और उसके समान इस व्युत्पत्ति से सादृश्य अर्थ में नञ्समास है। शैवदर्शन में मल अज्ञान कहा गया है और सङ्कुचित ज्ञान ही अज्ञान है, इस प्रकार ईषदर्थ में यहाँ नञ्समास है। अतः ज्ञानसङ्कोच ही मल है[32]। ये मल आणव, मायीव और कार्म भेद से तीन प्रकार के हैं। आणव मल में जीव अपने स्वरूप के अपूर्णता का अवभास करता है, मायीव में भेद बुद्धि होती है तथा कार्ममल में शुभाशुभ वासनाओं का प्रादुर्भाव होता है। इन मलों के उल्लेख करते हुए उत्पलदेव कहते हैं कि – तीनों मलों का प्रतिरोधक शास्त्र और योगी बहुत हैं, तथापि विशेषतः भगवत्भक्त ही सुखी स्वस्थ और पण्डित होते हैं[33]। अपनी मायाशक्ति के कारण परमशिव ही 'पशु' कहलाता है। माया के पञ्च कञ्चुकों से विरहित जीव की प्रंशसा करते हुए उत्पलदेव कहते हैं कि – माया सम्बन्धी विद्या, राग, काल, कला और नियति नामक पञ्च कञ्चुकों से रहित और तृप्त जीव इस जगत् में सुखपूर्वक रहता है और पूर्णताभाव को सर्वथा प्राप्त करता है[34]।

शक्तिपात –

शैवागमों में शक्तिपात सिद्धान्त महत्त्वपूर्ण है, विविध आगमों में इसका उल्लेख प्राप्त होता है। मृगेन्द्र आगम के अनुसार जब तक जीव के चैतन्यरोधक मल निवृत्त नही होते हैं, तब तक अनुग्रह की प्रवृत्ति सम्भव नही है, अतः मलनिवृत्ति होने पर शक्तिपात होता है। जब तक तमशक्ति का अधिकार रहता है, तब तक अनुग्रह सम्भव नही है[35]। परमशिव की शक्तिपात अवस्था का महत्त्व कहते हुए भक्त कहता है कि – ईश्वर शक्तिपात के समय भक्त की पात्रता का विचार भी नही करता है, अर्थात् भक्त के ऊपर विश्वस्त भाव से अविचारपूर्वक ही अपना अनुग्रह प्रदान करता है। यही शक्तिपात का वैशिष्ट्य है[36]। प्रायः शक्तिपात में भगवान् का अनुग्रह ही प्रधान होता है, अत एव शक्तिपात प्राप्त भक्त विस्मयपूर्वक कहता है कि – जो अज्ञात भक्तिरस मुझे सहसा ही प्राप्त हुआ है, वह रस सर्वदा

---

32 अज्ञानमिति न ज्ञानाभावश्चातिप्रसङ्गतः । स हि लोष्टादिकेऽप्यस्ति न तस्यास्ति संसृतिः ।
अतो ज्ञेयस्य तत्त्वस्य सामस्त्येनाप्रथात्मकम् । ज्ञानमेव तदज्ञानं शिवसूत्रेषु भाषितम् ॥ तन्त्रालोक १/२५-२६

33 त्रिमलक्षालिनो ग्रन्थाः सन्ति तत्पारगास्तथा ।
योगिनः पण्डिताः स्वस्थास्त्वद्भक्ता एव तत्त्वतः ॥ *शिवस्तोत्रावली* १५/१

34 मायीयकालनियतिरागाद्याहारतर्पिता । चरन्ति सुखिनो नाथ भक्तिमन्तो जगत्तटे ॥ *शिवस्तोत्रावली* १५/१

35 तमः शक्त्यधिकारस्य निवृत्तेस्तत् परिच्युतौ । व्यनक्ति दृक् क्रियानन्त्यं जगद्बन्धुरणो शिवः ॥
मृ.आ., *तान्त्रिक साधना और सिद्धान्त*, उद्धृत् पृ० १००

36 शक्तिपातसमये विचारणं प्राप्तमीश न करोषि कर्हिचित् ॥ *शिवस्तोत्रावली* १३/११

मुझे परिपुष्ट करता है[37]। भगवान् के अनुग्रह से भक्त भी सर्वदा विस्मय युक्त दिखाई देता है। शैवस्तोत्रों का वैशिष्ट्य है कि यहाँ भक्त के लिए कोई विशेष योग्यता आवश्यक नही है। परमशिव लोक में गर्हितों में भी अपना अनुग्रह बहुधा अर्पित करते हैं। अत एव भक्त कहता है कि – हे चराचर पिता! लोक में निन्दित भी आपके भक्ति से बहुधा युक्त होते हैं[38]। अत शैव भक्ति परम्परा में शक्तिपात सिद्धान्त का महत्त्व पूर्णत्व सार्थक परिलक्षित होता है।

संस्कृति –

ऐतिहासिक दृष्टि से प्राचीन काल से काश्मीर प्रदेश विविध संस्कृतियों का केन्द्र था। जहाँ शैव, वैष्णव, शाक्त, बौद्ध और जैन इत्यादि प्रमुख हैं। नीलमत पुराण के अनुसार काश्मीर प्रदेश देवी उमा का स्वरूप है[39], इसका उल्लेख करते हुए राजतरङ्गिणीकार कल्हण कहते हैं कि – काश्मीर प्रदेश पार्वती का स्वरूप है, यहाँ के राजा शिव के वंशज हैं, अत एव विद्वानों के द्वारा पूजनीय है[40]। इस प्रकार काश्मीर में प्राधान्य रूप से शैवमत का प्राधान्य था। प्रायः प्राचीन काल से ही यहाँ के राजा धार्मिक थे । सभी राजाओं द्वारा विविध देवालयों, मूर्तियों, शिवलिङ्गों, स्तूपों और बौद्ध विहारों निर्माण तथा शैवमत प्रचार विशेष रूप से किया । जैसी संस्कृति भारतवर्ष के अन्यक्षेत्रों में थी, वैसी ही स्थिति काश्मीर में भी प्राप्त होती है।

सन्धिमति नामक राजा प्रतिदिन शिवमन्दिरों में जाकर निर्मलजल से प्रक्षालित शिवलिङ्ग का दर्शन करता था, किसी दिन कारणवशात् दर्शन न होने पर प्रायश्चित्त के अनुसार सहस्र शिवलिङ्गों की प्रतिष्ठा करता था[41]। शिवभक्त इस राजा ने अनेक शिवमन्दिर शिवलिङ्ग और त्रिशूल निर्माण कर सम्पूर्ण क्षेत्र में शैवमत का प्रसार किया[42]। राजा ललितादित्य के शासन काल अनेक धार्मिक कार्य हुए, उनके विषय कल्हण ने कहा है कि – उस समय कोई भी ऐसा स्थान नही था, जहाँ देवमन्दिरों और पूजास्थलों का निर्माण नही हुआ हो[43]। इसी प्रकार राजतरङ्गिणी में वर्णव्यवस्था, पुनर्जन्म, उत्सवप्रियता (दीपोत्सव, शिवरात्रि) चित्रकला, वास्तुकला, स्थापत्यकला और आतिथ्य शीलता का उल्लेख प्राप्त होता है। उस समय काश्मीर प्रदेश में बौद्धधर्म के प्रचार होने से यज्ञीय हिंसा का निषेध प्राप्त होता

---

[37] यथैवाज्ञातपूर्वोऽयं भवद्भक्तिरसो मम । घाटितस्तद्वदीशान स एव परिपुष्यतु ॥ *शिवस्तोत्रावली* १६/५

[38] चराचरपितः स्वामिन् अप्यन्धा अपि कुष्ठिनः । शोभन्ते परमुद्दामभवद्भक्तिविभूषणाः ॥ *शिवस्तोत्रावली* १५/७

[39] यैषा दैवी उमा सैव कश्मीरा नृपसत्तम । *नीलमत.पुराण* ३१

[40] कश्मीराः पार्वती तत्र राजा ज्ञेयो हरांशजः । नावज्ञेयः स दुष्टोऽपि विदुषा भूतिमिच्छता ॥ *राजतरङ्गिणी* १/७२

[41] शिवलिङ्गसहस्रस्य प्रतिष्ठाकर्मणि प्रभोः । प्रतिज्ञा प्रत्यहं तस्य नाभूद्विघटिता क्वचित् ॥ *राजतरङ्गिणी* २/१२८

[42] अकरोत्स महाहर्म्यैर्महालिङ्गैर्महावृषैः । महात्रिशूलैर्महतीं महामाहेश्वरो महीम् ॥ *राजतरङ्गिणी* २/१३३

[43] न तत्पुरं न स ग्रामो न सा सिन्धुर्न सोऽर्णवः । न स द्वीपोऽस्ति यत्रासौ प्रतिष्ठां न विनिर्ममे ॥ *राजतरङ्गिणी ३/३७२*

है, अतः इससे ज्ञात होता है कि उस समय वहाँ यज्ञीय हिंसा प्रचलित थी। मेघवाहन ने हिंसककर्म में युक्त मनुष्यों को जीविका हेतु धन देकर तथा यज्ञों में घृतपशु और पिष्टपशु भूतबलि हेतु प्रयोग करवाएँ[44]। कश्मीर में प्राचीन काल से ही स्तोत्रों एवं पुराणों का वाचन एवं कीर्तन होता है, इसका उल्लेख नीलमतपुराण में मिलता है[45]।

काश्मीर प्रदेश में शिवरात्रिपर्व महत्वपूर्ण था। उत्पल ने भी अपने स्तोत्र में इस उत्सव का उल्लेख किया है। उत्पल के मत में जिस अवस्था में प्राणमय भगवान् सूर्य चन्द्र प्रभृति तारागणों के साथ अस्त होता है तो अपनी कान्ति से भास्वर स्वरूप 'शिवरात्रि' अद्भुत होती है। यहाँ समस्त मायीयप्रथा के संहार से रात्रि के समान शिवसमावेश भूमि शिवरात्रि कही गयी है[46]। परन्तु राजतरङ्गिणी में इसका धार्मिक उत्सव के रूप में उल्लेख है, जो एक विशेष रात्रि कही जाती है। शिवस्तोत्रावली में विविध प्रकारिका पूजापद्धति प्राप्त होती है। जिसमें कायिक, वाचिक और मानसिक पूजा प्रमुख है। भारतवर्ष के अन्यक्षेत्र के समान बाह्यपूजा इन स्तोत्रों में उपलब्ध होती है। ललितादित्य का शासन काल अभिनवगुप्त के समकाल स्वीकार किया जाता है, इससे ज्ञात होता है कि – दशमशताब्दी में काश्मीर में शैवभक्ति और संस्कृति का बृहद् रूप में विस्तृत प्रभाव परिलक्षित होता है ।

उपासनापद्धति –

स्तोत्र प्रायः भक्तिभावना से युक्त से होते हैं, अतः उनका उपास्य भी सगुण होना चाहिए। अत एव काश्मीर स्तोत्रों में परमशिव के सगुणरूप का वर्णन भी प्राप्त होता है, क्योंकि भक्ति तो द्वैतयुक्त ही होती है। अद्वैतवादी आचार्य शङ्कर ने भी अपने स्तोत्रों में परमेश्वर की उपासना के लिए ब्रह्म का सगुण रूप स्वीकार किया है। उनके मत में निर्गुण ब्रह्म भी सगुण उपासना के लिए नाम, रूप इत्यादि गुणों से युक्त होता है[47]। शङ्करमत में भक्तरूप साधक के अनुग्रह के लिए ही परमेश्वर मायामय स्वरूप धारण करता है[48]। काश्मीरस्थ स्तोत्रों में अपने अभीष्ट परमेश्वर की प्राप्ति के लिए तान्त्रिक दर्शन के उपाय प्रमुखता से कहे गये हैं। मुक्ति और मुक्तिसाधन तान्त्रिक ग्रन्थों में अन्य मतों की अपेक्षा विलक्षण है। विविध मलावरणों से सयुंक्त जीव के मलापनयन हेतु तान्त्रिकमत में न तो ज्ञान ही उपयुक्त है, न ही कर्म अपितु क्रिया ही उपयुक्त है।

---

[44] तस्य राज्ये जिनस्येव मारविद्वेषिणः प्रभोः । क्रतौ घृतपशुः पिष्टपशुर्भूतबलावभूत् ॥ *राजतरङ्गिणी* ३/७

[45] गीतैनृत्तैस्तथावाद्यैर्ब्रह्मघोषैस्तथैव च। वीणापटहशब्दैश्च पुराणानाञ्च वाचनैः।
तत्कथाश्रवणैस्चान्यैस्तथा स्तोत्रप्रकीर्तनैः॥ *राजतरङ्गिणी* ४१२-४१३

[46] यत्र सोऽस्तमयमेति विवस्वाँश्चन्द्रमः प्रभृतिभिः सह सर्वैः ।
कापि सा विजयते शिवरात्रिः स्वप्रभाप्रसरभास्वररूपा ॥ *शिवस्तोत्रावली* ४/२२

[47] निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यत....... । *ब्रह्म सूत्र शांकर भाष्य* १/२/१४

[48] अत्र ब्रूमः स्यात्परमेश्वरस्यापरिच्छावशान्मायारूपं साधकानुग्रहार्थम् । *ब्रह्म सूत्र शांकर भाष्य* १/१/२०

मल का पाक धीरे-धीरे होता है, अत एव जब तक मल परिपक्व नही होते हैं, तब तक उनका अपसरण भी सम्भव नही है। जीव का कोई भी यत्न नही है, जिससे इसका अपरसरण हो। ज्ञान, तप इत्यादि भी इसमें असमर्थ है, क्योंकि तीक्ष्ण तलवार भी अपना कर्तन स्वयं करने में सक्षम नही होती है। मल निवृत्ति का साधन केवल परमेश्वर का अनुग्रह ही है, जो शक्तिपात शब्द से कहा जाता है। शिव के अनुग्रह से जीव संसार से विमुक्त होकर शिवत्व लाभ करता है[49]। वह अनुग्रह शक्ति 'दीक्षा' कही जाती है। दीक्षातत्त्व तन्त्र का गूढरहस्य है, अत एव त्रिकदर्शन में भी प्रत्यभिज्ञा के लिए दीक्षा की आवश्यकता होती है। अतः बाह्यपूजा का वहाँ कोई प्रयोजन नही है। उत्पल के मत में उच्चार, करण, ध्यान इत्यादि के तिरस्कार से प्रयत्न सम्पन्न (परमेश्वर का अनुग्रह) चित्स्वरूप परमेश्वर का स्पर्शनोत्सव समावेश ही भक्तों की पूजाविधि है[50]। अतः भक्तिदर्शन में प्रायः दीक्षा (शक्तिपात) का वैशिष्ट्य है। यद्यपि विविध शास्त्रों और आगमों में परमेश्वर के प्राप्ति के उपाय बहुत हैं, ये ज्ञान, योग इत्यादि के द्वारा भी परमशिव प्राप्य है, तथा जप इत्यादि द्वारा नाम ग्रहण से सर्वज्ञत्व, सर्वकर्तृत्व, सर्वशक्तिमयत्व आदि विविध विशेषणों से सङ्कुचित भी ज्ञात होता है, 'सर्वसिद्धिवाचः क्षयेरन्' इस नियम से। तथापि भक्त के लिए वह निरन्तर चिद्रूप परमार्थ तत्त्व अवभासित होता है। भक्त के लिए परमतत्त्व की सिद्धि में कौन साधन नही बनते, अपितु सभी साधन उपयोगी होते हैं। इसके विपरीत निकृष्ट के लिए वही साधन ही आवरण बन जाते हैं[51], शरीर एवं इन्द्रियों के नियन्त्रण से भगवत्प्राप्ति सहायता होती है, तथा इसके विपरीत मनुष्य भौतिक सुखों की प्राप्ति हेतु इन इन्द्रियों का प्रयोग करता है। यद्यपि योगियों के द्वारा प्रत्याहार इत्यादि के द्वारा समाधि अवस्था में परमपद की प्राप्ति की जाती है, परन्तु भक्त न केवल समाधि दशा में, अपितु व्युत्थानदशा में भी परमपद का लाभ प्राप्त करता है।

अनुपाय -

शैवदर्शन के अनुसार इस संसार में कुछ भी असत् नही है, अपितु सारा विश्व सत् रूप है। अभिनवगुप्त 'अनुत्तराष्टिका' नामक स्तोत्र में इस संसार के बाह्याडम्बरों ध्यान, जप, धारणा, भावना इत्यादि की परमसत्यता को खण्डित करते हुए कहते हैं कि – इस संसार में न तो संक्रमण है (देहान्तर प्राप्ति), न ही कथा, युक्ति, चर्चा, भावना, ध्यान, धारणा, जप,

---

[49] दीयते ज्ञान सद्भावः, क्षीयते पशुभावना। दानक्षपण संयुक्ता दीक्षा तेनेह कीर्तिता॥

तान्त्रिक साधना और सिद्धान्त, उद्धृत् पृ० १००

[50] ध्यानायासतिरस्कारसिद्धस्त्वत्स्पर्शनोत्सवः। पूजाविधिरिति ख्यातो भक्तानां स सदास्तु मे॥ *शिवस्तोत्रावली* १७/४

[51] भक्तानां भवदद्वैतसिद्ध्यै का नोपपत्तयः। तदसिद्ध्यै निकृष्टाना कानि नावरणानि वा॥ *शिवस्तोत्रावली* १/१५

अभ्यास इत्यादियों का प्रयोग अन्तिम सुख ही है, अपितु अपने स्वरूप में पूर्ण रूप से स्थित होकर संसार का भोग ही परमसुख है[52]। अभिनवगुप्त के अनुसार उपासना, उपास्य और उपासक भेद अनुत्तरतत्त्व के विषय में नही है, अनुत्तरतत्त्व में कोई भी भेद नही है । माया भी उसी परम तत्त्व की शक्ति ही है, वह भी परमतत्त्व से भिन्न नही है। सभी तत्त्व अपने स्वभाव से ही निर्मल है, अतः इस विषय में व्यर्थ चिन्ता उचित नही है। अनुपाय में शिष्य गुरु के अनुग्रह से, दृष्टिपात मात्र से, हस्त-स्पर्श, गुरु के हाथ से दिए गए भोज्यपदार्थ से तथा अन्यकारणों के विना एवं योगाभ्यास शिवभाव का समावेश प्राप्त करता है[53]।

समावेश के पुनः पुनः अभ्यास से शिवभाव सुदृढ़ होकर सांसारिक जगत् में निरन्तर शिवभाव का विमर्श प्राप्त करवाता है। इस प्रकार का समावेश अनुपाय समावेश के रूप में शैवशास्त्रों में कहा गया है[54]। अनुपाय से ही जीव जीवन मुक्ति को प्राप्त करता है। अनुपाय ही शैवशास्त्रों में आनन्दोपाय कहलाता है। शैवागमों में यह अनुपाय शिव का अनुग्रह कहा गया है, यहाँ भक्त की विविध अवस्थाएँ हैं, जिस जीव को शिव का अनुग्रह नही प्राप्त होता है, उसके लिए आणव, शाक्त एवं शाम्भव ये तीन उपाय कहे गये हैं। ये क्रमशः जीव के शारीरिक एवं मानसिक इच्छा शक्ति के अनुरूप ही होते हैं।

उपाय -

शैव शास्त्रों में उपाय क्रम का उल्लेख प्रमाता के वैशिष्ट्य से है। जो प्रमाता जिस मल से आवृत्त होता है, उसके लिए उस प्रकार का उपाय बताया गया है। इस प्रकार मुख्यतः तीन उपाय और तीन मल कहे गये हैं। यद्यपि भक्ति तो अनुपाय रूप है, तथापि उसके विविध स्तर हैं। अतः भक्तिमार्ग उपाय और अनुपाय युक्त काश्मीर स्तोत्रों में प्राप्त होता है। भेदनिष्ठ जीव के लिए पूजा उपाय रूप है। अत एव उत्पलदेव ने कहा है कि – भेदनिष्ठ मनुष्यों के लिए पूजा परमपद प्राप्ति का उपाय है, परन्तु समावेश युक्त भक्त के लिए वह पूजा केवल ऐकात्म्य रूप निवृत्ति का विकास ही है। अतः मायीय मल से युक्त जीव के लिए ही वह पूजा उपाय रूप है[55]। उपाय की चर्चा करते हुए उत्पलदेव कहते हैं कि – परमशिव प्राप्ति शास्त्रविहित क्रम से होती है, क्रमशः उपाय मार्ग से शिवलाभ किया जाता है, तब सर्व विशेषण युक्त परमेश्वर भक्तियुक्तों के लिए शुद्धरूप में अवभासित होता है। उत्पल के मत में मलत्रय रहित ही भक्त कहा जाता है। तथा वह माया के पञ्चकञ्चुकों से भी रहित होता है। प्रायः जहाँ उत्पल ने ध्यान, जप, योग इत्यादि का निषेध किया है, वह निषेध सापेक्ष युक्त है। साम्भवावस्था में

---

52 *अनुत्तराष्टिका* १

53 *तन्त्रालोक,* आ. २ पृ० २

54 *तन्त्रालोक,* आह्निक. २ पृ० ३

55 उपचारपदं पूजा केषाञ्चित्तत्पदाप्तये । भक्तानां भवदैकात्म्यनिर्वृत्तिप्रसरस्तु सः ॥ *शिवस्तोत्रावली* १७/४०

उन साधनों की साधकता सिद्ध नही है, परन्तु शाक्तोपाय और आणवोपाय में ये साधन कहे जाते हैं। क्योंकि शाक्तोपाय के क्रम में जब साधक विकल्पों का संस्कार करता है, तब सत्तर्क, सदागम, सद्गुरूपदेश का उपयोग होता है[56]। शैवमत में साधना क्रम में शुद्धविद्या के प्रकाशरूप होने से सत्तर्क के बिना अन्य योगाङ्ग साक्षात् उपाय नही होते हैं, प्रत्याहार भी कारणभूमि में सातिशयता प्राप्त कराता है, उसी प्रकार ध्यान, धारणा और समाधि के यथोत्तर अभ्यास से ध्याता का ध्येय वस्तु से तादात्म्य लाभ कराते हैं[57]। उत्पल के मत परमेश्वर के वैसे भक्त धन्य है जिनके पूजा के कुसुम इत्यादि उपकरण भक्तिपीयूष जल से पूज्य हो जाते हैं[58]। काश्मीर स्तोत्रों में परमेश्वर के बाह्य उपायों से ध्यान, जप, पुष्प इत्यादि से की गयी पूजा कामधेनु के समान स्वीकार की जाती है। जैसे कामधेनु अभीष्ट अर्थों को पूर्ण करती है, उसी प्रकार पूजा भी फलदायिका कही गयी है। उत्पल ने उस पूजा को सुधा धारा से भी अधिक रसयुक्त स्वीकार किया है[59]। अतः परमेश्वर लाभ में बाह्यपूजा फलयुक्ता होती है।

शिवस्तोत्रावली में समाधि का सङ्केत भी प्राप्त होता है। उनके मत में समाधि योगियों के द्वारा बन्द आंखों से जाग्रत, स्वप्न और सुषुप्ति अवस्था का त्याग करके (संसार रूप सभा का उल्लङ्घन करके) तुरीया अवस्था में परमेश्वर का आलिङ्गन किया जाता है। इसके विपरीत भक्ति के अनुभव से युक्त तत्त्वज्ञों द्वारा खुले नेत्रों द्वारा संसार रूप सभा के मध्य में ही ध्यान, उच्चार इत्यादि के द्वारा अनायास ही गाढानुराग अनुभव किया जाता है[60]। शिवस्तोत्रावली में विविधागमों की दृष्टि से परमेश्वर की उपासना का सङ्केत प्राप्त होता है। उत्पल के मत में परमशिव की उपासना के विविध मार्ग हैं। जिसमें भैरवतन्त्र में अविपरीत अनुष्ठान से (दक्षिणमार्ग), वादितन्त्र में विपरीत क्रम से (वाममार्ग), श्रीमतादिशास्त्र में सभी आचारों से (दक्षिण एवं वाममार्ग द्वारा) और निराचार से (ध्यान, जप इत्यादि द्वारा अप्राप्य) परमशिव भक्तों द्वारा पूजा जाता है[61]। इस प्रकार काश्मीर स्तोत्रों में प्रमाता की त्रिविध

---

[56] तत्र यदा विकल्पं क्रमेण संस्कुरुते समनन्तरोक्तस्वरूपप्रवेशाय, तदा भावनाक्रमस्य सत्तर्क-सदागम सद्गुरूपदेशपूर्वकस्य अस्ति उपयोगः । *तन्त्रसार,* चतुर्थ आह्निकः, पृ० ९१

[57] न च अत्र सत्तर्कात् शुद्धविद्याप्रकाशरूपात् ऋते अन्यत् योगाङ्गं साक्षात् उपायः.......... प्रत्याहारोऽपि कारणभूमिमेव सातिशयां कुर्यात्, ध्यानधारणासमाधयोऽपि यथोत्तरम् अभ्यासक्रमेण निर्वर्त्यमाना ध्येयवस्तुतादात्म्यं ध्यातुः वितरेयुः ॥ *तत्रैव,* चतुर्थ आह्निकः, पृ० १०६

[58] नमस्तेभ्यो विभो येषां भक्तिपीयूषवारिणा । पूज्यान्येव भवन्ति त्वत्पूजोपकरणान्यपि ॥ *शिवस्तोत्रावली* १७/३१

[59] पूजां केचन मन्यन्ते धेनुं कामदुघामिव । सुधाधाराधिकरसां धयन्त्यन्तर्मुखाः परे ॥ *शिवस्तोत्रावली* १७/३७

[60] संसारसदसो बाह्ये कैशिचित्त्वं परिरभ्यसे । स्वामिन्परैस्तु तत्रैव ताम्यद्भिस्त्यक्तयन्त्रणैः ॥ *शिवस्तोत्रावली* १६/२८

[61] दक्षिणाचारसाराय वामाचाराभिलाषिणे । सर्वाचाराय शर्वाय निराचाराय ते नमः ॥ *शिवस्तोत्रावली* २/१९

अवस्था का उल्लेख प्राप्त होता है। प्रायः अनुपाय का आधिक्य प्राप्त होता है, तथापि ध्यान, जप, अर्चन, स्मरण, पादसेवन इत्यादि उपासनाएँ भी साधन कही गयी है। यहाँ परमेश्वर सगुण रूप में पूजा जाता है। शैवदर्शन अद्वयवादी दर्शन है, परन्तु यहाँ भक्ति अवस्था में कल्पित द्वैतावस्था होती है, जो अद्वैततत्त्व से भी अधिक विशिष्ट है, ऐसा शैवाचार्यों का मत है।

सन्दर्भ ग्रन्थ सूची –

अभिनगुप्त. अभिनवस्तोत्रावली (सं०- शशिशेखर चतुर्वेदी). वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११.

..................शैवाद्वयविंशतिका (सं०- जनार्दन पाण्डेय). नई दिल्ली : श्रीलालबहादुरशास्त्रिराष्ट्रिय-सस्कृतविद्यापीठ (मानितविश्वविद्यालय), १९९७.

देव, उत्पल. शिवस्तोत्रावली (सं./अनु. – लक्ष्मण जू महाराज) दिल्ली : ईश्वर-आश्रम ट्रस्ट, २०००.

कविराज, कविराज. *तान्त्रिक साधना और सिद्धान्त* (अनु०- हंसकुमार तिवारी). पटना : बिहार राष्ट्रभाषा-परिषद्, २००९.

कविराज, कविराज. *भारतीय साधना की धारा* (अनु०- हंसकुमार तिवारी). तृतीय संस्करण. पटना : बिहार राष्ट्रभाषा-परिषद्, २००७.

रमेश चन्द्र नैलवाल

Ramesh Chandra Nailwal

शोधच्छात्र, जवाहरलालनेहरूविश्वविद्यालय, नई दिल्ली 110067

Rameshnailwal2035@gmail.com

***

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

केवलान्वयिपरिशीलनम्

- डा. दिवाकरमहान्तिः

शोधसारः –

अस्मिन् निबन्धे न्यायदर्शनानुसारं तर्कसंग्रहः तथा तस्य टीकाग्रन्थानधिकृत्य केवलान्वयिप्रमेयस्य विचारविमर्शः क्रियते ।

कुञ्ची-शब्दाः – अन्वयव्याप्तिः,केवलान्वयित्वं, आधेयता, प्रकारता, विशेष्यता ।

न्यायशास्त्रे अस्य प्रमेयस्य विचारः अनुमितिकरणं यदनुमानं[1] तस्य अनुमानप्रमाणस्य विचारावसरे क्रियते । बुद्धिः,[2] ज्ञानस्य नामान्तरम् इति नैयायिकाः अनुमन्यन्ते ।तल्लक्षणतु सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभश्च। संस्कारमात्रजन्यज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः। [3] तदनुभवः द्विविधः, यथार्थायथार्थेति । [4] तेषां मते अस्य यथार्थानुभवस्य प्रमेति नामान्तरं, तस्य स्वरूपञ्च तद्वति तत्प्रकारकोऽनुभवो यथार्थानुभवः इति । अस्य वाक्यस्य अयं अर्थः भवति- तन्निष्ठः आधेयता निरूपितः अधिकरणतावन्निष्ठः, तन्निष्ठः प्रकारता निरूपकं ज्ञानं यथार्थानुभवः इति । अतः तन्निष्ठः आधेयता-निरूपक-अधिकरणतावन्निष्ठः विशेष्यता निरूपकः तन्निष्ठः प्रकारता निरूपकत्वे सति, ज्ञानत्वं यथार्थानुभवस्य लक्षणम् । यथा- 'इदं रजतम्' इति ज्ञानम् । [5] इत्युक्ते रजतत्वनिष्ठाधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारता-

---

[1] Tarkasaṁgraha (TS) of Annabhatta p. 34


[2] TS p 21

[3] Ibid

[4] TS p. 23

[5] TS p. 23.

निरूपकत्वे सति ज्ञानत्वम् । अत्र यथावत् वस्तुतन्त्रं तथावदेव पुरूषतन्त्रं वर्तते । अतः अयम् अनुभवः यथार्थानुभवः इति । अस्य चित्ररूपम् एवं प्रकारेण कर्तुं शक्यते-



अस्य यथार्थानुभवस्य प्रत्यक्षानुमित्युपमितिशब्दभेदेन चत्वारः भेदाः वर्तन्ते इति नैयायिकैः स्वीकृतम् ।[6] परन्तु परम्परायां अस्य यथार्थानुभवस्य भेदविषये वैमत्यं दृश्यते । तथाहि चार्वाकानुसारेण प्रत्यक्षमेव यथार्थानुभवः । तथैव काणादा बौद्धाश्च प्रत्यक्षानुमिती द्वे इति । प्रत्यक्षानुमित्युपमितिशब्दार्थपतयः इति प्राभाकराः । प्रत्यक्षानुमित्युपमिति-शब्दार्थपत्त्यनुपलब्धयः इति भाट्टमीमांसकाः वेदान्तिनश्च । प्रत्यक्षानुमिति-शब्दार्थपत्त्यनुपलब्धिसम्भवैतिह्यानीति पौराणिकाः । तथा चेष्टासहिताष्टकमिति तान्त्रिकाः

[6] TS 24

स्वीकुर्वन्ति । परन्तु एतेषां सर्वेषां चतुर्विधेष्वेव यथार्थानुभवेष्वेवान्तर्भाव इति नैयायिकानामभिप्रायः।

अतः तेषां चतुर्विधानां प्रमानां करणमपि प्रत्यक्षानुमानोपमानशब्दभेदेन चतुर्विधम् इति तर्कसंग्रहकारः आचार्यान्नभट्टेनोक्तम् ।[7] तेषु चतुर्विधेषु प्रमाणेषु अनुमानस्य महत्प्राधान्यं वर्तते न्यायाशास्त्रे । अतः अस्य शास्त्रस्य नामान्तरमपि "आन्विक्षीकि" इति यत्वर्तते तत्तु अस्यानुमानस्य प्राधान्येन एव । अत एव न्यायमञ्जरीकारः जयन्तभट्टेन कथितं यत् "प्रत्यक्षागमाभ्यामीक्षितस्याऽन्वीक्षणमन्वीक्षा अनुमानमित्यर्थः । तद्व्युत्पादकं शास्त्रमान्वीक्षिकमिति ।[8] तस्यानुमानप्रमाणस्य भेदद्वयं वर्तते, स्वार्थं परार्थञ्चेति ।[9] यथा "पर्वतो वह्निमान् धूमात् इत्यत्र" यत्र प्रमाता स्वयमेव धूमाग्न्योः साधनसाध्यरूपयोर्भूयः साहचर्यदर्शनेन यत्र यत्र धूमस्तत्रतत्र वह्निरिति महानसादिषु व्याप्तिं गृहीत्वा, कालान्तरेण यदा पर्वते धूमं पश्यति तदा यत्र यत्र धूमस्तत्रवह्निरिति व्याप्तिं स्मरति । ततश्च वह्निव्याप्यधूमवानयं पर्वत इति लिङ्गपरामर्शरूपं ज्ञानं तस्योत्पद्यते । ततः पर्वतो वह्निमानित्यनुमितिर्जायते । अत्र स्वयं प्रमाता स्वीयसंशयनिवर्तयितुं हेतुना साध्यमनुमिनोति, अतः एतत्स्वार्थानुमानम् । परन्तु यत्र प्रमाता स्वयं हेतुना साध्यमनुमाय परस्याप्यनुमानज्ञानाय प्रतिज्ञाहेतूदाहरणोपनयनिगमनं पञ्चावयवयुक्तं वाक्यं प्रयुज्यते तत्परार्थानुमानमिति ।[10]

तत्र पञ्चावयववाक्ये यद्धेतुर्वर्तते तत् व्याप्तिबलेन[11] लीनमर्थं नाम परोक्षभूतं वह्न्यादिकं यत्साध्यं वर्तते तद्गमयतीति लिङ्गम् इत्युच्यते । तत्तु त्रिविधमिति

---

[7] Ibid

[8] Nyāyamañjarī of Jayantiabhatta, Ed. By….. 1st Chapter p.…

[9] TS p. 37

[10] Ibid

[11] हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः। Tarkasaṁgraha Dīpikā on TS of Annabhatta, Ed. By Y. V. Athalye and M. R. Bodas, published by Bhandarkar Oriental Research Institute (BORI), Pune, 1930, p.35

तर्कसंग्रहकारेणोक्तम्- लिङ्गं त्रिविधम्, अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति ।[12]

तत्रान्वयव्याप्तिः तथा च व्यतिरेकव्याप्तिः यस्मिन्हेतौ वर्तते तदन्वयव्यतिरेकीति । अन्वयव्याप्तिर्नाम व्यापकसामानाधिकरण्यरूपमिति न्यायबोधिनीकारः गोवर्धनमिश्रेणोक्तम् ।[13]तत्र व्यापको नाम तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम् । यथा पर्वतो वह्निमान् धूमादित्यत्र वह्निः व्यापको तथा च धूमः व्याप्यो वर्तते । अतः तत्पदेन धूमः, तदधिकरणं महानसः, तत्रवृत्त्यन्ताभावः पदेन वह्निर्नास्तीत्यभावः ग्रहीतुं न शक्यते तत्र वह्नेः सत्त्वात्, परन्तु उदासीनाभावः घटाभावः ग्रहीतुं शक्यते । यस्याभावः सः प्रतियोगी । अतः घटाभावस्य प्रतियोगी घटः, प्रतियोगिता घटे वर्तते, अप्रतियोगी वह्निः । अतः तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम् वह्नौ वर्तते इति कृत्वा वह्निः व्यापकः । सामानाधिकरण्यं नाम तदधिकरणवृत्तित्वम् । अत्र तत् पदेन व्यापकीभूतः यत्साध्यं नाम तदधिकरणवृत्त्यत्यन्ताभावः अप्रतियोगित्वरूपः यत्साध्यं, यथा अस्मिनुदाहरणे वह्निः, तदधिकरणं पर्वतः तत्र धूमः वर्तते इति कृत्वा तदधिकरणवृत्त्यत्यन्ताभावः अप्रतियोगिसाध्यसामानाधिकरण्यं हेतौ नाम धूमे सत्त्वात् धूमः अन्वयव्याप्तिमत् इति । तत्तु तर्कसंग्रहकारेण संक्षिप्ततया यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वव्याप्तिः इति उक्तम् ।[14] नाम साध्यसाधनयोः व्याप्तिरन्वयः व्याप्तिः इति ।

व्यतिरेको नामाभावः, तयोः साध्याभावहेत्वाभावयोः यत्व्याप्तिः तत् व्यतिरेकव्याप्तिः इति । तल्लक्षणं तु साध्याभावव्यापकीभूताभावप्रतियोगित्वम् इति ।[15] यथा पर्वतो वह्निमान् धूमात् इत्यस्मिनुदाहरणे साध्यं वह्निः, हेतु धूमः, साध्याभावः वह्न्याभावः तथा

---

[12] p. 40

[13] Nyāyabodhinī on TS of Annabhatta, Ed. By Y. V. Athalye and M. R. Bodas, published by Bhandarkar Oriental Research Institute (BORI), Pune, 1930, p 41

[14] TS p 40.

[15] Siddhāntacandrodaya comm. On TS p.147

च धूमाभावः हेत्वाभावः । तयोः यत् व्याप्तिः वर्तते तत् व्यतिरेकः व्याप्तिरिति। व्यापकः किमिति वयं जानीमः, यत् तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम् इति । साध्याभावः व्यापकीभूताभावः नाम साध्याभावाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वं रूपः । अस्मिनुदाहरणे साध्यं वह्निः, साध्याभावः वह्न्याभावः, तदधिकरणं जलह्रदः, तत्र 'धूमाभावः नास्ति' इति अत्यन्ताभावः पदेन ग्रहीतुं न शक्यते, तत्र धूमाभावस्य सत्त्वात्, परन्तु घटाभावः ग्रहीतुं शक्यते, घटाभावस्य प्रतियोगिः घटः, अप्रतियोगिः धूमाभावः। अतः साध्याभावाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वं धूमाभावे वर्तते । अतः साध्याभावव्यापकीभूताभावः धूमाभावः, तस्य प्रतियोगिः धूमः, प्रतियोगित्वं धूमे वर्तते इतिकृत्वा धूमः व्यतिरेकव्याप्तिमत् इत् । नाम यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा जलह्रदः, इत्युक्ते साध्याभावः साधनाभावयोः वह्न्याभावधूमाभावयोर्व्यतिरेकव्याप्तिः धूमे सत्त्वात् लक्षणसमन्वयः भवति । अतएव धूमे अन्वयव्याप्तिः तथा च व्यतिरेकव्याप्तिरपि वर्तते। अतः धूमः अन्वयव्यतिरेकि हेतुः इति कथ्यते ।

परन्तु यस्मिन्हेतौ केवलम् अन्वयव्याप्तिरेव वर्तते तत् केवलान्वयि हेतुः इति ।यथा अन्नभट्टेनोक्तम्- अन्वयमात्रव्याप्तिकं केवलान्वयि[16] यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् इति । अत्र साध्यम् अभिधेयत्वम् । अभिधेयत्वं नाम वाच्यत्वम् नाम पदाभिधेयत्वम् वा, हेतुः प्रमेयत्वम् । प्रमेयत्वं नाम प्रमा विषयकत्वम् । नाम जगतेऽस्मिन् यद्किमपि वर्तते तत् सर्वम् ईश्वरस्य प्रमाविषयत्वं भवितुमर्हति । अत्र पक्षः घटः । अतः यो यः प्रमेत्ववान् सोऽभिधेयत्ववान् यथा पटः । तथा च अयं घटः प्रमेयत्ववान्, तस्मात् प्रमेयत्ववत्त्वात् तथा अभिधेयत्ववानिति । प्रमेयत्वरूपः हेतौ अन्वयव्याप्तिः वर्तते । परन्तु व्यतिरेकः व्याप्तिर्नास्ति । इत्युक्ते यत्र अभिधेयत्वं नास्ति तत्र प्रमेयत्वं नास्ति इति दृष्टान्तः अप्रसिद्धः इतिकृत्वा एतत् केवलान्वयिहेतुरिति ।

---

[16] TS p.४०.

Cf. व्यतिरेकव्याप्तिशून्यत्वे सत्यन्वयव्याप्तिमत्त्वं केवलान्वयित्वम् । साध्ये केवलान्वयित्वमभावाप्रतियोगित्वम् । तथा चाभावाप्रतियोगिसाध्यकत्वं केवलान्वयिहेतोर्लक्षणम् । Nyāyabodhinī on TS


तदनन्तरं बोधिनीकारः गोवर्धनभट्टेन केवलान्वयिलिङ्गस्य अपरं लक्षणं प्रदत्तम् । यथा केवलान्वयिसाधकं तत् इति ।[17] नाम यत्केवलान्वयि साध्यं तस्य साधकं तत् केवलान्वयि इति । अस्मिन्प्रसङ्गे केवलान्वयि पदार्थस्य स्वरूपं किम् इति जिज्ञासायां उच्यते अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् इति ।[18] यथा घटो अभिधेयः प्रमेयत्वात् इत्यत्र अभिधेयत्वरूपः यत्साध्यं वर्तते तत्केवलान्वयि इति । अत्र साध्यहेत्वोरन्वयव्याप्तिरेव चिन्तनीयम् । नाम प्रमेयत्वस्य यदधिकरणं भूतलं तत्र विद्यमानः अभावः, न हि अभिधेयत्वस्य अभावः, तस्य अप्रसिद्धत्वात् नाम ज्ञेयत्वमभिधेयत्वं च पदार्थसामान्यस्य लक्षणं वर्तते। अतः अभिधेयत्वाभावः रूपेण किमपि नास्त् । अतः अत्यन्ताभावः पदेन अभिधेयत्वाभावः ग्रहीतुं न शक्यते, तस्य अप्रसिधत्वात्, परन्तु घटो नास्तीति अभावः ग्रहीतुं शक्यते, तत्र प्रतियोगित्वं घटे, प्रतियोगित्वाभावः अभिधेयत्वे इति कृत्वा अभिधेयत्वं प्रमेयत्वस्य व्यापकम् । तत् सामानाधिकरण्यं प्रमेयत्वे अस्तीति प्रमेयत्वे अभिधेयत्वस्य अन्वयव्याप्तिरपि आगता । तादृशस्य प्रमेयत्वस्य घटे ज्ञानमेव इह परामर्शः । तेन च घटः अभिधेयत्ववान् इति अनुमितिर्जायते ।[19] अस्य चित्ररूपं एवं रूपेण कर्तुं शक्यते ।

---

[17] Nyāyabodhinī on TS, p 42

[18] Ibid

[19] For detail please vide Vidyadhari of Pandit Devadatta Sharma (Patil), pub. By Samartha Media Centre, Pune, 2014, pp.209-213.



एतेन अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् इति सिद्धम् । तावन्मात्रं लक्षणे तत्र अव्याप्त्यादि दोषानां प्रसक्तिः आशंक्यते । अतः तद्वारणाय विशेषरूपेण अत्र दलसार्थक्यं विचार्यते । प्रथमं तावत् कपिसंयोगाभावे लक्षणस्य लक्षैकदेशवृत्तित्वरूपः अव्याप्तिः भवेत् । कथमिति चेत्, तत्र अयं वृक्षः कपिसंयोगी, एतत्वृक्षत्वात् इत्यनुमाने कपिसंयोगस्याधिकरणे नाम वृक्षे, कपिसंयोगस्याभावोऽपि वर्तते, इति कृत्वा यस्याभावः स्वाधिकरणे वर्तते सः सर्वत्र विद्यते इति न्यायेन कपिसंयोगाभावः केवलान्वयि पदार्थः । परन्तु तत्र एतल्लक्षणं न गच्छति । अतः तत्र अव्याप्तिः रूपः दोषः भवति । कथमिति चेत्, तत्र अत्यन्ताभावः पदेन कपिसंयोगाभावः नास्ति इति अभावः ग्रहीतुं शक्यते, यतोहि कपिसंयोगाभावाभावः कपिसंयोगरूपः एव, तत्तु प्रसिद्धः । अतः कपिसंयोगाभावाभावस्य प्रतियोगी कपिसंयोगाभावः, न तु अप्रतियोगिः इति कृत्वा लक्षणस्य समन्वयः न भवति, अतः अव्याप्तिः । तद्वारणाय तस्मिल्लक्षणे 'स्वविरोधि' पदं निवेशनीयम् । इत्युक्ते स्वविरोध्यत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति लक्षणं भवति । तथा च कपिसंयोगः तथा कपिसंयोगाभावयोर्मध्ये विरोधित्वं नास्ति, एकाधिकरणे सत्त्वात् । अतः अत्यन्ताभावः पदेन कपिसंयोगाभावाभावः ग्रहीतुं न शक्यते, परन्तु घटाभावः ग्रहीतुं शक्यते । घटाभावस्य

प्रतियोगी घटः, परतियोगिता घटे, अप्रतियोगित्वं कपिसंयोगाभावे इतिकृत्वा स्वविरोध्यत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं इति लक्षणस्य समन्वयः भवति ।

तथैव आकाशाभावेऽपि अव्याप्तिर्भवति, इत्युक्ते आकाशः सर्वत्र सम्बद्धः, परं न कुत्रापि वर्तते । नाम आधाराधेयभावः सम्बन्धेन सो कुत्रापि नास्ति । नाम तस्य आधेयतानिरूपिताधिकरणताश्रयः किमपि नास्ति । अतः तस्य अभावः सर्वत्र विद्यते, अतः आकाशाभावः केवलान्वयी, परं तत्र एतल्लक्षणं न गच्छति इतिकृत्वा अव्याप्तिर्भवति । कथमिति चेत्, अत्यन्ताभावः पदेन आकाशाभावः नास्ति इति ग्रहीतुं शक्यते । आकाशाभावाभावः आकाशरूपः एव, तत्तु प्रसिद्धः । अतः आकाशाभावाभावस्य प्रतियोगी आकाशाभावः न तु अप्रतियोगी । अतः तद्वारणाय अस्मिन् लक्षणे 'वृत्तिमत्' पदं निवेशनीयम् । नाम स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोतित्वं केवलान्वयित्वम् इति केवलान्वयिपदार्थस्य लक्षणं भवति । तेन अत्यन्ताभावः पदेन आकाशाभावाभावः ग्रहीतुं न शक्यते । परं घटाभावः ग्रहीतुं शक्यते, तस्य प्रतियोगी घटः, प्रतियोगिता घटे, अप्रतियोगित्वम् आकाशाभावे इतिकृत्वा लक्षणसमन्वयः भवति ।

तथैव तावन्मात्रं लक्षणे सत्तायामपि 'अलक्षे वृत्तित्वरूपः अतिव्याप्तिः' भवति, कथमिति चेत् ? सत्ता द्रव्यगुणकर्मसु समवायसम्बन्धेन वर्तते । तथैव सामान्ये समवाये विशेषाभावे च सामानाधिकरण्यसम्बन्धेन वर्तते । अतः सत्ता सर्वत्र सर्वेषु पदार्थेषु विद्यते इतिकृत्वा तदपि केवलान्वयि भवेत्, तस्यात्यन्ताभावाप्रतियोतित्वात् ।

तद्वारणाय अस्मिन् लक्षणे 'एकजातीयसम्बन्धेन' इति दलं निवेशनीयम् । इत्युक्ते एकजातीयसम्बन्धेन स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् इति केवलान्वयिपदार्थस्य निर्दुष्टं लक्षणं भवति । यतोहि सत्ता सर्वेषु पदार्थेषु वर्तते परन्तु भिन्न भिन्नसम्बन्धेन, न तु एकेनैव सम्बन्धेन । अतः एकजातीयसम्बन्धेन सत्ता सर्वत्र नास्ति इतिकृत्वा नातिव्याप्तिः भवति । अतः एकजातीयसम्बन्धेन स्वविरोधिवृत्तिमदात्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् इति केवलान्वयिपदार्थस्य निर्दुष्टं लक्षणं भवति इति शम् ॥

Bibliography:

1. Athalye Y. V. and Bodas M. R, Tarkasaṁgraha of Annambhaṭṭa, published by Bhandarkar Oriental Research Institute (BORI), Pune, 1930.

2. Jha V. N., Tarkasaṁgraha of Annaṁbhaṭṭa, published by Chinmanya International Foundation Shodha Sansthan Adi Sankara Nilayam, Veliyanad, Ernakulam, Kerla, 1st Edition, 2010.

3. Sharma Devadatta, Vidyādharī, published by Samartha Media Centre, Pune, 1st Edition, 2014.Sastri S. Kuppuswami,

4. Satkari Śarmā Vaṅgīya, Tarkasaṁgraha Dīpikā with Rāmarudrīya of Ramarudra, Nṛsiṁhaprakāśikā of Rāya Narasimha Śāstri, Nilakaṇṭhaprakāśikā of Nilakaṇṭha Śāstri, Paṭṭābhirāmaprakāśikā of Pṭṭābhirama Śāstri, Published by Chowkhamba Sanskrit Santhan, Varanasi, 2006

5. Veezinathan N., Tarkasaṁgraha Dīpikā Prakāśikā with Bālapriyā and Prasāraṅā, published by Sri Sri Sri Mahalakshmi Māthrubhuteswara Trust, Chennai,2008.

6. A Primar of Indian Logic, published by Kuppuswami Sastri Research Institute, Mylapore, Madras, 1961.

Dr. Divakar Mohanty

Associate Professor,

Centre of Advanced Study in Sanskrit,

Savitribai Phule Pune University,

Pune-411007

divakar3673@gmail.com

***

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

चार्वाकमते प्रत्यक्षस्य प्रामाण्यम्

- वि बालाजिः

शोधसारः –

दृष्टिभूतस्य पदार्थजातस्य ज्ञानं दर्शनमिति उच्यते। तत्रादौ दर्शनस्य व्युत्पत्तिलभ्यार्थस्य परिज्ञानमावश्यकं प्रतीयते, यतो हि – दर्शनस्य उद्भवविषयं व्यापकतयाः विषयश्च अज्ञात्वा अधिकं किमपि विज्ञातुं न शक्यते। दृश् धातोः करणार्थे ल्युट् प्रत्यये दर्शन शब्दः निष्पद्यते। तदवस्थायां दृश्यते अनेन इति दर्शनम् इत्याकारकी व्युत्पत्तिः प्रसिद्धा वर्तते।

प्रपञ्चेऽस्मिन् अनादिकालादेव आध्यात्मिक-आधिभौतिक-आधिदैविकैः त्रिभिः दुःखै असकृत् प्रपीडितः सन् सर्वेऽपि मानवः मायाजनितदुःखसागरात् आत्मानमुद्धर्तुम् आत्यन्तिकसुखार्थं विलोकयति कश्चिन्मार्गविशेषम्। स च मार्गः दर्शनादेव जायते। अथ किं नाम दर्शनमिति जिज्ञासायां – दृश्यते परमपुरुषार्थात्मकमार्ग अनेनेति व्युत्पत्या दर्शनपदार्थः सिद्ध्यति।

भारतवर्षे तु विविधाः दार्शनिकसम्प्रदायाः दरीदृश्यन्ते। एकस्यैव सम्प्रदायस्य अनेके विचारकाः वर्तन्ते। तेषां विविधाः दार्शनिकचिन्तनग्रन्था अपि उपलभ्यन्ते। यद्यपि दार्शनिकसम्पदायेषु मतवैविध्यं विद्यते, तथापि सर्वेषां मूलभूतम् एकमेवास्ति, अर्थात् समेषां भारतीयदार्शनिकाणां चिन्तने मोक्षः लक्ष्यभूतमस्ति। तस्य विषयः उपनिषत्सु प्रतिपादितत्वात्, उपनिषदो हि वेदस्य शिरोभागतया श्रूयमाणत्वात्, वेदस्य अङ्गीकारानङ्गीकारभेदेन दर्शनस्य विभागः आस्तिक-नास्तिकभेदेन द्विधा कृतः, इमौ द्वावपि सम्प्रदायौ समानत्वेन कालचक्रे प्रथितौ भवतः। वैदिकयुगे इन्द्रवरुणादिदेवतानां प्रतिष्ठा सञ्जाता, एवमुपनिषत्सु ब्रह्मणः स्वरूपत्वादिकं प्रतिपादितम्। तासु प्रतिपादितम् एतत्तत्वं सर्वजनसाधारणानां कृते ज्ञातव्यत्वेन अर्थवत्वं नालभत। अत एते सामान्यजनाः

उपनिषत्सु प्रतिपाद्यमानं तत्वं न समर्थितवन्तः। अन्ते परिणामत्वेन धर्मः, एवं ज्ञानमिति परम्पराभेदेन अनुस्यूततया इदानीमपि मार्गद्वयं तिष्ठति।

नास्तिकदर्शनं निरन्तरप्रत्यक्षपरीक्षणेन सफलत्वं प्राप्तम्। एते श्रुतीनां प्रामाण्यं केनापि प्रकारेण न स्वीकुर्वन्ति। अत एते वेदबाह्या इति कथ्यन्ते। एतैः प्रतिपाद्यमानं तत्वं आस्तिकमतविरोधित्वेन अस्तीति कृत्वा एते चार्वाकादयः नास्तिका इत्युच्यन्ते। नास्तिकाः भौतिकवादिनः इत्यर्थः। नास्तिकदर्शनशिरोमणिरयं चार्वाकः। चारू रमणीया वाक् उक्तिः यस्य सः चार्वाकः इति व्युत्पत्तिः। अस्य मते प्रत्यक्षमेकमेव प्रमाणं भवति। अनुमानशब्दादयः अप्रत्यक्षप्रमाणत्वेन स्वीक्रियन्ते। सर्वे विषयाः सन्दिग्धाः अथवा भ्रमपूर्वका इत्येषां सिद्धान्तः।

कुञ्ची-शब्दाः – नास्तिकाः, चार्वाकः, प्रत्यक्षम् ।

दृष्टिभूतस्य पदार्थजातस्य ज्ञानं दर्शनमिति उच्यते। तत्रादौ दर्शनस्य व्युत्पत्तिलभ्यार्थस्य परिज्ञानमावश्यकं प्रतीयते, यतो हि – दर्शनस्य उद्भवविषयं व्यापकतयाः विषयञ्च अज्ञात्वा अधिकं किमपि विज्ञातुं न शक्यते। दृश् धातोः करणार्थे ल्युट् प्रत्यये दर्शन शब्दः निष्पद्यते। तदवस्थायां दृश्यते अनेन इति दर्शनम् इत्याकारकी व्युत्पत्तिः प्रसिद्धा वर्तते।

प्रपञ्चेऽस्मिन् अनादिकालादेव आध्यात्मिक-आधिभौतिक-आधिदैविकैः त्रिभिः दुःखैः असकृत् प्रपीडितः सन् सर्वोऽपि मानवः मायाजनितदुःखसागरात् आत्मानमुद्धर्तुम् आत्यन्तिकसुखार्थं विलोकयति कञ्चिन्मार्गविशेषम्। स च मार्गः दर्शनादेव जायते। अथ किं नाम दर्शनमिति जिज्ञासायां – दृश्यते परमपुरुषार्थात्मकमार्गः अनेनेति व्युत्पत्या दर्शनपदार्थः सिद्ध्यति।

भारतवर्षे तु विविधाः दार्शनिकसम्प्रदायाः दरीदृश्यन्ते। एकस्यैव सम्प्रदायस्य अनेके विचारकाः वर्तन्ते। तेषां विविधाः दार्शनिकचिन्तनग्रन्था अपि उपलभ्यन्ते। यद्यपि दार्शनिकसम्पदायेषु मतवैविध्यं विद्यते, तथापि सर्वेषां मूलभूतम् एकमेवास्ति, अर्थात् समेषां

भारतीयदार्शनिकाणां चिन्तने मोक्षः लक्ष्यभूतमस्ति। तस्य विषयः उपनिषत्सु प्रतिपादितत्वात्, उपनिषदो हि वेदस्य शिरोभागतया श्रूयमाणत्वात्, वेदस्य अङ्गीकारानङ्गीकारभेदेन दर्शनस्य विभागः आस्तिक-नास्तिकभेदेन द्विधा कृतः, इमौ द्वावपि सम्प्रदायौ समानत्वेन कालचक्रे प्रथितौ भवतः। वैदिकयुगे इन्द्रवरुणादिदेवतानां प्रतिष्ठा सञ्जाता, एवमुपनिषत्सु ब्रह्मणः स्वरूपत्वादिकं प्रतिपादितम्। तासु प्रतिपादितम् एतत्तत्वं सर्वजनसाधारणानां कृते ज्ञातव्यत्वेन अर्थवत्वं नालभत। अत एते सामान्यजनाः उपनिषत्सु प्रतिपाद्यमानं तत्वं न समर्थितवन्तः। अन्ते परिणामत्वेन धर्मः, एवं ज्ञानमिति परम्पराभेदेन अनुस्यूततया इदानीमपि मार्गद्वयं तिष्ठति।

नास्तिकदर्शनं निरन्तरप्रत्यक्षपरीक्षणेन सफलत्वं प्राप्तम्। एते श्रुतीनां प्रामाण्यं केनापि प्रकारेण न स्वीकुर्वन्ति। अत एते वेदबाह्या इति कथ्यन्ते। एतैः प्रतिपाद्यमानं तत्वं आस्तिकमतविरोधित्वेन अस्तीति कृत्वा एते चार्वाकादयः नास्तिका इत्युच्यन्ते। नास्तिकाः भौतिकवादिनः इत्यर्थः। नास्तिकदर्शनशिरोमणिरयं चार्वाकः। चारू रमणीया वाक् उक्तिः यस्य सः चार्वाकः इति व्युत्पत्तिः। अस्य मते प्रत्यक्षमेकमेव प्रमाणं भवति। अनुमानशब्दादयः अप्रत्यक्षप्रमाणत्वेन स्वीक्रियन्ते। सर्वे विषयाः सन्दिग्धाः अथवा भ्रमपूर्वका इत्येषां सिद्धान्तः। अतः ये पदार्थाः प्रत्यक्षप्रमाणेन ज्ञानगोचरीकृताः ते एव नितरां तिष्ठन्ति, प्रत्यक्षप्रमाणातिरिक्तप्रमाणैः येषां विषयाणां प्रतिपादनम्, अस्तित्वञ्च कृतं, तत्सर्वं नास्ति इत्येव तेषां सिद्धान्तः। चार्वाकाणां मध्ये वर्गद्वयं भवति, धूर्तः-सुशिक्षितभेदेन। तत्र धूर्ताः अशिक्षिता इति मत्वा, ते इन्द्रियादिविषयलम्पटाः भवन्ति। अन्ये सुशिक्षिताः उत्कृष्टसुखस्य अनुसरणं करिष्यन्ति। एतदर्थमेते ललितकलानामभ्यासं कुर्वन्ति।

चार्वाकमतपरिचयः –

मतस्यास्य प्रवर्तकः बृहस्पतिः। तेन दैत्यमेकमुद्दिश्य इमे विषयाः समुपदिष्टा इति। लोके जीव्यमानानां प्राणिनां विषये अस्यायमभिप्रायः –

यावज्जीवेत् सुखं जीवेन्नास्ति मृत्योरगोचरः ।

भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।।[1]

मनुष्यस्य जीवने मरणम् अनिवार्यं भवति, अतः जीवनसमये तपश्चर्यादि क्लेशोद्भवकार्यादिकं सन्त्यज्य सुखेन जीवतु, यदि चेत् जन्मान्तरे सुखजीवनार्थं क्लेशसहनं युक्तमिति चेत्, तदुच्यते – देह एवात्मा, मरणान्तरं भस्मीभूतस्य देहस्य कथं पुनरागमनत्वं सङ्गच्छते। अतः आमरणं सुखेन जीवतादिति तस्य सिद्धान्तः। नीतिकामशास्त्रानुरोधेन अस्य मते अर्थकामौ पुरुषार्थौ स्तः। एवं सर्वजनसाधारणतया भवत्यस्य सिद्धान्त इति मत्वा मतस्यास्य लोकायतमिति नाम सुप्रसिद्धं वर्तते।

अस्य मते पृथिव्यप्तेजवायुरूपाणि भूतानि एव तत्वानि। चतुर्णां च तेषां शरीररूपेण परिणामे, परिणामविशेषस्वाभाव्यात्तत्र चैतन्युपजायते, शरीरविनाशे चैतन्यमपि नश्यत्येव, (चैतन्यं हि ज्ञानम्) । यथा किण्वादिभ्यो मदशक्तिवत् इति। किण्वशब्देन सुरायाः प्रकृतिभूतो वृक्षविशेषनिर्यास उच्यते। तत्र प्रकृत्यवस्थायां मदशक्त्यभावेऽपि तद्विकृतिभूतसुरायां मदश्क्तिरुत्पद्यमाना दृश्यते, तद्वत् चत्वारि भूतानि कारणावस्थायां चैतन्याभावेऽपि परिणामभूतकार्यावस्थायां चैतन्यभाञ्जि भवन्ति इति। तदेव "विज्ञानघन एवैतेभ्यो भूतेभ्यो समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति"[2] इति। अतः तच्चैतन्यविशिष्टदेह एवात्मा । तदतिरिक्तात्मनि प्रमाणाभात् इति। अङ्गनाद्यालिङ्गजन्यं सुखमेव पुरुषार्थः, तत् दुःखसम्भिन्नत्वात् पुरुषार्थमेव नास्तीति न मन्तव्यम् – अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैवानुभोक्तव्यत्वात्। यथा मृगाः सस्यविनाशं अग्रे करिष्यन्तीति भिया क्षेत्रे शालीनामावाप एव न कार्य इति बुद्धिः कस्यापि नोदेति। एवं नूनमग्रे याचकाः समागमिष्यन्तीति भिया चुल्यां पाकभाण्डान्येव न प्रस्थापनीयानीति बुद्धिः न कस्यापि दृश्यते, तद्वत् यद्येकः समागमिष्यमानदुःखं विचिन्त्य सन्नद्धसुखपरित्यागः पशुवन्मूर्खः भवेत् । तदुक्तम् –

---

[1]सर्वदर्शनसंग्रहः द 1 पं 18

[2]बृ.उ. 2.4.12

त्याज्यं सुखं विषयसंगमजन्मपुंसाम्
दुःखोपसृष्टमिति मूर्खविचारणैषा।
व्रीहिञ्जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान्हितार्थी ।।[3]

विषयसंबन्धजन्यं यत्सुखं तद्दुःखयुक्तत्वात्त्याज्यम् इति यो विचारः सः मूर्खाणामेव, न ह्यनेतः स्वच्छतण्डुलपूर्णान्केवलं बहिस्तुषेण कणेन चोपहिता इति बुद्ध्या कोऽपि त्यक्तुमिच्छति, किन्तु तुषान् कणांश्च दूरीकृत्य अन्तस्थांस्तण्डुलान् यथा गृह्णाति, तथा दुःखोपसृष्टमपि सुखं नूनमनुभोक्तव्यमेव, इत्यादिना सुस्पष्टं ज्ञायते यत् – प्रत्यक्षमेकमेव प्रमाणमङ्गीकृतं चार्वाकेण इति।

अनुमानं न प्रमाणम्। तद्धि व्याप्तिज्ञानसापेक्षम्। व्याप्तिश्च व्यभिचाररहितः सम्बन्धः। स न ज्ञातुं शक्यते, व्यभिचारस्य दुरपोहत्वात्। यथा काचिद्वह्निव्यक्तिर्धूमाधिकरणवृत्तिरिति बुद्धिस्तथा काचिद्वह्निव्यक्तिर्धूमाधिकरणवृत्तिरपि स्यीदिति बुद्धेरपि संभवात्। न च वह्निधूमयोर्भूयोदर्शनेन व्यभिचारनिरासः शङ्क्यः । महानसादौ वह्निधूमयोर्भूयोदर्शनसाहस्र्येऽपि यथा तप्ते लोहपिण्डे वह्निर्धूमव्यभिचरितो दृश्यते, तथा क्वचिद्धूमे वह्निव्यभिचरितत्वदर्शनस्यापि संभवात् । न च वह्निधूमयोः सामान्यप्रत्यासत्या सकलधूमवह्नीनामलौकिकप्रत्यक्षसंभवाद्व्याप्तिग्रहः सुलभ इति नैयायिकोक्तं युक्तमिति वाच्यम् । सामान्यस्यैवाभावात् । न हि घटादिव्यक्त्यपेक्षयातिरिक्तं किंचिद्घटत्वादिकं संदृश्यते येन सामान्यकल्पनार्थवती स्यात् । घटोऽयमिति प्रत्यक्षं तु घटसद्भावे प्रमाणं न तु घटत्वसत्वे । अन्यथाकाशस्याप्यङ्गीकारापत्तेः । किं च तप्ते लोहपिण्डे केवलाग्निवद्गोपालघुटिकादौ केवलधूमस्यापि प्रत्यक्षदर्शनेन भूयोदर्शनेन व्यभिचारनिरासासंभव एव । एवं भूयः सहचरितयोरपि मित्रयोर्मिथो व्यभिचारः स्त्रीसङ्गादौ दृश्यत एव । तथा च व्याप्तिग्रहसंभवादनुमानं न प्रमाणम् ।

एवमुपमानमपि न प्रमाणम् । महिष इव पुरुषो मातङ्गीव योषिदित्युपमानात् प्रमाज्ञानासंभवात् । एवं शब्दो न प्रमाणम् , कस्यापि यथार्थवक्तुरभावात् । चार्वाकेण

---
[3]सर्वदर्शनसंग्रहः द 1 पं 39

विशिष्य श्रुतिप्रमाणानङ्गीकारत्वं स्पष्टं प्रतिपादितम्। तत्रापि वेदोक्तस्वर्गादीनाम् अवाप्तिविषये, तदर्थं समनुष्ठीयमानयागादिविषये च अविश्वासत्वात्, तेन इत्थं निगदितम् –

न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः ।।[4]

इह समनुष्ठीयमानयागादिकार्यद्वारा नूनं मरणानन्तरं स्वर्गादिलोकं सम्प्राप्यते, एवम् उपासनादि उपनिषत्प्रतिपादितानां मोक्षसाधनानां निरन्तरानुसन्धानेन च पारलौकिकं निरन्तरप्रदेशगमनं पुनरावृत्त्यादिकं सर्वम् अप्रत्यक्षत्वात् मानाभावाच्च नानुसन्धातव्यं वर्तते। एवं प्रतिवर्णाश्रमविहितनित्यनैमित्तिककार्याणाम् अनुकरणं दुष्प्रयोजनभूतं भवति, तेषां कार्याणां फलन्तु कालान्तरभावित्वकथनात् तेषाञ्चाप्रत्यक्षत्वात् न कोऽपि निश्चयानुकरणीयतां प्राप्यत इति तस्य सिद्धान्तः।

अपि च,

पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति ।
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते ।।[5]

ज्योतिष्टोमादियागसमये निहतः पशुः यदि स्वर्गं प्रत्येवगमिष्यति नत्वन्यत्रेति तथ्यभूतः विषयश्चेत्, तर्हि किमर्थम् अज्ञातस्य यस्यकस्यापि पशोः हननं करोति, किमर्थं वा तत्र यजमानस्य साक्षात् पिता तत्र न निहन्यते। एवञ्च,

मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिकाम् ।।[6]

मृतमर्त्यानुद्दिश्य क्रियमाणश्राद्धादिवैदिकं कर्म, तेभ्यः तृप्तिं ददाति इति यः विषयः सम्प्रोक्तः, तत्तु निर्विष्टस्य दीपस्योपरि स्नेहप्रदानकर्म इव दृश्यते।

---

[4]सर्वदर्शनसंग्रहः द 1 पं 111
[5]सर्वदर्शनसंग्रहः द 1 पं 114
[6]सर्वदर्शनसंग्रहः द 1 पं 118

एवम्भूता अप्रत्यक्षात्मकविषयाः बहवः सन्ति श्रुतिषु, तेषु विद्यमानविश्वासादिकं सन्त्यज्य, प्रत्यक्षात्मकविषयेषु सर्वे मानवाः प्रवर्तयितुं यतमानाः स्युः इति जडवादिनः, वेदबाह्यस्य प्रत्यक्षैकप्रमाणवादिनः चार्वाकस्य सिद्धान्तः।

BIBLIOGRAPHY

1. श्रीमत्सायनमाधवाचार्यप्रणीतः सर्वदर्शनसंग्रहः
   महामहोपाध्याय-अभ्यंकरोपाह्नवासुदेवशास्त्रिविरचितया
   दर्शनाङ्कुराभिधया व्याख्यया समेतः।
   पुण्यपत्तनस्थ-प्राच्यविद्यासंशोधनमन्दिराधिकृतैः
   मुम्बय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाश्यं नीतः
   शाके 1846, वत्सरे 1924 ख्रिस्ताब्दे
2. उपनिषद्भाष्यम्
   श्रीरङ्गरामानुजमुनिप्रभृति विरचित केनाद्युपनिषदुपेतम्
   श्रीमदभिनवदेशिक-वीरराघवार्यमहादेशिकविरचित-परिष्कर-उपनिषदर्थकारिका सहितम्
   Sri UttamurViraraghavachariar Centenary Trust, Chennai, 2003.
3. Tarka-SangrahaofAnnambhatta,withtheauthor'sDîpikâand , Govardhana'sNyaya-Bodhini. Ed. ByYashawantVasudevAthalye, Togetherwith in trod. and criticalnotesby Mahadev RajaramBodas. Bombay Sansk.Ser.55. Bombay,1918.
4. Vishnupuranam of Parasarabhatta,
   Based on professor H.H. Wilson’s Translation
   Edited & Published by ManmathaNathDutt, M.A., MRAS.,
   Rector Krushab Academy
   Calcutta, Printed by If . C. Dass Elysium Press
   65/2 Beadon Street, 1896.
5. श्रीमद्वाल्मीकिरामायणम्, गीताप्रेस् गोरख्पुर्, 1986.

Dr. V. Balaji

Assistant Professor,

Department of Sanskrit,

D. G. Vaishnav College,

Arumbakkam, Chennai – 106,

balbalram1990@gmail.com

***

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

धातोः स्वरूपविवरणम् - एका समीक्षा

- सोमा प्रामाणिकः

शोधसारः –

तिङन्तपदस्य या प्रकृतिः सा एव धातुपदेनाभिधीयते। धातुः क्रियायाः वाचकः। क्रियासम्बन्धे शौनकादयः प्राचीनाः ऋषय अवदन्-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते ।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते ।।

धातुः द्विविधः सकर्मकः अकर्मकश्च । एतयोर्मध्ये फलविशिष्टव्यापारबोधकः धातुः सकर्मकः। फलेन अविशेषितः केवलव्यापारबोधको धातुरेव अकर्मकः धातोः फलावच्छिन्नव्यापारबोधकत्वेनैव सकर्मकत्वम्, तदबोधकत्वे चाकर्मकत्वम्, इति वैयाकरणसम्प्रदाये उक्तम्। अत एव दृश्यते यत् व्यापारबोधकत्वविषये समानार्थकत्वेऽपि फलावच्छिन्नव्यापारस्य केवलव्यापारस्य चेति उभयस्य भेदवशात् धातवः द्विविधाः भवितुमर्हन्ति। सकर्मकाः अकर्मकाश्च।भट्टोजिदीक्षितस्यापि उक्तिरस्ति-

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ।।

यस्याः क्रियायाः कर्म विद्यते सा सकर्मिका, यस्याः च क्रियायाः कर्म न विद्यते सा अकर्मिका इत्युच्यते। प्रत्येकं क्रियाया एव एकं फलं व्यापारश्च विद्यते। येन उद्देश्येन क्रियायाः प्रवृत्तिर्भवति तत् फलमित्युच्यते। यच्च तस्य फलस्य जनकः असौ व्यापार इत्युच्यते। यस्मिन् स्थले फलं व्यापारश्च कर्तरि एव निबद्धः तिष्ठति सा क्रिया अकर्मिका इत्युच्यते। यथा-असौ हसति। अस्मिन् स्थले हसनक्रिया अकर्मिका। यतः तस्याः क्रियायाः फलं व्यापारश्च कर्तरि एव विद्यमानम्। यस्मिन् स्थले कर्तृभिन्ने अन्यस्मिन् कस्मिंश्चित् पदार्थे फलं तिष्ठति, तत्र क्रियायाः सकर्मकत्वं भवेत्। यथा- देवदत्तः ओदनं पचति। अत्र अधिश्रयणात् आरभ्य स्थाल्यपकर्षणं यावत् पाकक्रियायाः व्यापारो विस्तृतो विद्यते। पदार्थस्य विक्लित्तिरूपिणी शिथिलता तस्य फलम्। इयं शिथिलता विक्लित्तिर्वा कर्तृभिन्ने अन्यस्मिन् पदार्थे ओदनरूपे विद्यते इति पाकक्रिया सकर्मिका। अत एव धातवः त्रिविधाः अकर्मकाः, सकर्माकाः, द्विकर्मकाश्च। अस्माकं तु मतेन धातवस्तु चतुर्विधाः भवन्ति।

बोपदेवस्य मतेन उक्तानां दश लकाराणां मध्ये प्रत्येकस्मिन् एव अष्टादश(18) विभक्तयो भवन्ति। पाणिनिस्तु तिप्-तस्-झि-सिप्-थस्-थ-मिब्-वस्-मस् इत्यादि

अष्टादशविभक्ति-निर्देश-पूर्वकं तेषां स्थले क्रमशः अशीत्यधिकशतं (180) विभक्तीनाम् आदेशविधानं कृतवान्। यद्वा भवतु, दशलकाराणां प्रत्येकं प्रथमं नवविभक्तयः परस्मैपदीयाः अवशिष्टाश्च नव आत्मनेपदीयाः। उक्तेषु प्रत्येकं नव-विभक्तिषु प्रथमत्रयं प्रथमपुरुषः, द्वितीयत्रयं मध्यमपुरुषः, तृतीयत्रयं च उत्तमपुरुषनाम्ना प्रसिद्धाः। उक्तेषु त्रिषु पुरुषेषु मध्ये ऊत्तमपुरुषः अस्मदर्थे, मध्यमपुरुषः युष्मदर्थे प्रथमपुरुषश्च अस्मद्युष्मद्व्यतिरिक्ते विषये नियमिताः भवन्ति। प्रत्येकं पुरुषस्य मध्ये एकवचन-द्विवचन-बहुवचन-रूप-भेदो विद्यते। सर्वेषु लिङ्गेषु एव तिङन्तपदं समानम्। अत एव निरुक्तवृत्तौ स्मर्यते-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते ।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते ।।

आख्यातम् अर्थात् क्रियापदं तिङन्तपदं वा। क्रियावाचकमाख्यातम् । भावप्रधानमाख्यातम्20 । एतस्मिन् विषये उक्तं भवति। एतच्चतुष्प्रभेदमाख्यातं भवति- कर्तरि, भावे, कर्मणि, कर्मकर्तरि चेति। पचति इति कर्तरि, भूयते, पच्यते इति भावकर्मणोः, पच्यते स्वयमेव इति कर्मकर्तरि ।

कुञ्ची-शब्दाः – अकर्मकाः, सकर्मकाः, द्विकर्मकाः ।

तिङन्तपदस्य या प्रकृतिः सा एव धातुपदेनाभिधीयते। धातुः क्रियायाः वाचकः। क्रियासम्बन्धे शौनकादयः प्राचीनाः ऋषय: अवदन्-

क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते।
त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते[1]।।

धातुः द्विविधः सकर्मकः अकर्मकश्च । एतयोर्मध्ये फलविशिष्टव्यापारबोधकः धातुः सकर्मकः। फलेन अविशेषितः केवलव्यापारबोधको धातुरेव अकर्मकः धातोः फलावच्छिन्नव्यापारबोधकत्वेनैव सकर्मकत्वम्, तदबोधकत्वे चाकर्मकत्वम्, इति वैयाकरणसम्प्रदाये उक्तम्। अत एव दृश्यते यत् व्यापारबोधकत्वविषये समानार्थकत्वेऽपि फलावच्छिन्नव्यापारस्य केवलव्यापारस्य चेति उभयस्य भेदवशात् धातवः द्विविधाः भवितुमर्हन्ति। सकर्मकाः अकर्मकाश्च।भट्टोजिदीक्षितस्यापि उक्तिरस्ति-

फलव्यापारयोरेकनिष्ठतायामकर्मकः।

धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः[2]।।

एतासां सर्वासां कथानां तात्पर्यमित्थं भवति-धातोरर्थ एव क्रिया। कर्तुः यो व्यापारः स एव क्रियापदवाच्यः। यथा अधिश्रयणं चुल्यां स्थाल्याः संस्थापनम्, उदकासेचनम्, तण्डुलावपनम्, एधोपकर्षणम् इत्यादिभ्य आरभ्य स्थाल्यापकर्षणपर्यन्तं यान् व्यापारान् कर्ता सम्पादयति। स एव व्यापारः पाकक्रिया इत्युच्यते। वैयाकरणानां मतेन क्रिया पुनः द्विविधा। साध्या सिद्धा च। अत एव भर्तृहरिर्वदति-

क्रियायाः साध्यतावस्था सिद्धता च प्रकीर्तिता।
सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ् विधिम् ।।

तिपादिनिष्पन्ना क्रिया साध्या इत्युच्यते। घञादि निष्पन्ना च क्रिया सिद्धा इत्यभिधीयते। यथा- पचति पाकश्च।

यस्याः क्रियायाः कर्म विद्यते सा सकर्मिका, यस्याः च क्रियायाः कर्म न विद्यते सा अकर्मिका इत्युच्यते। प्रत्येकं क्रियाया एव एकं फलं व्यापारश्च विद्यते। येन उद्देश्येन क्रियायाः प्रवृत्तिर्भवति तत् फलमित्युच्यते। यच्च तस्य फलस्य जनकः असौ व्यापार इत्युच्यते। यस्मिन् स्थले फलं व्यापारश्च कर्तरि एव निबद्धः तिष्ठति सा क्रिया अकर्मिका इत्युच्यते। यथा-असौ हसति। अस्मिन् स्थले हसनक्रिया अकर्मिका। यतः तस्याः क्रियायाः फलं व्यापारश्च कर्तरि एव विद्यमानम्। यस्मिन् स्थले कर्तृभिन्ने अन्यस्मिन् कस्मिंश्चित् पदार्थे फलं तिष्ठति, तत्र क्रियायाः सकर्मकत्वं भवेत्। यथा- देवदत्तः ओदनं पचति। अत्र अधिश्रयणात् आरभ्य स्थाल्यपकर्षणं यावत् पाकक्रियायाः व्यापारो विस्तृतो विद्यते। पदार्थस्य विक्लित्तिरूपिणी शिथिलता तस्य फलम्। इयं शिथिलता विक्लित्तिर्वा कर्तृभिन्ने अन्यस्मिन् पदार्थे ओदनरूपे विद्यते इति पाकक्रिया सकर्मिका।

क्रियावच्छेदकं यत्र फलं कर्त्रा विवक्षितम् इत्यादि हरिकारिकायाः उपपन्नं भवति यद् वक्ता यदा फलविवक्षां करोति तदा क्रिया सकर्मिका भवति। यदा च स तत् न करोति तदा अकर्मिका भवति। अत एव एका एव क्रिया वक्तुः इच्छानुसारं सकर्मिका, अकर्मिका च भवितुमर्हति। यथा- रामो वनं गच्छति, रामः वने गच्छति। प्रथमे उदाहरणे क्रिया सकर्मिका। यतः तत् संक्रान्तस्य फलस्य विवक्षा विद्यते। द्वितीये उदाहरणे फलस्य विवक्षाभावात् गतिक्रिया अकर्मिका। पाणिनिव्याकरणे **कर्तुरीप्सिततमं कर्म**[3] इत्यस्मिन् सूत्रे तमप् ग्रहणेन कर्तुः धातुवाच्याफलविवक्षा एव उद्दिष्टा भवति।

अनाकारित वृद्धि पुनः बाद में वृद्धि को प्राप्त नहीं कर सकती है। जो निम्न हैं – पण्यमूल,वेतन,न्यास,वृथादान,आक्षिक,पण,इन सभी धनों पर अकारित वृद्धि नही होती है।

ऋणवापसी (ग्रहण) की विधि –

प्राचीन न्याय व्यवस्था में धर्मसूत्रकारों अथवा स्मृतिकारों ने ऋण देने के नियमों का उल्लेख तो प्रायः किया ही, साथ ही साथ ऋण वापसी की प्रक्रिया को भी पूर्णतया उद्धृत् किया है। यदि ऋणकर्ता द्वारा ऋण लेने के उपरान्त वापस नही करता है, या धन को देने से भी मना कर देता है। अथवा धूर्तता पर आ जाता है तो ऐसी स्थिति में नारद ने पाँच प्रकार की विधियों[29]का उल्लेख किया है। मिताक्षराकार द्वारा भी इस विषय को उद्धृत् किया गया है[30]। प्रायः लोक में छल, भय, बल इत्यादि कर्म स्वीकार नही किए जाते हैं, अत एव ऋणदाता को चाहिए कि प्रायः वह इनका न्यूनाधिक प्रयोग करे। अत एव स्मृतिकारों ने इन विधियों में पूर्वापरत्व सिद्ध किया है अर्थात् प्रथमतः धर्म-भय का उपयोग करना चाहिए। उसके द्वारा काम न होने पर ही क्रमशः व्यवहार, पुनः छल, तदन्तर अनशन और अन्त में ही बल का आश्रय लेना चाहिए।

द्रव्य (वस्तुओं) पर ब्याज नियम -

१. प्राचीन समय में पशुओं पर ब्याज के लिये विशेष नियम नही था, अपितु प्रायः दुधारुपशुओं की सन्तति ही उनका ब्याज होती थी - **सन्ततिस्तुपशुस्त्रीणाम्**[31]॥

२. तेल,घृत द्रवीय पदार्थ यदि बहुत अधिक काल तक बिना ब्याज ग्रहण किये रह जाए, तो ऐसी स्थिति में उत्तमर्ण के द्वारा जितना वृद्धि पूर्व निर्धारित हो उस वृद्धि से आठ गुना[32]वृद्धि की पराकष्ठा होनी चाहिये।

३. वस्त्र पर चार गुना, धान्य पर तीन एवं हिरण्य पर दो गुना सीमा निर्धारित की है[33]अर्थात् एक मास हेतु जितना ब्याज निर्धारित किया गया हो, उसको प्रत्यावर्तित न करने की स्थिति में मूलधन के साथ जोङ देने पर वह वस्त्र में चार गुना तक वृद्धि को प्राप्त करता है। मनु ने धान्यादि पदार्थों में पाँच गुना अधिकतम वृद्धि मानी है।

---

[29]धर्मेण व्यवहारेण छालेनाचरितेन च । प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥ *ना.स्मृ.*४/१२२

[30] 'धर्मेण प्रीतियुक्तेन सत्यवचनेन। व्यवहारेण साक्षिलेख्याद्युपायेन। छलेन उत्सवादिव्याजेन भूषणादिग्रहणेन, अचरितेन अभोजनेन, पञ्चमेनोपायेन बलेन निगडाबन्धनादिना, उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति'। *मि.टी.*२/४०, पृ० १०८-१०९

[31] *या.स्मृ.* २/३९, वृत्ति - पशुस्त्रीणां सन्ततिरेव वृद्धिः।

[32]रसस्याष्टगुणा परा । *या.स्मृ.*२/३९

[33]वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा । *या.स्मृ.* २/३९

वर्णक्रम के अनुसार ब्याज के नियम –

ऋणादान के नियमों में सर्वप्रथम यहाँ पर वर्णों के अनुसार ब्याज लेने का नियम है। याज्ञवल्क्य के अनुसार यदि वस्तु बन्धक रूप में न रखी गई हो तो ब्राह्मण पर दो प्रतिशत, क्षत्रिय से तीन प्रतिशत, वैश्य से चार तथा शूद्र से पाँच प्रतिशत ब्याज लेने का विधान किया गया है [34]।

ऋण के देय नियम –

१. अविभक्त कुटुम्ब के उपकार के लिये किसी एक व्यक्ति द्वारा लिया गया ऋण अथवा परिवार के अनेक व्यक्तियों द्वारा लिया गया हो तो उस ऋण को पूरें कुटुम्ब को देना होता है यदि परिवार में कोई व्यक्ति मृत्यु को प्राप्त हो जाये अथवा विदेश चला जायें तो उस धन को ग्रहण करने वाले रिक्थी को ही धन अदा करना चाहिये।

२. यदि पिता स्वकृत ऋण को बिना अदा किये ही मृत्यु को प्राप्त हो जायें, दूर देश को चला जाये अथवा पीड़ित हो जाये – इस प्रकार वह यदि ऋण के बारे में कुछ बिना कहे जाये तथापि उसके पुत्र एवं पौत्र को भी वह धन प्राप्त न होने पर भी पुत्र एवं पौत्र होने के नाते ही अपने पिता एवं पितामह के ऋण को अदा करना चाहिये। अर्थात् ऋण का भुगतान दादा-उसका पुत्र उसका प्रपौत्र इन तीन पीढियों द्वारा ही किया जाना चाहिए[35]।

३. स्त्री के द्वारा किये गये ऋण पति को अदा करना चाहिये, तथापि यदि मरणासन्न अवस्था या विदेश चले जाने पर परिवार के भरण पोषण के लिए पति के साथ लिए गए ऋण को अथवा स्वयं लिए गए ऋण को स्त्री द्वारा ही अदा करना चाहिए[36]।

अदेय ऋण –

प्राचीन स्मृतिकारों ने ऋणादान की चर्चा के अवसर पर उनसे सम्बन्धित अधिकारी का भी उल्लेख किया है कि कौन सा ऋण किसके द्वारा अदा नही किया जाना चाहिए[37] -

१. जो पति द्वारा ऋण परिवार के भरण पोषण एवं उत्थान हेतु न लिया गया हो, अर्थात् इससे अतिरिक्त स्वयं के लिए लिया गया हो तो उस ऋण का भुगतान स्त्री को नही करना चाहिए।

२. पुत्र द्वारा परिवार के भरण-पोषण के अतिरिक्त अन्य कारणों से लिए गए धन का भुगतान माता एवं पिता न करें।

---

[34]वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा॥ *या.स्मृ.*२/३७

[35]इच्छन्ति पितरः पुत्रान् स्वार्थहेतोर्यतस्ततः । उत्तमर्णाधमर्णेभ्यो मामयं मोचयिष्यति ॥ *ना.स्मृ.* ४/५

[36]प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्। स्वयं कृतं वा यदृणं नान्यत्स्त्री दातुमर्हति॥ *या.स्मृ.*२/४९

[37]सुराकामद्यूतकृतं दण्डाशुल्कावशिष्टकम् । वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम्॥ *या.स्मृ.* २/४७

३. सामान्य स्थितियों में पत्नी द्वारा कृत ऋण को पति न भुगतान करें, यदि वह धन परिवारिक आवश्यकताओं की पूर्ति हेतु न लिया गया हो। इस कथन का उल्लेख नारद ने भी किया है।

४. स्मृतिकारों का कथन है कि यदि पिता द्वारा पारिवारिक आवश्यकताओं के अतिरिक्त मदिरापान, स्त्रीव्यसन निमित्त एवं जुआ खेलने के निमित्त किए गए ऋण, दण्ड एवं शुक्ल इत्यदि के अवशिष्ट भाग, वृथादान (बन्दी, मल्ल, धूर्त इत्यादि के लिए प्रतिज्ञात) धन इत्यादि इन सभी पैतृक धनों को चुकाने का अधिकारी पुत्र नही होता है।

अदेय नियम के अपवाद –

स्मृतिकारों के मत में धोबी, बहेलिया, ग्वाल, नट, नर्तक आदि की स्त्रियों द्वारा लिए गए ऋण को चुकाने का दायित्व पतियों का ही होता है, क्योंकि ऋणदाता अर्थात् उत्तमर्ण इन स्त्रियों को इस विश्वास से ही ऋण की अदायेगी करता है कि परिवार के भरण-पोषण का दायित्व इनके पतियों पर ही है तो वे अपनी पतियों की ओर से ऋण ले रही है। इस प्रकार पुरुषों पर परिवार की निर्भरता ही ऋण चुकाने का मूल आधार है[38]। इस विषय को याज्ञवल्क्य ने भी उद्धृत किया है[39]।

प्रतिभूएवंप्रतिभूकेप्रकार –

प्रतिभू शब्द साम्प्रतिक न्याय व्यवस्था में महत्त्वपूर्ण शब्द है । जिसका सरल अर्थ है जमानतदार। प्रायः प्राचीन न्याय व्यवस्था में ऋण लेने वाले के सहयोगी के रूप में इस शब्द का प्रयोग हुआ है, परन्तु सम्प्रति यह विवाद के विषयों में अधिक प्रयोग होता है। अतः वह व्यक्ति जो ऋण देनेवाले उत्तमर्ण के सामने ऋण लेनेवाले अधमर्ण की जमानत करता हो, वह प्रतिभू कहलाता है। मिताक्षराकार के अनुसार प्रातिभाव्य विश्वास के कारण दूसरे व्यक्ति के साथ किया जाता है[40]। प्रायः जमानतदार के अधमर्ण से सम्बन्ध अथवा अपने वैशिष्ट्य के आधार से प्रतिभू तीन प्रकार का होता है – दर्शन, प्रत्यय और दान[41]। नारद ने भी तीन प्रकार प्रतिभुवों की चर्चा की – उपस्थान, दान और प्रत्यय[42]। यहाँ उपस्थान का सम्बन्ध

[38]अन्यत्र रजकव्याधगोपशोण्डिकयोषिताम् । तेषां तत्प्रत्यया वृत्तिः कुटुम्बं च तदाश्रयम् ॥ *ना.स्मृ.*४/१९

[39]गोपशोण्डिकशैलूषरजक-व्याधयोषिताम्। ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया । *या.स्मृ.*२/४८

[40]प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः। *मि.टी.*२/५३

[41]दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते । *या.स्मृ.*२/५३

[42]उपस्थापनाय दानाय प्रत्ययाय तथैव च । त्रिविधः प्रतिभूर्दृष्टस्त्रिष्वेवार्थेषु सूरिभिः॥ *ना.स्मृ.*२/११८

दर्शन प्रतिभू से है। उपस्थान[43]अर्थात् जो प्रयोजन काल में इसको में आवश्यकता पडने पर उपस्थित कराऊँगा, इस प्रकार का वचन दे।

दर्शन प्रतिभू - 'दर्शन की अपेक्षा होने पर दिखलाऊंगा" यह दर्शन विषयक प्रतिभाव्य है।

प्रत्यय प्रतिभू - मेरे विश्वास से इस व्यक्ति को धन दे दो यह तुम्हें रोकेगा नही क्योकिं यह अमुक व्यक्ति का पुत्र है, इसकी भूमि प्राय: उर्वरा है इसका गांव भी अच्छा है यह विश्वास विषयक प्रतिभाव्य है।

दान प्रतिभू -यदि यह अधमर्ण नही देगा तब मैं दे दूंगा यह दान विषयक प्रातिभाव्य है। याज्ञवल्क्य के अनुसार इन तीन प्रकार के प्रतिभाव्यों में परस्पर बलवत्ता है। अर्थात् प्रथम दो प्रकार के प्रतिभाव्यों द्वारा अपने कहे गये वचनों का पालन न करने पर तृतीय प्रतिभू (दान विषयक) को ऋणदाता का धन स्वयं देना चाहिए। यदि तीसरे प्रकार का प्रतिभू भी झूठा निकले तो उसके अनन्तर दान प्रतिभू के पुत्रों से उस ऋणदाता का ऋण वसूलना चाहिए[44]। इस प्रकार ऋणादान की प्रक्रिया में जमानतदार (प्रतिभू) का भी प्रमुख स्थान है, क्योंकि ऋणकर्ता के अनन्तर वही ऋणदाता का विश्वास होता है। ऋणकर्ता के अपनी बात से मुखर जाने पर अथवा ऋण ब्याज सहित न लौटाने पर प्रतिभू का कर्तव्य है कि वह जमानतदार की हैसियत से उस धन का भुगतान करे, क्योंकि ऋणकर्ता ने ब्याज देते समय उसको भी विश्वासपात्र स्वीकार किया था।

आधि के नियम –

सम्प्रति आधि शब्द को बन्धक, गिरवी इत्यादि शब्दों से भी परिभाषित किया जाता है। प्रायः अधमर्ण द्वारा लिए गए धन पर विश्वास हेतु ऋणदाता द्वारा ऋणकर्ता की जिस वस्तु को पूर्व सहमति के अधिकार पूर्वक लिया जाता है, ऋणकर्ता की वह वस्तु आधि कहलाती है। यह आधि शब्द आधीयते स्थाप्यते इति आधिः इस व्युत्पत्ति द्वारा निष्पन्न किया जाता है।नारद ने आधि का 'अधिक्रियत इत्याधिः' इस प्रकार लक्षण किया है। इसप्रकार आधि को बताते हुये सर्वप्रथम आधि को दो प्रकार से बांटा गया है – निर्धारित अवधि विशेष में प्रत्यावर्तित किया जाने वाला तथा अनिश्चित समय में वापस किया जाने वाला। निर्धारित अवधि में प्रत्यावर्तित किए जाने वाले ऋण को यदि उचित समय पर वापस कर दिया जाता है तो ऋणी ऋणमुक्त हो जाता है, और अनिश्चित काल वाले ऋण को जब ऋणकर्ता वापस करता है तो वह भी ऋणमुक्त हो जाता है। दोनों प्रकारों में ऋण के प्रत्यावर्तित होने पर ही

[43]उपस्थानाय प्रयोजनकाले ढौकनाय समीपे स्थापनाय प्रयोजनकाले अहं दर्शयिता......। *ना.स्मृ.*,पृ० ९८ (ब्रज किशोर स्वाई)

[44]आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥ *या.स्मृ.*२/५३

ऋणदाता शपथ-पत्र को वापस लौटाता है[45]। नारद के अनुसार पुनः यह आधि प्रकार दो प्रकार की होती है[46] - गोप्य आधि, भोग्य आधि। यहाँ गोप्य शब्द से रक्षण अर्थ लिया गया है गोप्य शब्द गुप धातु से निष्पन्न हुआ है। गोप्य आधि में सुवर्णादि निर्मित आभूषणों का ग्रहण किया जाता है इसप्रकार से इन पदार्थों की रक्षा करनी चाहिये। तथा भोग्य आधि से उपभोग में लिए जा सकने योग्य भवन, क्षेत्र इत्यादि का बोध होता है - **गोप्योघटितसुर्वणरौप्यादि: गुपूरक्षणेधातु।तेनरक्षणीयइत्यर्थ:।द्वितीयोभोग्य: प्रकाशएवगृहक्षेत्रादि:**[47]।मिताक्षरा के मत में भी भोग्य आधि को ऋणदाता द्वारा स्वीकार किए जाने पर उसका भोग करने पर ही उसकी सिद्धि होती है, न केवल साक्षी के लेखन मात्र से, न केवल उद्देश्य मात्र से[48]। अतः उपभोग योग्य बन्धक वस्तु ही वास्तविक अर्थों में आधि कहलाती है।

उपसंहार -

प्राचीन ऋणादान एवं ग्रहण की प्रक्रिया के रूप में धन को दूसरे के परोपकारार्थ हेतु देने और उसको चुकाने की प्रथा का उल्लेख भारतीय प्राचीन ग्रन्थों में उपलब्ध है। ऋग्वेद में एक स्थान पर वैदिक ऋषि कहते हैं कि जिस प्रकार हम अपने द्वारा आवश्यकता पड़ने पर किए गए ऋण का भुगतान करते हैं, उसी प्रकार हमें बुरे स्वप्नों द्वारा होने वाले हानिकारक प्रभावों को हमेशा दूर भगाना चाहिए। जिससे अनुमान लगाया जा सकता है कि प्राचीन काल से ही यह प्रथा सभ्य समाज में प्रचलित थी, तथा उसको परोपकार एवं लाभ दोनों के लिए प्रयोग में लाया जाता था, तथापि लिए गए ऋण को लौटाना भी प्रत्येक व्यक्ति का कर्तव्य होता था। स्मृति ग्रन्थों में ऋणादानादि विषयों का उल्लेख करते समय न केवल ऋण के लेन-देन के नियम प्रस्तुत किए गए हैं, अपितु उनके महत्त्व को भी प्रतिपादित किया गया है। प्राचीन काल में ऋण लेने के विशेष नियम प्राप्त होते हैं, जिसमें ऋण लेते समय का उद्देश्य स्पष्ट होता है, अर्थात् ऋण किस कार्य हेतु लिया जा रहा है। उद्देश्य के आधार पर उसको भुगतान करने के अधिकारी का निर्धारण होता था। उदाहरण हेतु यदि किसी व्यक्ति ने परिवार के भरण-पोषण हेतु ऋण स्वीकार किया है, तो ऐसी स्थिति में पारिवारिकके सभी लोगों का दायित्व होता है कि समय आने पर वे उसका भुगतान भी करें। जिसमें कुटुम्ब हेतु ऋण, स्वार्थ हेतु ऋण, आपात्काल की स्थिति में लिए जाने वाले ऋण, पिता द्वारा स्वार्थ हेतु लिया गया ऋण, पुत्र द्वारा स्वार्थ लाभ हेतु अधिकृत ऋण एवं स्त्री द्वारा कृत ऋण इत्यादि

45अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः। कृतकालोपनेयश्च यावाद्देयोयतस्तथा ॥ *ना.स्मृ.*४/१२४

46स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च। उपचारस्तथैवास्य लाभहानिविपर्यये ॥ *ना.स्मृ.*४/१२५

47 *ना.स्मृ.*, अ.भा. ४/१२५

48 आधेर्भोग्यस्य गोप्यस्य च स्वीकरणादुपभोगादाधिग्रहणसिद्धिर्भवति, न साक्षिलेख्यमात्रेण नाप्युद्देशमात्रेण । *मि.टी.*६०

विविध विषय यहाँ प्राप्त होते हैं। इसी प्रकार स्मृतियों में ऋण लेकर व्यापार के लिए अरण्य अथवा विदेश जाने वाले व्यक्ति से अतिरिक्त ब्याज दर वसूलने का उल्लेख है, जिससे उस व्यक्ति के वापस न आने, अथवा मृत हो जाने की स्थिति में उससे ऋण की वसूली की जा सके। यहाँ विविध प्रकार की वस्तुओं पर विविध ब्याज दरें वर्णित हैं, जिनमें वस्त्र, रस, धान्य, स्वर्ण, पशु, स्त्री इत्यादि प्रमुख है। इन वस्तुओं पर ब्याज के नियमों से ज्ञात होता है, उस समय कृषि आधारित अर्थव्यवस्था थी।

सन्दर्भ ग्रन्थ सूची-

याज्ञवल्क्यस्मृति (मिताक्षरासहित), (व्या.) पं दुर्गाधर, भारतीय विद्याभवन प्रकाशन, वाराणसी, दिल्ली, २००२.

नारदस्मृति (तिलोत्तमा टीका सहित), (सम्पा. ब्रजकिशोर स्वांई चौखम्बा ओरियन्टालिया, दिल्ली, १९९६.

नारदस्मृति (सम्पा. और अनु.) आर. डब्ल्यू. लैरिवियरे मोतीलाल बनारसीदास, दिल्ली, २००३.

अष्टादशस्मृति, (सम्पा) पं. मिहिरचन्द, नाग प्रकाशक, दिल्ली, १९९०.

आपस्तम्बस्मृतिः (देवदत्तकृत हिन्दी भाष्य सहित), (सम्पा.) प्रयागनारायण मिश्र, ज्ञानभारती पब्लिकेशन, दिल्ली, २००५.

गौतमधर्मसूत्रम् (मिताक्षरावृत्ति सहित), (सम्पा.)उमेशचन्द पाण्डेय, चौखम्भा संस्कृत संस्थान, वाराणसी, २००४.

कात्यायनस्मृति (अनु.) पी. वी. काणे, हिन्दू लॉ क्वार्टली, बम्बई, १९३३.

*मनुस्मृतिः (मन्वर्थमुक्तावली टीका सहित),*मणिप्रभा हिन्दी व्याख्या, हरगोविन्दशास्त्री, चौखम्भा संस्कृत भवन, वाराणसी,२००६.

ऋग्वेद संहिताः (*सायणाचार्य विरचित भाष्य समेता*), (*सम्पा.*) एन. एस., पुणे वैदिक संशोधन मण्डल, पुणे, १९७२.

काणे, डॉ. पाण्डुरंग वामन, धर्मशास्त्र का इतिहास, उत्तर प्रदेश हिन्दी संस्थान (हिन्दी समिति प्रभाग), लखनऊ, चतुर्थ संस्करण, १९९२.

स्मिता यादव

SmitaYadav

शोधच्छात्रा, जवाहरलालनेहरूविश्वविद्यालय, नई दिल्ली 110067

Yadavsmita1995@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit, Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

ब्रह्मसूत्रस्थपरमाणुजगत्कारणवादनिरासे विनियुक्तानां हेत्वाभासानां परिशीलनम्

- वाणीमञ्जुनाथहेगडे

शोधसारः

न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दानाम् आप्तशब्दत्वेन श्रुतीनाञ्च प्रामाण्यमस्त्येव। किन्तु अनुमानप्रमाणप्रधानमिदं शास्त्रम्। अत्र यावता विस्तरेण अनुमाननिरूपणं कृतं न तथा अन्यत्र शास्त्रे परिदृश्यते। प्रमाणषट्कवादि वेदान्तदर्शनं तावत् तदन्तर्गततया अनुमानमङ्गीकरोत्येव, किन्तु श्रुतिप्रधानमिदं शास्त्रम्।

श्रुतिप्रधानशास्त्रेऽस्मिन् परमपुरुषार्थभूतमोक्षो हि समूलद्वैतरूपबन्धनिवृत्त्युपलक्षित स्वप्रकाशपरमानन्द लक्षणप्रत्यगभिन्नब्रह्मरूपः, तत्प्राप्तिश्च द्वैताभावोपलक्षितब्रह्मनिर्विकल्पनिश्चयादेव भवतीति प्रतिपादितमस्ति। एवमेव जगदुत्पत्तिविचारोऽपि शास्त्रेऽस्मिन् कृतः एव। जगदुत्पत्तिकारणविचारे दार्शनिकेषु बहुधा विप्रतिपत्तिर्दृश्यते। तत्र आस्तिकेषु प्राधान्येन त्रयः पक्षाः समुत्तिष्ठन्ते। युक्तिप्राबल्यवादिनां वैशेषिकाणां परमाणुकारणतावादः। स्मृतिप्राबल्यवादिनां सांख्यानां प्रधानकारणतावादः। श्रुतिप्राबल्यवादिनां वेदान्तिनां ब्रह्मकारणतावादश्चेति। ब्रह्मसूत्रग्रन्थो यद्यपि अद्वैतवेदान्तसिद्धान्तप्रतिपादको ग्रन्थः तथापि तत्र न्यायवेदान्तादिनैकशास्त्रसिद्धान्तप्रक्रियाणां समावेशोऽपि परिदृश्यते। ग्रन्थेऽस्मिन् परमाणुकारणतावादसाधनाय पूर्वपक्षिणा वैशेषिकेन तन्निराकरणाय ब्रह्मकारणतावादव्यवस्थापनाय च सिद्धान्तिना वैशेषिकैरुक्तानुमाने हेत्वाभासः प्रदर्शितः वर्तते।

हेत्वाभासस्य निरूपणं न्यायशास्त्रे यावता विस्तरेण कृतं तावता विस्तरेण नान्यत्र कृतम्। अत्रापि परमाणुजगत्कारणतावादनिरासेऽस्मिन् हेत्वाभासाः उपलभ्यन्ते। तत्रापि प्रकृतवादे व्यभिचारः उपलभ्यते। अतः ब्रह्मसूत्रस्थपरमाणुजगत्कारणवादनिरासे विनियुक्तानां हेत्वाभासानां परिशीलनं शोधपत्रेऽस्मिन् कृतं वर्तते। पूर्वोत्तरपक्षेषु प्रदर्शितानां हेत्वाभासानां सङ्ग्रहणम् अस्मिन् शोधे वर्तते।

कुञ्ची-शब्दाः – हेत्वाभासाः, परमाणुकारणतावादः, ब्रह्मकारणतावादः ।

जगदुत्पत्तिकारणविचारे दार्शनिकेषु बहुधा विप्रतिपत्तिर्दृश्यते। तत्र आस्तिकेषु प्राधान्येन त्रयः पक्षाः समुत्तिष्ठन्ते। युक्तिप्राबल्यवादिनां वैशेषिकाणां परमाणुकारणतावादः। स्मृतिप्राबल्यवादिनां सांख्यानां प्रधानकारणतावादः। श्रुतिप्राबल्यवादिनां वेदान्तिनां

ब्रह्मकारणतावादश्चेति। तत्रादौ परमाणुकारणतावादिनां वैशेषिकाणां पक्षः अनूद्यते। पटादीनाम् अवयविनां तन्त्वादयः तदवयवाः आरम्भकाः दृश्यन्ते। तन्त्वादीन् आरम्भन्ते तदवयवाः। एवं तत्तदवयविनां तत्तदवयवाः आरम्भका भवन्ति। दृश्यमानेषु एतेषु अवयवेषु यत् सूक्ष्मतमं द्रव्यं तत् त्र्यणुकमित्युच्यते। तस्य त्रयोऽवयवाः द्वणुकाख्याः अणवो भवन्ति। तेषु पुनरेकैकस्य द्व्यणुकस्य द्वौ अवयवौ परमाणुनाम्ना व्यपदिश्येते। परमाणोरपि सावयवत्वे अभ्युपगम्यमाने अनन्तावयवत्वेन सुमेरुराजसर्षपयोः समानपरिमाणत्वप्रसङ्गः।

परमाणुभ्यः जगदुत्पत्तिः - सर्गादौ ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते । तत्र पार्थिवपरमाणुगतक्रियया विभागः, ततः पूर्वसंयोगनाशः, ततः पार्थिवपरमाणुद्वयसंयोगः, ततः पार्थिवद्व्यणुकोत्पत्तिः, ततः पार्थिवद्व्यणुकत्रयसंयोगेन पार्थिवत्र्यणुकोत्पत्तिः, एवं पार्थिवचतुरणुकादिक्रमेण घटादीनां पार्थिवावयविनाम् उत्पत्तिः भवति। एवं क्रमेण जलीयपरमाणुभ्यः क्रियावद्भ्यः महतां जलीयावयविनाम् उत्पत्तिः, तैजसपरमाणुभ्यः तैजसानां महावयविनाम् उत्पत्तिः, वायवीयपरमाणुभ्यः वायवीयानां महावयविनाम् उत्पत्तिर्भवति।[1] इत्थं चतुर्विधेभ्यः परमाणुभ्यः द्व्यणुकत्र्यणुकादिक्रमेण सावयवं जगत् सर्वम् आरभ्यते। त्र्यणुकप्रभृतिघटादिपर्यन्तानाम् अवयविनां परमाण्वादयः तत्तदवयवा एव समवायिकारणानि। अवयवसंयोगाः असमवायिकारणानि। ईश्वरादृष्टकालादीनि निमित्तकारणानि। अवयविषु उत्पन्नेषु तत्र रूपादयो गुणाः यथायथमुत्पद्यन्ते। तद्यथा - परमाणुगताः एकत्व - एकपृथक्त्व - संयोग - विभाग – गुरुत्व- सांसिद्धिकद्रवत्व – स्नेह-वेग - स्थितिस्थापकाः सजातीयान् अन्यान् गुणान् द्व्यणुकेषु आरभन्ते। द्व्यणुकगताश्च एकत्वादयः त्र्यणुकेषु सजातीयान् एकत्वादीन् आरभन्ते। रूप - रस - गन्ध - स्पर्शास्तु पार्थिवेषु परमाणुषु पाकाज्जायन्ते। द्व्यणुकप्रभृतिघटादिपर्यन्तावयविषु तु परमाण्वादिकपालान्तावयवगतेभ्यः रूपरसगन्धस्पर्शेभ्यः जायन्ते।च जलीय - तैजस - वायवीयेषु परमाणुषु विद्यमानाः स्पर्शाः, जलीयतैजसपरमाणुगतरूपाणि, जलीयपरमाणुगतरसाश्च नित्याः तत्तद्व्यणुकेषु सजातीयान् अन्यान् स्पर्शादीन्, ते पुनः तत्तत्त्र्यणुकेषु सजातीयानन्यान् स्पर्शादिगुणान् आरभन्ते। एवं क्रमेण स्थूलेषु अवयविषु रूपादयः आरभ्यन्ते।

यथा प्रधानकारणवादः ब्रह्मकारणवादविरोधी तथा परमाणुकारणवादोऽपि। अतः वैशेषिकमतसम्मत -परमाणुकारणवादः सिद्धान्तिना निराकर्तव्यः। तत्रादौ परमाणुकारणतावादिना वैशेषिकेन ब्रह्मकारणतावादिनि यो दोषः उद्भाव्यते, स च दोषः प्रतिसमाधीयते ब्रह्मकारणतावादिना सिद्धान्तिना ब्रह्मसूत्रस्य द्वितीयाध्याये द्वितीयपादे 'महद्दीर्घवद्वा ह्रस्वपारिमण्डलाभ्याम्'[2] इति सूत्रेण।

---

[1]प्राणिनां भोगभूतये महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिक्रमेण महान् वायुः समुत्पन्नः।

तत्रादौ परमाणुकारणतावादिनां वैशेषिकाणां पूर्वपक्षः एषः-

जगत् ब्रह्मकार्यं न ब्रह्मगतचैतन्यगुणसजातीयगुणशून्यत्वात् यत्कार्यं यत्कारणगतगुणसजातीयगुणशून्यं तत् तत्कार्यत्वाभाववत्। यथा यवबीजगतगुणसजातीयगुणशून्यः व्रीह्यङ्कुरः यवबीजकार्यत्वाभाववान्। कार्यगुणं प्रति सजातीयः कारणगुणः कारणं इति कार्यकारणभावः कारणगतगुणस्य कार्ये सजातीयगुणारम्भकत्वम् इति नियमः वा सामान्यमुखीव्याप्तौ अप्रयोजकशङ्कावारकतर्कः।

सिद्धान्तः- यत्कार्यं यत्कारणगतगुणसजातीयगुणशून्यं तत् तत्कार्यत्वाभाववत् इति सामान्यमुखीव्याप्तिः व्यभिचरिता। तथा हि-

१.द्व्यणुकात्मकं कार्यं द्व्यणुककारणीभूतपरमाणुगतपारिमाण्डल्यपरिमाणात्मकगुणसजातीयगुणशून्यं [3] किन्तु द्व्यणुकात्मकं कार्यं परमाणुकार्यत्वाभाववत् न इत्यतः व्यभिचारः।

२.त्र्युणुकात्मकं कार्यं त्र्यणुककारणीभूतपरमाणुगतपारिमाण्डल्यपरिमाणात्मकगुणसजातीयगुणशून्यं किन्तु त्र्यणुकात्मककार्यं परमाणुकार्यत्वाभाववत् न इत्यतः व्यभिचारः।

३.त्र्यणुकात्मकं कार्यं त्र्यणुककारणीभूतद्व्यणुकगताणुपरिमाणात्मकगुणसजातीयगुणशून्यं [4] किन्तु त्र्यणुकात्मककार्यं द्व्यणुककार्यत्वाभाववत् न इत्यतः व्यभिचारः।

४.चतुरणुकात्मकं कार्यं चतुरणुककारणीभूतद्व्यणुकवृत्तिद्वित्वरूपगुणसजातीयगुणशून्यं[5] किन्तु चतुरणुकात्मककार्यं द्व्यणुकगतद्वित्वकार्यत्वाभाववत् न इत्यतः व्यभिचारः।

५.द्रव्यरूपकार्यं द्रव्यकारणीभूतपरमाणुसमुदाय/द्व्यणुकसमुदाय/द्व्यणुकसहितपरमाणुगत-पारिमाण्डल्य-परिमाणात्मकगुणसजातीयगुणशून्यं [6] किन्तु द्रव्यरूपकार्यं परमाणुसमुदाय/द्व्यणुकसमुदाय/द्व्यणुकसहित-परमाणुकार्यत्वाभाववत् न इत्यतः व्यभिचारः।

पूर्वपक्षी प्रत्यवतिष्ठते उक्तव्यभिचारवारणाय सामान्यमुखीव्याप्तिः परिष्क्रियते। तथा च अनुमानम्- **जगत् ब्रह्मकार्यं न ब्रह्मगतगुणविरोधिगुणशून्यत्वे सति**

---

[3]द्वित्वसंख्या चाण्वोर्वर्तमाना द्व्यणुकेऽणुत्वमारभते।

[4]अनित्यं चतुर्विधमपि संख्या परिमाणप्रचययोनिः

[5]यदापि द्वे द्व्यणुके चतुरणुकमारभेते, तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम्। अत्र यदापि द्वे द्वे द्व्यणुके इति पठितव्ये प्रमादादेकं द्वेपदं न पठितम्। द्व्यणुकाधिकरणे ये द्वित्वे ते यदा चतुरणमारभते संख्येयानां चतुर्णां द्व्यणुकानाम् आरम्भकत्वात् तद्गते द्वित्वसंख्ये अपि आरम्भके इत्यर्थः।

[6]यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते, तदापि समानैषा योजना।

ब्रह्मगतचैतन्यगुणसजातीयगुणशून्यत्वात् यत्कार्यं यत्कारणगतगुणविरोधिगुणशून्यत्वे सति यत्कारणगतगुणसजातीयगुणशून्यं तत् तत् कार्यत्वाभाववत्।[7]इति।

असति विरोधिगुणे कार्यगुणं प्रति तत्सजातीयकारणगुणः कारणम् इति परिष्कृतः कार्यकारणभावः अधुना अप्रयोजकशङ्का वारकः। कारणगुणस्य सजातीयकार्यगुणानारम्भकत्वं प्रति विरोधिगुणान्तरक्रान्तत्वं प्रयोजकम्। इत्थं च अत्र प्रयोज्यप्रयोजकभावः सामान्यकार्यकारणभावश्च लभ्यते।

तथा च पूर्वं दर्शितेषु पञ्चसु अपि स्थलेषु व्यभिचारः वार्यते। प्रथमस्थले द्व्यणुकात्मकं कार्यं तत्कारणीभूतपरमाणुगतपारिमाण्डल्यपरिमाणात्मकगुणविरोधिगुणेन संख्याजनित-अणुत्त्वरूपपरिमाणेन आक्रान्तम्। द्वितीये त्र्यणुकात्मकं कार्यं तत्कारणीभूत-परमाणुगतपारिमाण्डल्यपरिमाणात्मकगुणविरोधिगुणेनमहत्त्वरूपपरिमाणेन, तृतीये त्र्यणुकात्मकं कार्यं तत्कारणीभूतद्व्यणुकगताणुपरिमाणात्मकगुणविरोधिगुणेनमहत्त्वरूपपरिमाणेन, चतुर्थे चतुरणुकात्मकं कार्यं तत्कारणीभूतद्व्यणुकवृत्तिद्वित्वरूपगुणविरोधिगुणेन महत्त्वरूपपरिमाणेन, पञ्चमे द्रव्यरूपकार्यं तत्कारणीभूतपरमाणुसमुदायद्व्यणुकसमुदायद्व्यणुकसहितपरमाणुगत-पारिमाण्डल्य-परिमाणात्मकगुण-विरोधिगुणेन महत्त्वरूपपरिमाणेन आक्रान्तम्। अतः साध्य [8] शून्ये द्व्यणुकादौ निरुक्तसत्यन्तस्य विरहेण सत्यन्तघटितहेतोरपि विरहात् न व्यभिचारः।

समाधानान्तरं- सामान्यमुखीव्याप्तौ सन्निधानविशेषवत्त्वमित्यंशः निवेशनीयः।[9]

तथा च अनुमानम्-**जगत् ब्रह्मकार्यं न ब्रह्मगतचैतन्यगुणसजातीयगुणशून्यत्वात् कार्योत्पत्तिपूर्वं यत्कार्यं सन्निधानविशेष [10] वत्त्वे सति यत्कारणगुणसद्विरोधिगुणशून्यत्वे सति यत्कारणगतगुणसजातीयगुणशून्यं तत् तत् कार्यत्वाभाववत्।**

द्व्यणुकरूपकार्ये तत्कारणीभूतपरमाणुगतपारिमाण्डल्यपरिमाणात्मकगुणसजातीयगुणशून्यत्वं यद्यपि अस्ति किन्तु सन्निधानविशेषवत्त्वं नास्ति। सन्निधानविशेषो नाम स्वाश्रयसमवायः इति। प्रकृते स्वंपारिमाण्डल्यं, स्वाश्रयःपरमाणुः तत्समवेतत्वं गुणान्तरे अथवा पारिमाण्डल्ये अस्तीत्यतः सन्निधानविशेषवत्त्वं सम्भवति। तथा च सामान्यमुखीव्याप्तेः विशेषणांशस्य समन्वयात् विशिष्टस्यापि समन्वयसम्भवात् व्यभिचारः वार्यते। अतः जगत् ब्रह्मकार्यं न भवति इति पूर्वपक्षः।

जगति तु ब्रह्मगतचेतनागुणविरोधिकश्चित् गुणः न वर्तते। न हि अचेतना नाम चेतनाविरोधिकश्चित् गुणः अस्ति चेतनाप्रतिषेधमात्रत्वात्।

---

[7]अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकदीत्यतो नारम्भकाणि कारणगतानि पारिमाण्डल्यादीनीत्यभ्युपगच्छामि।

[8]सामान्यव्याप्तिघटकसाध्यम्

[9]न च सन्निधानविशेषात्कुतश्चित्कारणबहुत्वादोऽन्येवारभन्ते न पारिमाण्डल्यादीनीत्युच्येत। (ब्र.सू.शा॰भा॰-पृ.स.-650)

[10]स्वाश्रयसमवायः

सिद्धान्तः-उक्तकार्यकारणभावस्य प्रयोज्यप्रयोजकभावस्य स्वीकारे द्व्यणुकादिषु अणुपरिमाणोत्पादात् पूर्वं परमाणुपरिमाणसजातीयस्य पारिमाण्डल्यस्य उत्पादप्रसङ्गः। इत्थं च सामान्यमुखीव्याप्तौ व्यभिचारः दुर्वारः। परमाणुगतपारिमाण्डल्यरूपगुणविरोधिगुणशून्यत्वे सति परमाणुगतपारिमाण्डल्यात्मकगुणसजातीयगुणशून्यं यत् (हेतुः) पारिमाण्डल्योत्पत्तिपूर्वकालीनं द्व्यणुकं तत्र द्व्यणुके परमाणुकार्यत्वाभावस्य(साध्यस्य) विरहात् व्यभिचारः। इत्थं च परमाणुकारणतावादः निरस्यते। ब्रह्मकारणतावादश्च व्यवस्थापितः भवति।

सन्दर्भग्रन्थसूची-

1. प्रशस्तपादभाष्यम्, (न्यायकन्दलीव्याख्यासहिता)प्रशस्तपादाचार्यः,पण्डितश्रीदुर्गाधर झा (सम्पादकः), पृ.सं -127, वाराणसी, 1997, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः।
2. ब्रह्मसूत्र-शाङ्करभाष्यम्(भामती संवलित) द्वितीयभागः, पृ.स.647, वाराणसी, 2010, चौखम्बा विद्याभवन ।
3. शस्तपादभाष्यम् (न्यायकन्दलीव्याख्यासहिता), प्रशस्तपादाचार्यः, पण्डितश्रीदुर्गाधर झा (सम्पादकः), पृ.सं -327-329, वाराणसी, 1997, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः,
4. प्रशस्तपादभाष्यम्(न्यायकन्दलीव्याख्यासहिता), प्रशस्तपादाचार्यः, पण्डितश्रीदुर्गाधर झा (सम्पादकः) (प्रश॰ भा॰-पृ.सं-320-322), वाराणसी, 1997, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः।
5. ब्रह्मसूत्र-शाङ्करभाष्यम्(भामती संवलित) द्वितीयभागः, (ब्र.सू. शा॰भा॰-२.२.११. पृ.सं-648)
6. 2010, वाराणसी, चौखम्बा विद्याभवन ।
7. ब्रह्मसूत्र-शाङ्करभाष्यम्(भामती संवलित) द्वितीयभागः, (ब्र.सू. शा॰भा॰-२.२.११. पृ.सं-648)
8. 2010, वाराणसी, चौखम्बा विद्याभवन ।
9. ब्रह्मसूत्र-शाङ्करभाष्यम्(भामती संवलित) द्वितीयभागः, (ब्र.सू. शा॰भा॰-२.२.११. पृ.सं-648)
10. 2010, वाराणसी, चौखम्बा विद्याभवन ।

वाणीमञ्जुनाथहेगडे

(Vani Manjunath Hegde)

शोधच्छात्रा

राष्ट्रियसंस्कृतसंस्थानम्

राजीवगान्धीपरिसरः, मेणसे, (शृङ्गेरी)

पत्रालयः – मेणसे, चिक्कमगळूरु, (कर्नाटक) 577139

अन्तर्जालसङ्केतः – vanijhegde@gmail.com

***

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

मनुसंहितायां नारीमहत्त्वम्

- **वसुधा प्रामाणिकः**

शोधसारः –

वैदिककाले नारीणाम् अवस्था विकसिता तथा उन्नता आसीत्। उत्तरवैदिककाले नारीणां स्थितिः कीदृशी आसीत् निश्चितरूपेण वक्तुं न शक्यते । नारीणां प्रशंसापरकश्लोकेभ्यः ज्ञायते यत्समाजे तासां महत्वपूर्णभूमिका आसीत् । मनुस्मृतेः तृतीयाध्याये दृश्यते -

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥ (मनु.३।५६)

यस्मिन्कूले स्त्रियः पूज्यन्ते तत्र देवताः प्रसीदन्ति । यत्र न पूज्यन्ते तत्र सर्वाः क्रियाः निष्फलाः भवन्तीति । स्त्रीणां सुरक्षायै मनुसंहितायाम् उक्तं यत् बाल्यावस्थायां पिता युवावस्थायां पतिः बृद्धावस्थायां च पुत्रः स्त्रीणां रक्षणं कुर्वन्ति (मनु.९।३) इति । मनुसंहितायाम् अपरेऽस्मिन्श्लोके उक्तं यन्माता हि श्रेष्ठः गुरुः। द्वितीयाध्याये कन्यायाः नामकरणं कीदृशं भवति तद्वर्णितमस्ति (मनु.२।३३) । विवाहसमये कन्याशुल्कग्रहणं निन्दनीयम् आसीत् (मनु.३।५१)। मनुसंहितायाः आधारेण नारीणां परिरक्षणं तासां महत्वं मातृगौरवं कन्यायाः सम्मानं कन्यायाः मर्यादा इत्यादयः विन्दवः पत्रेऽस्मिन्परिचर्यायै गृहीताः सन्ति । मनुस्मृतिकालिकसमाजे नारीणां प्रतिष्ठामधिकृत्य किञ्चित् उपस्थापनाय अत्र मया चेष्टा विहितास्ति ।

कुञ्ची-शब्दाः – स्त्रियः, गायत्री, सावित्री, वेदजननी, पापनाशिनी ।

स्रष्टुः आदिमा सृष्टिः वेदः । पूर्णाङ्गरूपेण वेदज्ञानाय "वेदाङ्गम्"उद्भूतम् । वेदाङ्गस्य एकः भागः कल्पसूत्रम् । "धर्मसूत्रं" कल्पसूत्रस्य एकः विभागः । "मानवधर्मसूत्रं" तस्य अन्तर्गतम् । मानवधर्मसूत्रमेव मनुसंहितायाः उत्स इति मन्यते । वैदिकगृह्यसूत्रस्य

धर्मसूत्रस्य च छन्दोबद्धः सारभूतः ग्रन्थः मनुसंहिता । शतपथब्राह्मणस्य मनुमत्स्यकथायाम् उल्लिखितः अस्ति यत् वैवस्वतः मनुः एव मनुसंहितायाः रचयिता ।

वैदिककाले नारीणां स्थितिः विकसिता तथा उन्नता आसीत् । नारी न केवलं पत्नीधर्मं पालायमाना आसीत् । गृहस्य सा अलङ्काररूपा इति मन्यते । मेकडोनलकीथेत्येतयोः मतानुसारेण सम्मानदृष्ट्या समाजे परिवारे च नारीणाम् उच्चस्थानं भवति । अथर्ववेदे दृश्यते यत् पुरुषः एव प्राणः स्त्री च रयिः । पुरुषः सामवेदः स्त्री च ऋक् । पुरुषः द्युलोकः स्त्री च पृथिवी । नारीपुरुषौ परस्परस्य परिपूरकौ । [1]

उत्तरवैदिककाले नारीणां स्थितिः कीदृशी आसीत् तत् निश्चितरूपेण वक्तुं न शक्यते । नारीणां प्रशसांपरकश्लोकेभ्यः ज्ञायते यत् समाजे तासां महत्त्वपूर्णभूमिका अस्ति ।

मनुसंहितायाः सामाजिकाध्ययनेन प्रमाणितं भवति यत् समाजे केवलमात्रपुरुषस्य किमपि अस्तित्वं नास्ति । स्त्रीस्नेहेन सन्तानेन च पुरुषः पूर्णः भवति ।[2] मनुना यत्किञ्चित् उक्तम् तत् वेदाधारितम् ।[3] तेन तृतीयाध्याये उक्तम् यत् यस्मिन् कुले भार्य्यया भर्त्ता प्रीतो भवति भर्त्ता स्त्र्यन्तरभिलाषादिकं न करोति भार्य्या च स्वामिना प्रीता भवति तस्मिन् कुले चिरं श्रेयो भवति ।[4] पतीपत्नीसंयोगेन सुखमयसंसारस्य निर्माणं भवतीति अथर्ववेदे दृश्यते ।[5] गृहे कल्याणलक्षणापत्नीकारणात् देवराजस्य इन्द्रस्य जीवनमानन्दमयं भवति ।[6] यस्मिन् कुले स्त्रियः पूज्यन्ते तत्र देवताः प्रसीदन्ति तथा तत्र सर्वाः क्रियाः सफलाः भवन्तीति ।[7] यस्मिन् कुले स्त्रियः दुःखिन्यः भवन्ति तत्कुलं शीघ्रं निर्धनं भवति । यत्र न शोचन्ति तत्र धनादीनां

---

[1]अमोऽहमस्मि सा त्वं सामाहमस्म्यृक् त्वं द्यौरहं पृथिवी त्वम् । (अथर्व.१४/२/७१)

[2]एतावानेन पुरुषो यज्जायाऽऽत्मा प्रजेति ह । विप्राः प्राहुस्तथा चैतद्यो भर्त्ता सा स्मृताङ्गना ।। (मनु. सं. ९/४५)

[3]यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः । स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।(मनु.स.२/७)

[4]सन्तुष्टो भार्यया भर्ता भार्या तर्थेव च । यस्मिनेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ।। (मनु . सं. ३/६०)

[5]यद्यज्जाया पचति त्वत् परः परः पतिर्वा जाये त्वत् तिरः ।
सं तत् सृजेथां सह वां तदस्तु सम्पादयन्तौ सह लोकमेकम् ।। (अथर्व. १२/३/३९)

[6]अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरण गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ।। (ऋक् . ३/५३/६)

[7]यत्र नार्यस्तु पूज्यते रमन्ते तत्र देवताः । यत्रैतास्तु न पूज्यन्ते सर्वस्तत्राफलाः क्रियाः ।। (मनु. सं. ३/५६)

वृद्धिर्भवति ।[8] यस्मिन् कुले स्त्रियः अपूजिताः भूत्वा शापं ददति सः कुलःविनष्टः भवति ।[9] ऐश्वर्यं प्राप्त्यर्थयन्तः जनाः सत्कारे उत्सवे अवसरे च सर्वदा स्त्रीणां समादरं कुर्युः ।[10] वस्त्रभूषणादिभिः स्त्रियः शोभिताः चेत् कुलोऽपि शोभितः भवति । तासां मालिन्येन सम्पूर्णः कुलः मलिनः भवति ।[11] मनुमते पुत्रः पितुः आत्मा । परन्तु पुत्रवत् पुत्री अपि समानाधिकारभाक् भवति ।[12]

मनुना "गायत्री" "ओम्" च इति शब्दद्वयं सर्वश्रेष्ठं मन्यते । सवित्रा सह सम्बन्धकारणात् गायत्री सावित्रीति उच्यते ।[13] मनुसंहितायाम् एतद्विषये उच्यते यत् सावित्र्याः समं प्रकृष्टमन्यमन्त्रजातं नास्ति ।[14] शंखस्मृत्यानुसारं गायत्री इति वेदजननी पापनाशिनी च ।[15] शतपथब्राह्मणे स्त्रीणां हननम् अनुचितकार्यम् इति वर्ण्यते ।[16] मनुः अपि स्त्रीहत्याकारिणः कृते दण्डं निर्धारयति ।[17] मनुः कन्यां परोक्षरूपेण वेदपठनाय उपदिशति । वेदज्ञानरहितकुलस्य कन्यया सह विवाहः न करणीय इत्युक्तं तेन ।[18] तन्मते माता हि श्रेष्ठः गुरुः इति ।[19] दशोपाध्यायापेक्षया एकः आचार्यः शताचार्यापेक्षया पिता सहस्रपितुरपेक्षया माता हि गौरवेण अधिका भवति इति ।

---

[8]शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् । न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ।। (मनु. सं. ३/५७)

[9]जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः ।। (मनु. सं. ३/५८)

[10]तस्मादेताः सदा पूज्या भूषणाच्छदनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ।। (मनु. सं. ३/५९)

[11](क) यदि हि स्त्री न रोचते पुमांसं न प्रमोदयेत् । अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ।। (मनु. सं. ३/६१)

(ख) स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् । तस्यां त्वरोचमानायां सर्वमेव न रोचते ।। (मनु. सं. ३/६२)

[12](क) पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः । तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ।। (मनु. सं. ९/१३३)

(ख) पौत्रदौहित्रयोर्लोके न विशेषो नोपपद्यते । दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत् ।। (मनु. सं. ९/१३९)

[13]भूर्भुवस्स्वस्तत् सवितुर्वरेण्यम्भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति ।..... (जै. उप. .ब्रा. ६/४/२८)

[14]एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः । सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ।। (मनु.सं. २/८३)

[15]गायत्री वेदजननी गायत्री पापनाशिनी । गायत्र्या परमं नास्ति दिवि चेद् च पावनम् ।। (शंखस्मृतिः १२/११)

[16]स्त्री वा एषा यच्छ्रीर्न्न वै स्त्रियङ्घ्नन्त्युत त्वा अस्या जीवनस्य एवाददत इति। (शत.ब्रा. ११/४/३/२)

[17]कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् । स्त्रीबालब्राह्मणघ्नांश्च हन्याद्विट्सेविनस्तथा ॥ (मनु.सं. ९/२३२)

[18]हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकलानि च ।। (मनु.सं. ३/ ७)

[19]उपाध्यायान्दशाचार्य आचार्याणां शतं पिता । सहस्रं तु पितृन्माता गौरवेणातिरिच्यते ।। (मनु.सं. २/१४५)

मनुसंहितायाः द्वितीयाध्याये मनुना कन्यायाः नामकरणं कीदृशं स्यात् तद्विषये एकः श्लोकः प्रतिपादितोऽस्ति ।[20] मनुमतेन बुद्धिमान् पिता कन्यादानकाले स्वल्पमपि शुल्कं न गृह्णीयात् । लोभवशतः स्वल्पमपि गृहीतं चेत् सः अपत्यविक्रयकरणाय पापी भवति । विक्रयापराधेन निन्द्यते च ।[21]

ये बान्धवाः तथा पतिपित्रादयः दुहित्र्यादिधनानि गृह्णन्ति ते गृह्णानाः पापभागिनः नरकं गच्छन्ति ।[22] केचिदाचार्याः वदन्ति यत् आर्षविवाहे गोमिथुनं शुल्कं भवति । परन्तु मनुमतेन तदपि न कार्यमिति । भोगलोभेन तु धनलाभः विक्रयः।[23] कुल्लूकभाष्यानुसारं यासां कन्यानां प्रीत्या वरेण दीयमानं धनं पित्रादयः न गृह्णन्ति किन्तु कन्यायै समर्पयन्ति स न विक्रयः अपितु कन्यायाः पूजनमिति । मेधातिथिभाष्यानुसारं कन्यामधिकृत्य ये स्वार्थमाददते गृह्णन्ति वा तदा स विक्रयः ।[24] न केवलं विवाहकाले वरेण कन्यादत्तं धनं समर्पणीयम् । तदुत्तरकालेऽपि पित्र्यादिभिः भोजनादिभिः कन्याः पूजयितव्याः वस्त्रालङ्कारादिना भूषयितव्याश्च । कन्यामिच्छन्तः पुरुषाः कन्यामेवं सम्मानयन्ति । [25]

<u>निष्कर्षः</u>

एतत् निष्कर्षरूपेण एवं वक्तुं शक्यते यत् मनुकाले नारीणां स्थानं समाजे सम्मानास्पदमासीत् । साम्प्रतिककाले यथा तथाकथितसमाजविज्ञानिभिः आरोपः क्रियते यत् मनुना नारीणां कृते न्यायः न कृत इति तत् मनुस्मृतेः सम्यक् परिशीलनेन असत्यमिति प्राप्यते ।

(क) मनुना तस्य ग्रन्थे उल्लिखितमस्ति यत् यस्मिन् परिवारे स्त्रीणां सम्मानं नास्ति तस्मिन् परिवारे देवताः न तिष्ठन्ति ।[26] स्त्रियः परिवारस्य ऐश्वर्यसुख – शान्तीनां प्रतीकभूताः ।

---

[20]स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् । मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ।। (मनु.सं.२/३३)

[21]न कन्यायाःपिता विद्वान्गृहीयाच्छुल्कमण्वपि । गृह्णन् शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ।। (मनु .सं. ३/५१)

[22]स्त्रीधनानि तु ये मोहादुपजीवन्ति वान्धवाः । नारी यानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् । (मनु.सं. ३/५२)

[23]आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् । अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः । (मनु.सं. ३/५३)

[24]यासां नाददत्ते शुल्कं ज्ञातयो न स विक्रयः । अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ।। (मनु.सं. ३/५४)

[25]पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा । पूज्या भूषयिताव्याश्च बहुकल्याणमीप्सुभिः ।। (मनु.सं. ३/५५)

[26]यत्र नार्यस्तु पूज्यन्ते रम्यन्ते तत्र देवताः । यत्रैतास्तु पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।। (मनु .सं. ३/५६)

(ख) मनुमतानुसारं एका माता जगतः सर्वोच्चपूजास्थानीया भवति । एका माता सहस्रपितृभ्योऽप्यधिका इति । [27]

(ग) विवाहविषये मनुना उक्तं यत् वेदचर्चायुक्तपरिवारस्य कन्यया सह विवाहः करणीयः । अनेन ज्ञायते यत् वेदपठनरतपरिवारस्य कन्या वेदज्ञानविशिष्टा भवेत् । अनेन तस्याः संस्कारः समुच्चय: स्यात् । अत्र मनुना स्त्रीशिक्षाविषये संकेतः कृतोऽस्ति ।

(घ) बाल्यावस्थायां पितुः कौमारवस्थायां भ्रातुः यौवने पत्युः वार्धक्यकाले पुत्रस्य सहायतां समाश्रयति स्त्री । अनेन कन्यायाः सुरक्षा प्रकाशितास्ति । न तु अत्र स्वाधिकारभङ्गस्य प्रश्नः उदेति । सः प्रकाशयति यत् नारीणां रक्षार्थं तासां परिवारः वर्तते । परन्तु ताः न पराधीनाः इति आशयः । मनुना प्रकीर्त्तितं मातृगौरवं सर्वातिशायि ।

सहायकग्रन्थसूची

1. ऋग्वेद-संहिता, भाग-३, हिन्दी अनुवादकः पण्डित रामगोविन्द त्रिवेदी, चौखाम्वा विद्याभवन, वाराणसी, पुर्नमुद्रित संस्करण २००७।
2. मनुस्मृतिः, कुल्लुकभट्टविरचित मन्वर्थमुक्तावली, संस्कृत टीका एवं हिन्दीभाषानुवाद, भाग १म-२य , सम्पादक एवं अनुवादक राकेश शास्त्री, विद्यानिधि प्रकाशन, दिल्ली, २००५।
3. मनुस्मृति, पण्डित रामेश्वरभट्ट, चौखम्वा संस्कृत प्रतिष्ठान, दिल्ली, २०१५।
4. Astadasa Smriti, https://archive.org, Google Search.
5. Atharva Veda Saṁhitā, Vol. 1 &3, English Translation by W. D. Whitney, ed. by K. L. Joshi, Parimal Publication, Delhi-2009.
6. Jaiminiya or Tavalkar Upanishad Brahman, https://archive.org, Google Search.
7. Satapath Brahman, https://vedicheritage.gov.in, Google Search.
8. कुमारी, किरण. वैदिक साहित्य और संस्कृति, द्वितीयभागः, न्यू भारतीय बुक कॉर्पोरेशन, दिल्ली, २००१।

वसुधा प्रामाणिकः

BASUDHA PRAMANIK

(विशिष्टाचार्या छात्रा),
स्नातकोत्तरवेदविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी 752003।
POSTAL ADDRESS: FL-B/2, 34 GREEN PARK, BELGHARIA, KOL- 700056.
EMAIL. ID.: basudha310@gmail.com

***

[27] उपाध्यायान्दशाचार्य आचार्याणां शतं पिता। सहस्रं तु पितृन्माता गौरवेणातिरिप्यते ॥ (मनु.सं.२/१४५)

महामहोपाध्याय गोकुलनाथ-प्रणीत अमृतोदय में आत्मचिंतन

- अंकिता श्रीवास्तव

शोध सार –

आत्मतत्त्व को जानना ही अध्यात्म है अथवा आत्मविषयक चर्चा ही अध्यात्म है। आत्मान्वेषण में लगे रहना ही आध्यात्मिक होना है। भारतीय परम्परा में हम अध्यात्म का तात्पर्य तत्त्वज्ञान में समझ सकते हैं। आत्मतत्त्व से सम्बन्धित विभिन्न विचारों को हम दार्शनिक दृष्टिकोंण से दो भागो में बाँट सकते हैं – १. यथार्थवाद, २. प्रत्ययवाद। प्रस्तुत दार्शनिक नाटक में यथार्थवादी न्याय–दर्शन के मन्तव्यों को मुख्य रूप से श्रुतिप्रमाण के रक्षणार्थ तथा आत्मसिद्धि के प्रयोजनवशात् अमूर्त पात्रों के द्वारा अभिनीत किया गया है।

कुञ्ची शब्द – श्रवण सम्पत्ति, मनन सिद्धि, निदिध्यासन धर्मसम्पत्ति, तुरीयोऽयमात्मदर्शनम्, अपवर्ग प्रतिष्ठा।

वस्तुतः मस्तिष्क की उच्चतम अवस्था को पाश्चात्य मत में अध्यात्म कहा गया है जबकि औपनिषदिक ज्ञान परम्परा में शरीर, मस्तिष्क एवं आत्मा के सम्मिलित ज्ञान को अध्यात्म के रूप मे परिभाषित किया गया है। न्यायभाष्यकारः कथयति – इह तु अध्यात्मविद्यायामात्मादिज्ञानं तत्त्वज्ञानं निःश्रेयसाधिगमोऽपवर्गप्राप्तिरिति।[1] तर्क के द्वारा मूलतत्त्व तक पहुँचना न्याय का वैशिष्ट्य है परन्तु ऐसा एक भी तर्क जो वेद के अनुकूल नहीं है, बादरायण की दृष्टि में निरर्थक ही है, यथा राधाकृष्णन् के अनुसार तर्क अन्तर्दृष्टि सम्बन्धी ज्ञान के अधीन है और यह अन्तर्दृष्टि भक्ति तथा समाधि के द्वारा ही प्राप्त हो सकती है।[2] महामहोपाध्याय गोकुलनाथ प्रणीत प्रस्तुत नाटक में क्रमशः पाँच अंक हैं –

१. श्रवण सम्पत्ति
२. मनन सिद्धि
३. निदिध्यासन धर्मसम्पत्ति
४. तुरीयोऽयमात्मदर्शनम्
५. अपवर्ग प्रतिष्ठा

---

*, संस्कृत विभाग, दिल्ली विश्वविद्यालय, दिल्ली। कार्य क्षेत्र – दर्शन, sriankita1094@gmail.com

[1] झा डा० किशोरनाथ, न्यायदृष्ट्या आत्मवादानुचिन्तनम्, पृ० २१। आत्मादिद्वादशविधानां प्रमेयाणां तत्त्वसाक्षात्कारात् तत्रापि मुख्यतया आत्मसाक्षात्कारात् अपवर्गस्य लाभः इति।

[2] डा० राधाकृष्णन्, भारतीय दर्शन, द्वितीय भाग, पृ० ३७३

नाटक के प्रथम अंक में प्रस्तावना के अन्तर्गत साधन चतुष्टय सम्पन्न पुरुष का वर्णन किया गया है। साधन चतुष्टय सम्पन्न पुरुष ही आत्मविद्या का अधिकारी होता है अतः तदनन्तर श्रवण सम्पत्ति को नाटकीय ढंग से प्रस्तुत किया गया है। श्रवण से यहाँ श्रावण प्रत्यक्ष से आशय नहीं है अपितु वेदादिदृष्ट एवं गुरोपदेशयुक्त शब्दप्रमाण से उत्पन्न यथार्थ शाब्दबोध ही श्रवण सम्पत्ति है ।[3] द्वितीय अंक में मनन सिद्धि हेतु दृश्य उपस्थित हैं। मनन का तात्पर्य वेदादि का अविरोधी तर्कों द्वारा समर्थन करना है। वेदान्तपरिभाषा के अनुसार, मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधाशङ्कायां तन्निराकरणानुकूलतर्कात्मकज्ञानको मानसो व्यापार । इससे श्रवणज्ञानजनित संस्कार परिपक्व हो जाते हैं। तत्पश्चात तृतीय अंक में निदिध्यासन अथवा ध्यान का वर्णन है जिसके द्वारा आत्मदर्शन रूपी फल की प्राप्ति होती है। कहा भी गया है –

"श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शन हेतवः"।

इसी प्रकार उदयनाचार्य न्यायकुसुमाञ्जलि के प्रारम्भ में कहते हैं – "न्यायचर्चेयमीशस्य मननव्यपदेशभाक्। उपासनैव क्रियते श्रवणानन्तरागता"। चतुर्थ अंक में तुरीयरूप पुरुष के आत्मदर्शन का वर्णन किया गया है। और आत्मदर्शन के फलस्वरूप न्यायसम्मत मोक्ष, अपवर्ग की प्राप्ति में ही नाटक का अवसान है। बृहदारण्यकोपनिषद् में याज्ञवल्क्य स्वपत्नी मैत्रेयी से कहते हैं कि यदि तुम्हे मुक्ति की इच्छा है तो आत्मतत्त्व का मानस साक्षात्कार अनिवार्य है तथा वह श्रवण, मनन एवं निदिध्यासन के विना सम्भव नहीं है ।[4] वस्तुतः गोकुलनाथ न्यायशास्त्र का आध्यात्मिक सिद्धि के प्रति उपयोगिता बताने के लिये ही इस ग्रन्थ की रचना में प्रवृत्त हुए होंगे ।[5]

श्रवण सम्पत्ति –

आत्मज्ञान के मार्ग का प्रथम शास्त्र–प्रतिपादित सोपान है – श्रवण। वेद–वाक्यों एवं तदनुरूप गुरोपदेश को श्रद्धा पूर्वक सुनना ही श्रवण है। प्रस्तुत नाटक में आन्वीक्षिकी द्वारा रक्षित श्रुति की प्रमिति ही श्रवण सम्पत्ति है तथा यह सम्पत्ति केवल साधन–चतुष्टय युक्त पुरुष को ही प्राप्त हो सकती है। साधन चतुष्टय के अन्तर्गत विवेक, वैराग्य, शमादि षट–सम्पत्ति एवं मुमुक्षत्व आते हैं। विवेकादि से युक्त होनें पर भी वेद–वाक्यों में बौद्ध–मत के प्रभाववश अश्रद्धा उत्पन्न होने से श्रवण रूपी प्रयोजन की सिद्धि संभव नहीं थी अतः नाटक का नायक पुरुष श्रुति–प्रामाण्य के अभाव में दिग्भ्रमित सा हो गया ।[6] तर्कप्रधान आन्वीक्षिकी प्रमुख रूप से तथा अन्य तीन परिवार–विद्याएँ – त्रयी, वार्ता एवं दण्डनीति श्रुति– प्रामाण्य के रक्षणार्थ प्रयासरत हैं, यथा लोकविदित है कि बौद्ध–मत के प्रभाव से कुछ काल के लिये वेदों की

---

[3] वेदान्तपरिभाषायां तु वेदान्तानां तात्पर्यावधारणानुकूलमानसक्रियारूपेण श्रवण पदार्थ लक्षणं विहितमस्ति । झा डा० किशोरनाथ, न्यायदृष्ट्या आत्मवादानुचिन्तनम्, पृ० २१

[4] आत्मावाऽरेश्रोतव्यःमन्तव्यःनिदिध्यासितव्यः।

[5] अमृतोदयम्, पृ० १९।

[6] प्रभवति मतये पदप्रबन्धो, न तव निरत्ययनित्यचेतनस्य। न भजसि करुणामतोऽसुरारे, मम कृपणैः परिदेवितप्रपञ्चैः ।। १/१९।।

प्रामाणिकता पर संशय की स्थिति बन गयी थी परन्तु न्यायाचार्यों नें अन्य विद्याओं के सम्मिलित प्रयास से बौद्ध–आक्षेपों का खण्डन किया था। न्याय के वैशिष्टय को प्रकट करते हुए गोकुलनाथ कहते हैं – जो अक्षपाद के उपासक हैं उनके भाग्य में स्वयं ब्रह्मा भी अदृष्ट लिपि वाला होना नहीं लिख सकते।[7] प्रमिति पर मिथ्यादृष्टि (नास्तिकता) की पुत्री संभावना की दृष्टि पडने के कारण वह पुरुषोत्तम की सत्ता के प्रति संदेहग्रस्त हो गयी जिसे नास्तिक दर्शनों के प्रभाव स्वरूप यहाँ वर्णित किया गया है। वस्तुतः बौद्धों द्वारा शब्द–प्रमा के खण्डन में 'संभावनामात्रोत्थापकत्वं शब्दानाम्' यह युक्ति उपस्थापित की गयी थी जिसका मीमांसा के द्वारा खण्डन किया गया था। वैशेषिक विद्या चूँकि अल्पप्रमाण है अतः वह प्रमिति की रक्षा करनें में अक्षम है[8], सांख्य भी आत्मविद्या के पोषक वेदों के आस्तिक मत के रक्षणार्थ समर्थ नहीं है क्यूँकि वह किसी कर्ता के रूप में पुरुष की सत्ता को स्वीकार ही नहीं करता अतः प्रस्तुत नाटक में उसे प्रकृति–विकार से युक्त बताया गया है। न्याय के महत्त्व को प्रतिपादित करते हुए कवि के अनुसार स्वभावतः दुर्बल परिवार–विद्या का समुदाय आन्वीक्षिकी द्वारा ही रक्षित है परन्तु वेदों का प्रामाण्य ही जडप्रधान आन्वीक्षिकी को भी प्रामाण्य प्रदान करता है[9] अतः श्रवण रूपी प्रयोजन की सिद्धि हेतु वेदों के प्रामाण्य की रक्षा अनिवार्य है। आन्वीक्षिकी वेद–प्रामाण्य कि महिमा बताते हुए कहती है – 'भगवती, त्वदुपजीवनधनाः परपरिमर्दनाय प्रगल्भन्ते परिवारविद्याः'। तर्क का ही आश्रयण करके प्रभाकर गुरु नें संभावना का खण्डन करके प्रमिति का अधिकरणों (अधिकरणानि–पञ्चाङ्गन्यायास्तेषां प्रसाधनैः विषयादिनिर्देशपुरस्सरं दर्शनैः) द्वारा प्रसाधन किया। प्रमिति की दृढता हेतु मीमांसकों के द्वारा विध्यर्थशून्य वेदभागों को अप्रामाणिक तथा धर्मसंहिताओं को अनावश्यक मानने पर बादरायणी विद्या(ब्रह्म विद्या) द्वारा पुराणों के प्रामाण्य की एवं आन्वीक्षिकी द्वारा धर्मसंहिताओं के प्रामाण्य की रक्षा की गयी क्यूँकि अध्यात्म–मार्ग तक पहुँचने मे ये सभी भिन्न–भिन्न ढंग से उपकारक हैं। आन्वीक्षिकी शास्त्र के उपदेष्टा गौतम, वात्स्यायन, उद्योतकर तथा वाचस्पति द्वारा प्रणीत शास्त्रों के द्वारा प्रमिति के रक्षणोपरान्त भी पुरुष का वेद–वचनों के प्रति सन्देह नष्ट नहीं होता है अर्थात् वेदोपदेशों के श्रवणोपरान्त भी आत्मग्रन्थि का भेदन संभव नहीं है अतः श्रवण आत्मबोध का प्रारम्भिक चरण है।

मनन –

मनन उपपत्तियों द्वारा किया जाता है तथा उपपत्ति में अनुमान का प्रयोग आवश्यक है यथा अनुमिति[10] के द्वारा ही श्रवण द्वारा अर्जित ज्ञान को स्थिरता प्राप्त होना संभव है। मनन के अन्तर्गत जितने भी विरुद्ध तर्क संभव थें सबका उपन्यास करके खण्डन किया गया है।

---

[7] मिलति नयनमक्षपादः प्रणिपतनेन ललाटसीम्नि यस्य, विधिरपि पुरुषस्य तस्य भाले लिखितुमदृष्टलिपिं कुतः क्षमेत ।। १/२३ ।।

[8] नूनमल्पप्रमाणतया विभेति परेभ्योवत्सा काश्यपी । पृ० ५१ ।

[9] जडवपुषि शुचित्वमादधाति प्रतिफलितो मयि ते प्रमाणभावः ....।। १/२८ ।।

[10] परामर्शजन्यं ज्ञानमनुमितिः ।

व्याप्ति[11] को यहाँ कञ्चुकी के रूप में एवं साधनसिद्धि को चेटि के रूप में वर्णित किया गया है। कथाओं (वाद,जल्प एवं वितण्डा) द्वारा पक्षता[12] तथा परामर्श[13] के मिलन हेतु प्रयास किया जाता है। कथाएँ विप्रतिपत्ति[14] के मुख से पक्षता को उपपादित करती हैं। यद्यपि व्याप्ति तथा साधनसिद्धि के मिलने से ही पक्षता एवं परामर्श का मिलन संभव है तथापि हेत्वाभास इसमे बाधक है। मीमांसा मत में व्याप्ति तथा साधनसिद्धि का मेल अनावश्यक है जबकि आन्वीक्षिकी मीमांसा के इस मत की विरोधी है।[15] अनुमिति की उत्पत्ति हेतु नैयायिकों एवं मीमांसकों में मतभेद परिलक्षित होता है, मीमांसक पक्षता को न स्वीकारते हुए दो प्रकार के ज्ञान द्वारा ही अनुमिति की उत्पत्ति मानते हैं जबकि नैयायिक पक्षता तथा परामर्श के मेल से अनुमिति की उत्पत्ति को लाघव मानते हुए मीमांसा सिद्धान्त को गौरववान् बताते हैं।[16] मीमांसकों द्वारा पक्षता एवं परामर्श के प्रति उदासीनता परिलक्षित होती है क्योंकि वे बिना पक्षता को स्वीकार किये ही परामर्श के दो खण्ड करके अर्थात् ज्ञान के दो स्वरूपों से समस्त कार्यों का निर्वहन करते हैं।[17] मनन रूपी प्रयोजन की सिद्धि हेतु अनुमान प्रमाण के द्वारा परमतत्त्व की स्थापना आवश्यक है जिससे पुरुष वेद–वाक्यों पर विश्वास करके आत्मलाभ प्राप्त कर सके। चार्वाक जैसे भौतिकतावादी विचारक अनुमान को नहीं मानते अतः उदयनाचार्य नें तर्कों के माध्यम से पक्षता तथा परामर्श की रक्षा की, क्यूँकि अनुमिति से युक्त होकर ही पुरुष सिद्धि (स्वस्वरूपावस्थिति) प्राप्त कर सकता है।[18] मनन के उपरान्त भी पुरुष के आत्मज्ञान में दृढता तो आती है परन्तु जिस प्रकार सूर्य संध्या के समय भी राग से मुक्त नहीं होता ठीक उसी प्रकार मनन के उपरान्त भी अपरोक्षमोहजनित राग से पुरुष निवृत्त नहीं हो पाता है।[19]

निदिध्यासन –

श्रवण तथा मनन के द्वारा आत्मावबोधन हेतु निर्वेद की जो भूमिका है वही वास्तव में विवेक है। निदिध्यासन हेतु योग मार्ग का आश्रयण आवश्यक है। निर्वेद की दृढ भूमि पर श्रद्धाविविदिषा नामक साक्षात् चिकिर्षा उत्पन्न होती है। निर्वेद पुरुष से चञ्चला–लक्ष्मी,

---

11 व्यभिचाररहितनिरुपाधिहेतुकसाहचर्यनियमो व्याप्तिः।

12 पक्ष में उसके लिंग (हेतु) की सत्ता को पक्षधर्मता कहते हैं। यथा – पर्वत पक्ष है और पर्वत पर धुएँ का होना पक्षधर्मता है।

13 व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। – तर्कसंग्रह

14 दो विरुद्धार्थक वाक्यों का उच्चारण विप्रतिपत्ति है, जैसे – शब्दोऽनित्यः कार्यत्वात् घटवत्, नित्यः शब्दः श्रावणत्वात् शब्दत्ववत्। इन दो वाक्यों को सुनकर साध्यसंदेह रूपी पक्षता उत्पन्न होती है कि शब्द नित्य हैं अथवा अनित्य।

15 अन्यत्र हेतौ पक्षधर्मता, अन्यत्र च व्याप्तेर्ज्ञानमनुमितिहेतुः, ज्ञानद्वयसाधारणी च परामर्शस्य कारणतेति* मीमांसकानां मतेन न्यायमतस्य विरोधोऽत्र मतभेदो मीमांसाऽऽन्वीक्षिक्योर्मतभेदः।

16 विशिष्टपरामर्शस्य कारणत्वे शरीरलाघवम्, इतरथा ज्ञानद्वयस्य कारणत्वे गौरवमिति सूचितम्।

17 व्याप्तिविशिष्टपक्षधर्मता ज्ञानं परामर्शः इति हि नैयायिकानां परामर्शस्वरूपम्, वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्श इति च प्रादेशिकं तदुदाहरणम्, तत्र मीमांसकाः – धूमो वह्निव्याप्यः इत्येकम् धूमवाँश्च पर्वतः इत्यपरमिति ज्ञानद्वयमेव अनुमितिसाधनं स्वीकुर्वते,।। प्रकाश संस्कृत टीका, पृ० ९०।।

18 हा, कथमापतन्नेव चार्वाकवीरोऽयमुदयनकरतुन्नशरभिन्नवर्मा प्राणानपहाय पतितः। पृ० ९६।

19 यदपि सृजति पूर्ववन्न तापं समयवशेन विलीनपश्चिमार्धः। अवतमसमलीमसं तथापि त्यजति न रागसमागमं पतङ्गः।। २/२९।।

कल्पवृक्ष तथा चिन्तामणि को निरर्थक बताते हुए कहता है कि यदि ये जठरानल की अग्नि को शान्त करनें में समर्थ होते तो सबसे पहले अपने पिता समुद्र के जठर में जलती हुई बडवाग्नि को ही शान्त करते[20] अतएव पुरुष को श्रद्धावान् होना चाहिये क्यूँकि प्रबल अर्थलोभ तथा काम की निवृत्ति वेदों में श्रद्धा से ही हो सकती है। प्रमिति से युक्त होने पर भी पुरुष अनुमान द्वारा सिद्ध पुरुषोत्तम के अभाव में मोह के अत्यधिक बढ जाने पर वेदों को अप्रामाणिक मानते हुए कहता है कि अज्ञातकुलशील पिता की पुत्री श्रुति स्वयं जब कुलशुद्धि का दावा नहीं कर सकती है, तब अकुलीन माता से उत्पन्ना प्रमिति पर पुरुष किस प्रकार प्रामाण्य विश्वास करे।[21] अतः पुरुषोत्तम की स्थापना हेतु श्रुत्यादिष्ट आन्वीक्षिकी परामर्श एवं पक्षता के मेल हेतु प्रथमा कथा वाद[22] को नियुक्त करती है जिससे परामर्श और पक्षता के मेल से अनुमिति उत्पन्न होती है। अनुमिति को सभी दर्शनों के मत में बताते हुए गोकुलनाथ कहते हैं, अन्तःकरणाय बादरायणी, बुद्धिसत्त्वाय कापिली, चिदालयसंतानाय सौगतीसंहिता ......गौतमी काणादी जैमिनीया च पुरुषात्कर्तुमीहन्ते । अतएव न्याय द्वारा उपस्थापित अनुमिति से ईश्वर को जानकर पुरुष विविदिषा (जिज्ञासा) से युक्त होकर पुरुषोत्तम तक पहुँचता है जिससे श्रुति के अकुलीनत्व संशय का उच्छेद हो जाता है। न्यायकुसुमाञ्जलि के समान ही[23] न्यायोचित अनुमान प्रमाण के द्वारा ईश्वर का वर्णन करते हुए कहते हैं – नित्यज्ञान, नित्यइच्छा तथा नित्यप्रयत्नशाली सर्वात्मना नित्य जिस पुरुष की सिद्धि के हेतु – कार्य, वाक्य, संख्या, श्रुति, पद, धृति, प्रत्यय एवं आयोजन हैं, ऐसा कार्यमात्र का कर्ता, संसार तथा वेद का धर्ता एवं वेद का वक्ता, संसार का आश्रय एवं चैतन्य का आश्रय वह पुरुष सर्वोत्कृष्ट है[24]। आत्मज्ञान की सिद्धि हेतु प्रमिति एवं अनुमिति से युक्त पुरुष के लिए योग–मार्ग का आश्रयण करना अनिवार्य है। अनुमिति द्वारा ईश्वर–सिद्धि होने के उपरान्त भी पुरुषोत्तम के मानस–साक्षात्कार हेतु पुरुष परमात्मा को सम्बोधित करते हुए कहता है – हे कितव, तुम्हारी दृष्टि श्रुतिपर्यन्तगामी है अर्थात् वैदिक धर्माधर्म पर्यन्तगामी है .....तुम संसार के मुख (प्रमुख) हो, मैं नहीं समझ पा रहा हूँ तुम किस दर्पण में उतरोगे ?, अर्थात् निर्विकल्पक समाधि रूप दर्पण में प्रतिफलित होनें वाले परमात्मा क्या दृष्टि पथ में नहीं आ सकते ? इस प्रकार पुरुष के करुण विलाप को सुनकर पतञ्जलि उसे सिद्धि[25] से युक्त करने हेतु महाव्रतों[26] का आह्वान करते हैं। सिद्धि प्राप्ति के प्रयास में नियमों के पालन से वैराग्य एवं मुमुक्षत्व सम्पन्न पुरुष तप, स्वाध्याय तथा ईश्वर–प्रणिधान रूपी क्रियायोग से पवित्र

---

20 अमृतोदयम्, पृ० १०५।

21 अपरिचिततातजन्मा .....।। ३/८ ।।

22 वाद को परिभाषित करते हुए गौतम कहते हैं – प्रमाणतर्कसाधनोपालम्भः सिद्धान्तविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।

23 कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः। वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः ।। – न्यायकुसुमाञ्जलि।

24 अमृतोदयम, ३/१०।

25 सिद्धिम् योगजधर्मम्। स एव योगजो धर्मः परमात्मसाक्षात्कारे हेतुरिति बोध्यम् ।।

26 महाव्रतपरिभाषा पातञ्जलयोगसूत्रे यथा – जातिदेशसमयानवच्छिन्नाः सार्वभौमामहाव्रतम् इति।

होता है । ईश्वर के प्रति अपने सम्पूर्ण कर्मों का समर्पण[27] करके अनन्तर प्राणायाम तथा प्रत्याहार के द्वारा विषयों से इन्द्रियों का निवर्तन करणीय है । आत्ममार्ग के पथिक को यह भ्रम हो सकता है कि श्रुति जब स्वयं राग–द्वेष से युक्त प्रवृत्ति में अर्थात् स्वर्गादि सुखों में स्वकथनों द्वारा नियुक्त करती है तो पुनः निवृत्ति का उपदेश देकर विरोधाभास क्यूँ उत्पन्न करती है ? इसके उत्तर में पतञ्जलि कहते हैं, - 'निसर्गसुन्दरस्यापवर्गस्य साम्राज्यमभिसंधाय सर्वमचेष्टत भगवति श्रुतिः' । सत्य ही है सकाम प्रवृत्ति विधियाँ अन्ततः निवृत्ति में ही पर्यवसित होती हैं । अध्यात्म–ज्ञान के क्रम में पुरुष द्वारा वेद–प्रामाण्य में श्रद्धा हेतु प्रमिति से युक्त होना, तत्पशचात् श्रद्धा के द्वारा परमात्मा को अनुमित करने और तदुपरान्त योगमार्ग से सिद्धि की प्राप्ति के पश्चात् भी न्यायमत में मोह के मूलनाश हेतु पुरुषोत्तम से मिलना आवश्यक है परन्तु मधुमती[28] भूमिका बाधक बनकर पुरुष को विषयभोग की ओर आकृष्ट करनें में सक्षम है अतः पुरुष को सिद्धि के द्वारा पुरुषोत्तम प्राप्ति की ओर उन्मुख होना ही चाहिये ।

तुरीयोऽयमात्मदर्शन –

योग–प्रतिपादित संयम के द्वारा पुरुष को समाधि–सिद्धि की प्राप्ति हुई जिसके फलस्वरूप आत्मवित् पुरुष आत्मस्वरूप को उद्घाटित करते हुए कहता है कि परमात्मा के प्रकाश से अविद्या रात्रि का नाश होने पर सर्वत्र आत्मभूत होकर ही देखते हुए पुरुषोत्तम से व्यतिरिक्त स्वयं को नही देखता हूँ । आत्मज्ञान के क्रम में मनुष्य पुरुषोत्तम को प्राप्त कर लेने के पश्चात् इस भौतिक जगत् को निरर्थक मानने लगता है परन्तु संसार रचना को निरर्थक न मानते हुए गोकुलनाथ इसे सकारण (लीला आदि) कहते हैं, यथा न्याय सूत्र मे भी उक्त है – करुणावश सृष्टि रचना करना[29], तथा प्रशस्तपाद के मतानुसार प्राणियों के भोगसम्पादनार्थ सृष्टिरचना करना[30], उद्योतकर के अनुसार स्वभाववश सृष्टिरचना करना[31] एवं माण्डूक्यकारिका में भी आप्तकाम–ईश्वर की लीला के रूप में जगत वर्णित है[32] । बिना ईश–समर्पण के स्वयं का तात्विक ज्ञान असंभव है अतः तत्वज्ञान हेतु पुरुष परुषोत्तम के अधीन एवं अनन्यशरण है ।[33] ईश्वर को निर्गुण कहकर सम्बोधित किया जाता है किन्तु न्याय ने ईश्वर में पाँच सामान्य तथा नौ विशेष गुण माने हैं, इसी को प्रकट करते हुए आत्मज्ञानोन्मुख पुरुष कहता है – तुम जीव के बुद्धि, सुख, दुख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म, संस्कार रूप गुणों को अपहृत करते हो

---

27 मम भवपथिकस्य कर्म भोग्यं प्रलयनिशि त्वमपालयः शयालोः । इति सकलमकिंचनो बुभूषुः प्रहरकवेतनमेतदर्पयामि ।। ३/२१ ।।

28 समाधि साक्षात्कृतव्यवहित विप्रकृष्ट वस्तुसमुत्थो भोगो मधुमती इति योगभाष्यम् ।।, प्रकाश टीका, पृ० १४१ ।

29 आप्तकल्पश्चायम् । यथापिताऽपत्यानाम्, तथा पितृभूत ईश्वरो भूतानाम् । न्यायसूत्र, ४/१/२१ ।

30 प्रशस्तपादभाष्य ।

31 किमर्थंहि करोतितत्स्वभाव्यात् प्रवर्तत इत्यदुष्टम् । न्याय वार्तिक ।

32 भोगार्था सृष्टिरित्यन्ते क्रीडार्था इति चापरे । देवस्यैषा प्रभावोऽयं आप्तकामस्य का स्पृहा ।। माण्डूक्यकारिका १.९ ।

33 ननु ममानन्यशरणतया त्वदायत्तता प्रथमो हेतुः । पृ० १५४ ।

एवं फिर भी अपनी विगुणता प्रख्यायित करते हो ।[34] वस्तुतः न्यायमत में सभी प्रकार के सुख दुःख की ही श्रेणी में आते हैं एतदर्थ पुरुषोत्तम का आश्रयण एवं अनाश्रयण दोनो ही सुखदायी नही हैं यथा पुरुष की उक्ति है कि यदि मैं ईश्वर से वियुक्त होता हूँ तो जन्मादि के वश मे हो जाता हूँ तथा यदि मैं उनसे युक्त होता हूँ तो सागर में नदी के समान मेरा अस्तित्व ही समाप्त हो जाता है[35] अतः मुक्ति ईश्वर से भिन्न तत्व है। पुरुष के निर्मल वचनों से प्रसन्न पुरुषोत्तम कहते हैं – वत्स बन्धविध्वंसिनी अनादि[36] आदि[37] प्रकृति का अनुग्रह प्राप्त करो। तदनन्तर संयमवश उपस्थित अप्रतिहत भौतिक चक्षु के द्वारा पुरुष ईश्वर के स्वरूप को बताते हुए कहता है – आप पहले विभाग रहित एक थें, बाद में यह ब्रह्माण्ड–बिन्दु (शून्य) पैदा हुआ, (इस तरह १ पर ० होने से) गणित शास्त्र के अनुसार– हे दिक्पति, तुमसे दिशाएँ भी उत्पन्न हुईं ।[38] वैराग्य हेतु पुरुषोत्तम अन्तर्मुख एवं संयत चित्त के द्वारा पुरुष को ईश्वरीय संहरण–लीला[39] के ध्यान हेतु निर्देश देते हैं। ततः पुरुष ईश्वर की सर्ग लीला का वर्णन करते हुए कहता है , कि वह प्रलय की अग्नि से दग्ध शेष परमाणुओं के समुदाय को एकत्र करने मे मुनिजन सेवित पवित्र शिलोञ्छवृत्ति[40] का अवलम्बन करके त्रिभुवन की सृष्टि करते हैं और उस त्रिभुवन में प्राणियों के अदृष्ट से प्रेरित परमाणुओं द्वारा शरीर का निर्माण किया करते हैं ।[41]

पुरुषोत्तम की महत्ता –

परमात्मा के साक्षात्कार के अनन्तर ही समूल विशेष गुणों के उच्छेदरूप मोक्ष की प्राप्ति होती है ऐसा कणाद ऋषि का मत है ।[42] पुरुष ईश्वर–तत्त्ववित् होकर कहता है कि एक व्यवहारकर्ता तथा एक आदेश दाता इस प्रकार दो कृत्रिम शरीरों का निर्माण करके सृष्टि के आदि में ईश्वर ही शब्दों के संकेत का ज्ञान करा देते हैं, जिसके द्वारा **संप्रदाय**[43] से लोकहित सिद्ध होता है ।[44] वेदों के ईश्वरवाक्य होनें में प्रमाण देते हुए गोकुलनाथ कहते हैं – हे निवृत्ति धर्म के उपदेशक आचार्य , विधि – अपूर्व, कार्य, तत्त्व, आशय या हितसाधनता विधि इनमें

---

[34] अचिरपरिचितो हरे समूलं हरसि विशेषगुणव्रजं परस्य। प्रथयसि खलतामिमामपूर्वां कथयसि यद्विगुणत्वमात्मनोऽपि ।।४/१७।।

[35] क्वचिदपि विषये त्वया वियुज्य स्थितिमनवाप्य चिराय संसरामि। भवगिरिसरिदस्मि चित्समुद्र स्वमपि जहामि तदा लभे यदि त्वाम् ।। ४/२२ ।।

[36] अजन्मानम्, तथा चाहुर्वेदान्तिनः – जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा अविद्या तच्चितोर्योगः षडस्माकमनादयः ।इति।

[37] आदि प्रकृतिम् = सर्वजननीम् मायाम्।

[38] अमृतोदयम्, ४/३६।

[39] सृष्टि लीलाध्यानपेक्षया संहारलीलाध्यानस्य वैराग्यप्रकर्षसम्पादकतयाऽन्तर्मुखचित्तवेद्यत्वमुच्यते ।। प्रकाश टीका, पृ० १८१।

[40] उञ्छः कणश आदानं कणिशाद्यर्जनं शीलम् इति यादवः। प्रकाश टीका, पृ० १९०।

[41] प्राण्यदृष्टवशादेवेश्वरस्य शरीरपरिग्रहो नहि तस्यात्मनीनमदृष्टमस्ति – अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् इति श्रुतेर्भगवतोऽदृष्टस्य प्रतिषेधात्)– पृ० १९०

[42] प्रकाश टीका, पृ० १६५।

[43] सम्प्रदायो नाम शिष्योपाध्यायसम्बन्धस्याविच्छेदेन शास्त्रप्राप्तिः।

[44] ननु कृतकलेवरद्वयेन व्यवहरता च निदेशदायिना च। अवगमितपदप्रवृत्तिमादौ कवयसि लोकहिताय संप्रदायम् ।। ४/४९ ।।

कुछ भी हो, परन्तु भ्रम–प्रमादादि दोष से रहित आपके बिना श्रुति की प्रामाणिकता नहीं हो सकती है – सम्प्रदायप्रामाण्यार्थे मूलभूतत्वत्प्रत्यक्षप्रामाण्यमवश्यमपेक्षणीयं भवतीति भावः ।[45] आत्मवित् पुरुष के अनुसार पुरुषोत्तम के सभी उपदेश निवृत्तिपरक ही हैं प्रवृत्तिमार्गी प्रतीत होने पर भी । ईश्वर की महिमा को व्यक्त करते हुए कहते हैं कि यदि वेदों का तात्पर्य यज्ञों मे भी मान लें तो भी यज्ञों का तात्पर्य तो ईश्वर मे ही प्रकट है । पुरुषोत्तम का शरीर परमाणु–शरीर है । निदिध्यासनोपरान्त जगतोत्पत्ति को सकारण मानते हुए पुरुष कहता है कि जो जगत सान्त है वह अकस्मात् बिना किसी खास कारण के हो नहीं सकता है, प्रकृति तो धर्माधर्म – स्वरूप है अतः वह कारण नहीं है हो सकती वरन् वह तो पुरुष का गुण है, उससे जगत की उत्पत्ति कैसे माना जा सकता है[46] अतः ईश्वर को जगत का निमित्त कारण मानते हुए पुरुष कहता है, आप विभु हैं, आपमें जन्मादि विकार का सम्बन्ध नही है, तथा आप जगत के उपादान कारण नहीं हैं क्यूँकि आपमें यह भूतसृष्टि कैसे रह सकेगी[47] । पुरुष जब कर्ता तथा चेतन में अभेद की भावना करता है तब उसे ईश्वर एवं स्वयं के बीच जड प्रधान व्यवधान सा प्रतीत होता है जिनसे केवल पुरुष ही आवृत्त होता है पुरुषोत्तम नहीं इस प्रकार ईश्वर का अच्छी तरह विचार करनें पर द्वैत ही समाप्त हो जाता है । पुरुषोत्तम का तात्विक ज्ञान आत्मा के तत्त्व – ज्ञान का जन्मदाता होता है, अतः तद्ज्ञानवान् पुरुष आत्मा के स्वरूप को बताते हुए कहता है कि मैं पृथ्वी, जल, या वायु नही हूँ, आकाशरूप भी नहीं हूँ, इसलिए इन्द्रिय अथवा देह–स्वरूप भी नही हूँ और न समय या दिशा–रूप हूँ, अथवा चित्स्वरूप हूँ, हे पुरुषपुरन्दर, मैं तो आपका पुरुष हूँ ।पुरुष उपनिषद्वाक्यों से इतर पुरुषोत्तम को चेतनामय मानता है ।[48] न्यायाभिमत पुरुषोत्तम के अनुसार, पुरुष एवं ईश्वर दोनों ही नित्य हैं, उनमे से किसी भी एक का विलय नहीं संभव है अतः पुरुषोत्तम के साथ भेदाभेद ताटस्थ्य के द्वारा तथा अन्य समस्त विषयों का परिहार करके अपनी आत्मा की भावना करनी चाहिये, मेरा तात्त्विक ज्ञान निश्चय ही पुरुषों के आत्मसाक्षात्कार में उपयोगी होता है । निदिध्यासन के द्वारा अनारब्ध कर्मसमूह का नाश हो जाता है जिससे मनुष्य को आवागमन के चक्र से मुक्ति मिलती है तथा विवेक रूपी प्रदीप के प्रज्ज्वलित होने से महामोह एवं राग–द्वेष के नाश भी हो जाता है । नैयायिक सभी प्रकार के सुखों को हेय (दुःख) ही मानते हैं अतः कहा गया है –
सुखकामः परानन्दमप्राप्यैहिकमिच्छति । अभावे मत्तकाशिन्या दृष्टा तिर्यंक्षु कामिता ।। ४/८२ ।।

---

[45] भवतु विधिरपूर्वकार्यतत्त्वाशयहितसाधनताभिदासु कश्चित् । तदपि मुषितदोषमन्तरा त्वां न भवितुमर्हति चोदना प्रमाणम् ।।४/५१ ।। लिंगार्थभेदे आचार्यभेदेन महान्मतभेदोऽस्ति, अपूर्व संकल्पो विधिरित्येकदेशिनः, कार्ये विधिरिति प्राभाकराः, कार्यतत्त्वं कार्यता तत्र लिंगो निरुढलक्षणेत्यपि केचन प्रभाकरानुवर्तिनः, आशय आप्ताभिप्रायो लिंगर्थ इत्युदयनाचार्याः, इष्टसाधनता लिंगर्थ इति मिश्राः, अभिधा लिंगर्थ इति कुमारिलः, एषु यः कोऽपि लिंगर्थोऽस्तु तदपि तथापि मुषितदोषं भ्रमप्रमाद विप्रलिप्सादि–जीवदोषरहितं त्वामन्तरा विना चोदना लिंगर्थः प्रमाणं न भवितुमर्हति ।

[46] न जगदिदमहेतुतो न शून्यादवधिमतां कथमुद्भवोऽस्त्वकस्मात् । प्रकृतिरियमधर्मधर्मरूपा पुरुषगुणः कथमारभेत विश्वम् ।।४/६१।।

[47] अमृतोदयम्, पृ० २०५

[48] विगलदवयवं विकारमात्रारहितमनिन्द्रियमक्रियं पुराणम् । त्वमसि तदिति चेतनामयं मामुपनिषदोपि बत प्रमोहयन्ति ।।४/७४।।

आत्मदर्शनोपरान्त रात्रि में जिस प्रकार सूर्य अदृश्य होता है उसी प्रकार मोक्षकाल में दृग–दृश्य संबन्ध के अभाव में परमात्मा अवलोकित नहीं होते ।[49]

अपवर्ग प्राप्ति –

पवर्ग से राहित्य ही अपवर्ग है । पवर्ग अर्थात् पतन (पाप–पुण्य कर्मों में प्रवृत्ति), फल (सुख–दुःख), बन्धन (वासना), भय और मरण इन पाँच अवस्थाओं से मुक्ति ही अपवर्ग है ।[50] आत्मदर्शन के उपरान्त क्रमशः मोहोन्मूलन, मोहनिवृत्ति से पूर्वाचरित धर्मसमूह का प्रादुर्भाव, अनन्तर कैवल्य–भू प्राप्ति तथा स्वरूपपार्थक्य–निवृत्ति कार्यकारण–भाव के रूप में उत्तरोत्तर घटित होते हैं ।[51] अपवर्ग काल में पुरुष पूर्वानुभूत पुरुषोत्तम के विरह से व्याकुल होकर तथा समाधि[52] के फलस्वरूप स्वरूप–प्रतिष्ठा के अनन्तर सभी प्रकार के भोगों की समाप्ति से अत्यन्त विचलित हो जाता है । “समूलबुद्धयादिविशेषगुणसामान्योच्छेदो मोक्षः” इस कणादमत का अनुसरण करते हुए गुणसामान्यशून्य केवल आत्मा को प्राप्तकर अननुभूतपूर्व एवं निःसीम दुःख के अनुभवकर्ता के रूप में पुरुष को निरूपित किया गया है । अपवर्ग के स्वरूप को निर्धारित करनें की प्रक्रिया में आन्वीक्षिकी बौद्ध मत से कहती है कि आत्मा को चेतन ना मानने के कारण वह अपवर्गाभिषिक्त होनें के योग्य नहीं है । जैनमत भी शरीरपरिमाण को आत्मा तथा निरावरण जीव की अव्याहतसुखदशा में अवस्थिति रूपी अपर–अपवर्ग एवं ऊर्ध्वगति रूपी पर–अपवर्ग को मानने के कारण आन्वीक्षिकी मत में पाखण्ड–स्वरूप ही है । पाशुपत मत के अनुसार शिव सारूप्य को ही मोक्ष कहा गया है जबकि वैष्णवमत में वैकुण्ठसालोक्य ही अपवर्ग है ।[53] परन्तु आन्वीक्षिकी इनका खण्डन करते हुए इन्हें केवल स्वर्ग के प्रभेद ही मानती है । मीमांसा–दर्शन के अनुसार प्रव्रज्या (कर्मफल त्याग रूप सन्यास) से ही अपवर्ग संभव है [54] जिसका विरोध करते हुए आन्वीक्षिकी समाधि को ही मुक्ति हेतु आवश्यक स्थापित करती है । सेश्वरमीमांसाद्वय (विशिष्टाद्वैत एवं अद्वैत) में प्रथमा विज्ञान समुच्चित कर्म से उत्पन्न आनन्दभोग को जबकि द्वितीया पुरुष के स्वरूप–लाभ को अपवर्ग मानती है । श्रुति द्वारा दोनो को खण्डित करते हुए मोक्ष न माकर उसे जीवनमुक्ति के रूप में स्वीकृत किया गया है । श्रुति के अनुसार, अद्वैत मतावलम्बी पर एवं अपर ब्रह्म में भेद वैसे ही नहीं मिट सकता जिस प्रकार पानी में पत्थल भेदयुक्त होता है ।

---

49 रात्रौ सूर्यो यथा न दृश्यते, तथैव जाते मोक्षे दृग्दृश्यसंबन्धसामान्याभावेन परमात्मा नावभासते इति भावः ।

50 वेदान्ती स्वामी राघवाचार्य, भारतीयदर्शनेषु कैवल्यावधारणा, पृ० २

51 आत्मदर्शनात्सान्वयव मोहनिवृत्तिः पूर्वाचरितधर्मसमूहस्य प्रादूर्भावः, कैवल्यभूप्राप्तिःस्वरूपपार्थक्यनिवृत्तिश्चेति क्रमशो जायमानानां भावानामुत्तरोत्तरं कार्यकारणभाव उपपादितो बोध्यः ।

52 तदत्र समाधि – परिणामो व्याख्यातो बोध्यः तथा च योगसूत्रम् – सर्वार्थतैकातयोः क्षयोदयौ चित्तस्य समाधिपरिणामः – पा०यो० सू ० ३।१।.

53 विरुपाक्षसारूप्यम् – शिवसाधर्म्यम्, इदं मुक्तिः पौराणिकानाम्– ते हि सायुज्य, सारूप्य, सालोक्य, सामीप्य नामभिरुच्यमानप्रकारचतुष्टयं मोक्षमाहुः । शैवा अपि पशुपतिसारूप्यं मोक्षमङ्गीकुर्वन्तस्तत्रैवान्तर्भावयन्ति स्वम् ।

54 प्रव्रज्याशब्दस्य कर्मफलत्यागरूपः सन्यासोऽर्थः, तस्यापवर्गसाधनत्वं श्रुतावप्युक्तम् – न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः इति ।

सांख्य सम्मत विवेक–ख्याति को भी निषिद्ध करके निर्वाण को अपवर्ग पद पर अभिषिक्त करते हुए गोकुलनाथ आत्मवित् का परम–गन्तव्य न्यायसम्मत अपवर्ग को स्थापित करते हैं। अपवर्ग को प्रस्तुत नाटक में विवेकपुत्र एवं निषेधगोत्र कहकर विशेषित किया गया है।[55]

निष्कर्ष –

नैयायिक गोकुलनाथ रचित उपर्युक्त नाटक में आत्मज्ञान के प्रति आन्वीक्षिकी का उपयोग एवं उसकी महत्ता प्रतिपादित की गयी है। प्रतीक नाटकों में दार्शनिक मतों को अमूर्त पात्रों के द्वारा अभिनीत किया जाता है, इस क्रम में अमृतोदयम् अध्यात्म–ज्ञान का न्याय–प्रतिपादित स्वरूप उपस्थापित करनें में सफल कृति है।

सन्दर्भ ग्रन्थ –

1. – मिश्र आचार्य रामचन्द्र, १९६४, अमृतोदय, चौखम्बा विद्याभवन, वाराणसी, ।
2. – झा डा० किशोरनाथ, १९९०,न्यायदृष्टया आत्मवादानुचिन्तनम्, नाग प्रकाशक, दिल्ली।
3. – डा० राधाकृष्णन, द्वितीय भाग, भारतीय दर्शन, राजपाल एण्ड सन्ज।
4. – शास्त्री डा० राकेश, २०१६,तर्कसंग्रह चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, ।
5. – डा० स्वामी राघवाचार्य वेदान्ती,२०१४,भारतीयदर्शनेषु कैवल्यावधारणा, रचना प्रकाशन, जयपुर।

लेखिका - अंकिता श्रीवास्तव,
(ANKITA SRIVASTAVA)
मकान नं० ७८१, बासदेव गुजराती सदन,
मुहल्ला एवम पोस्ट – नौसढ, जिला – गोरखपुर,
sriankita1094@gmail.com

***

[55] एकविंशतिदुःखध्वंसलक्षणो मोक्षो नैयायिकानाम्, तत्र ध्वंसे नञर्थनिषेधसंक्रमात्तस्य निषेधगोत्रजत्वम् अपवर्गः।

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit, Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

मीमांसादर्शनस्य संक्षिप्तेतिहासः

- सुजित-परामानिकः

शोधसारः –

प्राचीनेतिवृत्तो यत्र वर्तते तदितिहास इत्युच्यते। जगति सर्वेषां इतिहासोऽस्ति। एवं संस्कृतसाहित्ये सर्वेषां शास्त्राणामितिहासो विद्यते। दर्शनेषु मीमांसादर्शनम् अन्यतमम्। प्रबन्धेऽस्मिन् मीमांसादर्शनस्य संक्षिप्तेतिहासो वर्णितोऽस्ति। इतिहासे मीमांसकाचार्याणां देशकालकृतिविषये विवरणं विद्यते। महर्षिजैमिनिना प्रवर्तितमिदं मीमांसादर्शनम्। तस्य देशकालकृतिविषये परिचयो यथामति प्रदत्तोऽस्ति। प्रबन्धेऽस्मिन् जैमिनिपूर्वकालिकाचार्याणां तथा जैमिन्युत्तरकालिकाचार्याणां संक्षिप्ततया परिचयो व्याख्यातोऽस्ति। जैमिनिपूर्वकालिकाचार्याणां मध्ये महर्षिः बादरायणः प्रसिद्धः। जैमिनिना तस्य मीमांसासूत्रे बादरायणस्य नाम स्मृतम्। अपि च बादरिः, महर्षिः आत्रेयः, काष्र्णाजिनिः इत्येतेषां मीमांसाशास्त्रकाराणामपि नाम जैमिनिना स्मृतम्। एते विद्वांसः अपि जैमिनिपूर्वकालिकाः प्रसिद्धा मीमांसाशास्त्रकाराः। जैमिन्युत्तरकालिकाचार्याणां मध्ये सर्वाधिकाः प्रसिद्धाचार्याः भाट्टसम्प्रदायस्य प्रवर्तकः कुमारिलभट्टः किञ्च तस्यैव शिष्यः प्रभाकरमिश्रः। कुमारिलभट्टो नितान्तो मेधावी विद्वान् लोकविश्रुतशास्त्रार्थी चासीत्। कुमारिलः तस्य पाण्डित्येन स वैदिकधर्मं संरक्षितवान्। प्रभाकरमिश्रः महान् मीमांसाभाष्यव्याख्याकार आसीत्। एते आचार्या मीमांसाशास्त्रस्य परिधिं तथा माहात्म्यं वर्धितवन्तः। पार्थसारथिमिश्रः आचार्यः मीमांसाशास्त्रकारेषु अन्यतमः। तस्य सम्प्रदायो मिश्रसम्प्रदाय इति नाम्ना ख्यातः। मण्डनमिश्रः, वाचस्पतिमिश्रः, शालिकनाथमिश्रः इत्येते आचार्या मीमांसाशास्त्रस्य प्रख्याताचार्याः। एतेषामपि आचार्याणां परिचयः संक्षिप्ततया प्रदत्तोऽस्ति अस्मिन् प्रबन्धे। अपि च केषाञ्चित् मीमांसाचार्याणां सारणीमाध्यमेन तेषां देशः, कालः, कृतयः इत्येते विषया अतीव संक्षिप्तरूपेण प्रदत्ताः सन्ति।

कुञ्ची-शब्दाः – जैमिनिः,बादरायणः, आत्रेयः, काष्र्णाजिनिः, उपवर्षः, भवदासः, भर्तृमित्रः, कुमारिलभट्टः

भूमिका -

चतुर्दशधर्मशास्त्रेषु मीमांसादर्शनम् अन्यतमं किञ्च षडास्तिकदर्शनेषु मीमांसादर्शनस्य परिगणनमस्ति

“पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश”॥ इति।

याज्ञवल्क्यस्य अनेन श्लोकेन मीमांसाशास्त्रस्य माहात्म्यम् अक्षुण्णं भवति। प्राचीनकाले मीमांसा इत्युक्ते कर्मकाण्डज्ञानकाण्डयोः उभयोः नामधेयमासीत्। किन्तु कालस्य परिवर्तनेन पूर्वमीमांसा उत्तरमीमांसा चेति भागद्वयं जातम्। इदानीन्तनकाले मीमांसा इत्युक्ते साधारणतया पूर्वमीमांसा एव बोध्यते। प्राचीनकाले वेदस्य परिधिः एतावान् विस्तृतः नासीत् यदिदानीं दृश्यते। कालक्रमेण प्रयोजनानुसारेण तस्याः परिधेः वर्धनं जातमिति। मीमांसकानां मते वेदो भवति मन्त्रब्राह्मणात्मकः "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति। किञ्च तेषां मते वेदो भवति अपौरुषेयः। प्राचीनकाले मीमांसा इति शब्दो विचारार्थे प्रयुक्तः आसीत्। गोपथब्राह्मणे "अनूचानो मीमांसकः" इत्यत्र मीमांसाशब्दो विशेषणरूपेण प्रयुक्तः आसीत्, तत्र तस्यार्थो भवति वेदार्थकुशल इति। ततः परं पुराणे, महाभारते, मनुयाज्ञवल्क्यस्मृतिग्रन्थेषु, तैत्तिरीयप्रातिशाख्ये अष्टाध्यायी इत्यस्मिन् व्याकरणमूलकग्रन्थे मीमांसा इति शब्दः शास्त्रविशेष इत्यस्मिन्नर्थे प्रयुक्तोऽस्ति। दृश्यते अनेन दर्शनमिति करणे ल्यट् इत्यनेन दर्शनशब्दः प्राप्यते। मीमांसादर्शनस्य मूलप्रतिपाद्यविषयो भवति कर्मसिद्धान्तः। कर्मसिद्धान्तो भारतीयानां सर्वस्वो भवति तद्विना कस्यापि पूर्णत्वं न सम्पद्यते। कर्मसिद्धान्ते, शरीरेन्द्रियैः साकं आत्मनो भिन्नत्वं, नित्यता, कर्तृता, भोक्तृता, स्वर्गनरकं, जन्ममरणम् इत्यादयः सर्वे विषयाः समविष्टा भवन्ति। मनुष्याः स्थूलदृष्ट्या कर्मसिद्धान्तमनादरेण पश्यन्ति। किन्तु कर्मसिद्धान्तेन जीवो दानवात् मानवो भवति। निरुक्तकारेण यास्काचार्येण मनुष्य इति शब्दस्य निर्वचनं प्रदत्तं यत् मनुष्य कस्मात् इत्यक्ते- "मत्वा कर्माणि सीव्यन्तीति मनुष्याः"। धर्मशब्दोऽपि कर्मशब्दस्य पर्यायवाची, .तस्य द्वौ प्रकारौ स्तः सामान्यो विशेषश्चेति। सामान्यं तु मनुष्याणां कृते विशेषस्तु वर्णाश्रमाव्यवस्थानिमित्तं भवति। एतेषां क्रमबद्धविवरणं श्रौतसूत्रेषु प्राप्यते। धर्मस्य मूलसिद्धान्तः वेदे निगदितोऽस्ति। कर्मकाण्डे यस्मिन् स्थले वाक्यार्थनिर्णये सन्देहो भवति तस्मिन् स्थले तस्य समाधानं मीमांसाशास्त्रेण भवति। एतस्य शास्त्रस्य मुख्यमुद्देश्यमासीत् वैदिककर्मकाण्डस्वरूपस्य निरूपणार्थं वैदिकविधिनिषेधार्थावगमः, तेषामर्थानां परस्परं संगतिः स्थापना इति। ब्राह्मणग्रन्थेषु भिन्ना भिन्ना यागा वर्णिताः सन्ति। एतेषु स्थलेषु सन्देहस्य परिहारार्थं किञ्च परस्पराणाम् एकवाक्यता स्थापनार्थं मीमांसाशास्त्रस्य महती आवश्यकता आसीत्। यथा ब्राह्मणवाक्यानां परस्परं विरोधो भवति चेत् कस्य ब्राह्मणस्य वचनं प्राबल्यमिति। अपि च श्रुतिलिङ्गयोः विरोधयोः सत्योः कस्य प्राबल्यं श्रुतेः उत लिङ्गस्य। मन्त्रपाठो, ब्राह्मणपाठः इत्यनयोः भिन्नता भवति चेत् कः क्रमः प्रबलो भवति, ब्राह्मणपाठक्रम उत मन्त्रपाठक्रमः। इत्येषां सर्वेषां

समस्यानां समाधानार्थं मीमांसाशास्त्रस्य प्रवृत्तिः। तदेव मीमांसादर्शनस्य दर्शनत्वम्। अस्य शास्त्रस्य प्रवर्तकोऽस्ति महर्षिजैमिनिः। तस्यैव दर्शनस्य नाम भवति पूर्वमीमांसा इति। वेदस्य कर्मकाण्डविभागीयानां मन्त्राणां कथं यज्ञे विनियोगो भवति वाक्यार्थः कीदृशो भवति तत् सर्वं संक्षेपेण सूत्रकारेण शास्त्रमिदं प्रणितमस्ति। विधिबोधकं भवति इदं शास्त्रमिति। तस्य मते विधिस्वरूपार्थो धर्म इति। तदेव सूत्रकारेण संक्षेपेण प्रतिपादितमस्ति "चोदनालक्षणोऽर्थो धर्मः" इति। धर्मस्य सम्यक् ज्ञानं विना विधिज्ञानस्य संभवना नास्ति। अतो धर्मस्य सम्यक् ज्ञाननिमित्तं जैमिनिना विधि: इत्यस्य मीमांसा कृता। तस्मात् कारणात् जैमिनीयदर्शनस्य नाम मीमांसा इत्यभवत्। पूर्वमीमांसायाः अपरं नाम भवति कर्ममीमांसा शास्त्रमिदं वैदिककर्मकाण्डपरकत्वात् इति। वस्तुतो मीमांसायाः कर्मकाण्डो मनुष्यस्य परमो धर्मः इति। अतस्तद्दर्शनं धर्ममीमांसा इत्यप्युच्यते। तेन कारणेन महर्षिजैमिनेः प्रथमं सूत्रं भवति "अथातो धर्मजिज्ञासा" इति। मीमांसाशास्त्रस्य मते मनुष्यस्य परमपुरुषार्थो भवति स्वर्गलाभः। यद्यागादिना यजमानः सम्पाद्यते। धर्मस्य प्राथमिकपर्यायां कर्मकाण्ड एव आश्रयणीयः। कर्मकाण्डो मनुष्यजीवनस्य महत्त्वं संपादयति। इदानीं मीमांसा इति शब्दस्य व्याकरणगतार्थः आलोच्यते। वैयाकरणमते पूजार्थको मान् धातूत्तरजिज्ञासार्थे सन्प्रत्यये, अभ्यासस्य दीर्घादेशे सनन्तधातूत्तर-अ-प्रत्यये स्त्रीत्वविवक्षायां टाप् प्रत्यये मीमांसा इति शब्दस्य निष्पत्तिः। मान् इति धातुः चुरादिगणे भ्वादिगणे च परिगणितो भवति। गणद्वयेऽपि पूजार्थक एव भवति। वार्तिककारेण जिज्ञासार्थे स्वीकृतमस्ति "मानेर्जिज्ञासायाम्" इति। किन्तु भट्टोजिदीक्षितस्य मते तस्मिन् सन्नन्ते सति विचारण इत्यर्थः समुपलभ्यते। अर्थात् व्युत्पत्त्या मान् धातोः पूजा, जिज्ञासा, तथा विचार इत्यादयः अर्थाः समुपलभ्यन्ते। व्यवहारिके तु मीमांसा इत्यस्यार्थः विचारार्थे रुढिः अस्ति। यद्यपि मीमांसादर्शनस्य प्रतिष्ठापको महर्षिः जैमिनिः तथापि तस्य प्रागपि मीमांसादर्शनस्य प्रचलनमासीत्। जैमिन्युत्तरकालिका: अपि बहवः आचार्याः सम्भूताः तेन मीमांसादर्शस्य उत्तरोत्तरसंवृद्धिः अभवत्। किन्तु इदानीन्तकाले पुनः तस्य प्रगतिः किञ्चित् क्षीयमाणा दृश्यते। भारतवर्षे सर्वेषां शास्त्राणां स्व स्वेतिहासोऽस्ति। एवं मीमांसादर्शनस्यापि इतिहासः समुपलभ्यते। इदानीं मीमांसादर्शनस्य आचार्याणां विवरणं, किञ्च कालेन कथं मीमांसादर्शनस्य विवर्तनं जातं तद् संक्षेपेण किञ्चिदालोच्यते। आदौ तावत्--

महर्षिः जैमिनिः-

देशः- जैमिनिमहर्षेः स्वदेशविषये यथायथं प्रमाणं न प्राप्यते। किञ्च तस्य देशविषये अद्यापि पण्डिताः अन्वेषणं कुर्वन्तः सन्ति।

कालनिर्णयः- अस्याचार्यस्य जन्मविषये प्रमाणं न प्राप्यते। तथापि कालविषये पण्डितानां

मतभेदो दृश्यते। प्रो० जैकोबीमहोदयस्य मते विक्रमपूर्वं त्रीशतके तस्य कालोऽस्तीति निश्चियितुं न शक्यते। कारणं हि बादरायणो जैमिनिः प्रायः समकालिकः। कर्ममीमांसकस्य लेखकः डाँ कीथमहोदयस्य तदेव मतं परिलक्ष्यते। किन्तु मैक्समूलरस्य मते दर्शनकाराणां कालनिर्णयः आकाशकुसुमचयनमिव। अनेकानां विदुषां मते तस्य काल ईसापूर्वः ५०० शतकम् अर्थात् पाणिनेः समकालिकः इति।

कृतयः- पूर्वमीमांसायाः प्रवर्तकोऽस्ति आचार्यो महर्षिः जैमिनिः इति इतिहासप्रसिद्धवचनम्। महाभारते दृश्यते यत् सामवेदे महर्षिः जैमिनिः महर्षेः कृष्णद्वैपायनस्य शिष्य[1]। महर्षेः जैमिनेः सर्वोत्तमा कीर्तिः पूर्वमीमांसा। सूत्रकारेण स मीमांसादर्शनं प्रवर्तयामास। जैमिनिना प्रवर्तितं मीमांसादर्शनं जैमिनीयदर्शनमिति प्रोच्यते। दर्शनेऽस्मिन् २६२१ मतान्तरे २६५२ सूत्राणि सन्ति। किञ्च दर्शनेऽस्मिन् ८९० मतान्तरे ९१५ अधिकरणानि विद्यन्ते। ग्रन्थेऽस्मिन् ६० पादाः सन्ति। तृतीयषष्ठदशमाध्यायेषु अष्टौ पादाः सन्ति। आद्येषु धर्मस्य प्रमाणविषये द्वादश लक्षणानि विद्यन्ते तस्मात् कारणात् तच्छास्त्रं द्वादशलक्षणी इत्युच्यते। केषाञ्चित् मते दर्शनेऽस्मिन् षोडशाध्यायाः विलसन्ति। अन्तिमाः चत्वारः अध्यायाः सङ्कर्षकाण्डो देवताकाण्डो वा अभिधीयते। किन्तु विदुषां तत्र मतपार्थक्यं विद्यते, केषाञ्चित् मते अन्तिमाः चत्वारः अध्यायाः जैमिनिमहर्षेः न भवन्ति। इदानीं प्रत्येकं पादस्य सामान्यः परिचयः कार्यते। प्रथमस्तावत्-

प्रथमाध्यायः- अस्मिन् अध्याये धर्मलक्षणं तस्य प्रयोजनं, तेषां प्रमाणम, एवञ्च वेदविहितक्रिया कथं धर्मपदेन उच्यते इत्येषां सर्वेषां युक्तियुक्तपूर्वकम् आलोचना विद्यते इति।

द्वितीयाध्यायः- अस्मिन् अध्याये यागयज्ञादिः, धर्मस्य प्रभेद इत्यादीनाम् आलोचना विद्यते।

तृतीयाध्यायः- अस्मिन् अध्याये यागयज्ञादीनाम् अङ्गप्रधानभावो निर्णीयते।

चतुर्थाध्यायः- अत्र यागयज्ञादिगुणानां तथा यागे कथं तेषां विनियोगो भवति इत्यादीनां सर्वेषां वर्णना विद्यते।

पञ्चमाध्यायः- अत्र यज्ञकर्माणां क्रमनिर्णयः क्रियते।

षष्ठाध्यायः- अत्र आलोचनापूर्वकम् अधिकारिणां विचारो वर्तते इति।

सप्तमाध्यायः- अस्मिन् अध्याये साधारणतः अतिदेशवाक्यानां विवेचना वर्तते।

अष्टमाध्यायः- अस्मिन् विशेषातिदेशवाक्यानाम् आलोचना क्रियते। एतत् एवं प्रकारेण कर्तव्यमिति वाक्यम् अतिदेशवाक्यमुच्यते इति।

नवमाध्यायः- अत्र ऊह इत्यस्य विचारो वर्तते। ऊह इत्यस्यार्थः —अपूर्वोत्प्रेक्षणमूहः‘ इति। मन्त्रे यस्य पदार्थस्य उल्लेखो नास्ति तस्य उत्प्रेक्षा वा उल्लेख इत्यभिधीयते।

---

[1]. महाभारते आदिपर्वणि अ०. ६३।

दशमाध्यायः- अस्मिन् अध्याये बाधस्य निर्णयो अस्ति। बाधशब्दस्यार्थो निवृत्तिः इति। कुत्र कस्य द्रव्यस्य निवृत्तिः भवति तस्य निर्णयो बाधविचारस्य उद्देश्यमस्तीति।

एकादशाध्यायः- अस्मिन् अध्याये तन्त्रस्य विचारो विद्यते। —अनेकमुद्दिश्य सकृत् प्रवृत्तिः तन्त्रमिति'। अनेकं कर्म उद्दिश्य एकवारमेव कस्यापि कार्यस्य अनुष्ठानं तन्त्रमिति प्रोच्यते। यथा स्नानं प्रत्येकं क्रियायाः अङ्गो भवति।

द्वादशाध्यायः- अस्मिन् अध्याये प्रसङ्गस्य विचारो भवति। —अन्योद्देश्येऽन्यसिद्धिः प्रसङ्गः'। एकं कर्मकाण्डमुद्दिश्य अन्यस्य कार्यस्य सिद्धिः प्रसङ्गोऽभिधीयते। अपि च अत्र तन्त्री, निर्णयः, समुच्चयो, विकल्प इत्यादीनां विचारोऽपि विद्यते।

"जैमिनिपूर्वकालिका आचार्याः"

बादरायणः- जैमिनेः पूर्ववर्त्याचार्येषु अन्यतमो भवति ब्रह्मसूत्रकारो बादरायणः। अष्टदशपुराणानां रचयिता कृष्णद्वैपायनः तस्य अपरं नाम व्यासः। बादरायण एव व्यास इति ब्रह्मसूत्राणां रचयितेति च साम्प्रदायिकाः। केचित्तु ब्रह्मसूत्रकारः बादरायणव्यासोऽयम् अष्टादशपुराणकर्तुः कृष्णद्वैपायनाद्भिन्नः इति वर्णयन्ति। पाणिनेरप्ययं ब्रह्मसूत्रकारः प्राक्तनः। यतः "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयो"रिति पाणिनानि ब्रह्मसूत्राणि भिक्षुसूत्रनाम्ना निर्दिष्टानि। सम्प्रदाये तु बादरायणव्यास एव अष्टादशपुराणानां कर्ता. स च अधिकारिभेदं मनसि कृत्वा मन्दाधिकारिणां तत्त्वोपदेशाय अरूपं निर्गुणम् अनिर्वचनीयं च आत्मस्वरूपं सुरूपं सगुणं स्तुतिविषयं कृत्वा पुराणानि रचयामासेति वदन्तो महर्षिः जैमिनिः पूर्वमीमांसासूत्रे १.१.५ इत्यत्र अब्रवीत् यत् महर्षिबादरायणानुसारेण शब्दस्य अर्थेन साकं सम्बन्धो नित्यः इति। जैमिनिना तस्य मीमांसासूत्रे अतिसम्मानेन बादरायणस्य नाम उल्लेखितम्। ब्रह्मसूत्रस्य रचयिताकारो बादरायणः। किन्तु ब्रह्मसूत्रकारो बादरायणः किञ्च जैमिनिना उल्लेखितो बादरायणः समानो वा तत्र पण्डितानां विवादो वर्तते। जैमिनिना उल्लेखितो बादरायणः प्रसिद्धो मीमांसकः आसीत्।

बादरिः- महर्षिः जैमिनिः मीमांसासूत्रे बादर्याचार्यस्य नामोल्लेखं कृतवान्। जैमिनिना उक्तमस्ति यद् बादर्याचार्यस्य मतानुसारेण शेषलक्षणं द्रव्यं वस्तु इत्यादीनां निर्माणे सम्बन्धो भवति। किन्तु जैमिन्याचार्यस्य तत्र सहमतिः नास्ति। "द्रव्यगुणसंस्कारेषु बादरिः" (३.१.३), "निमित्तार्थेन बादरिः" (३.१.२७), "कालाभ्यासेऽपि बादरिः" (८.३.३), "कर्मभेदात् वर्णे तु बादरिः" (९.२.३३) इत्यादिषु सूत्रेषु[2] बादरिः इत्याचार्यस्य नामानि दृश्यन्ते।

---

2. जैमिनिना रचितानि मीमांसासूत्राणि।

महर्षिः आत्रेयः - जैमिनिपूर्ववर्त्याचार्येषु अन्यतमो भवति महर्षिः आत्रेयः। बोधायनगृह्यसूत्रे किञ्च बोधायनश्रौतसूत्रे आत्रेयस्य नामोल्लेखः प्राप्यते। महाभारते ब्रह्मसूत्रेऽपि अस्य विदुषः नामोल्लेखः प्राप्यते। अपि च ज्ञानकाण्डे महर्षिबादरायणव्यासनिर्मितेषु स्वामिनः फलश्रुतेरित्यात्रेयः ३.४.१४ इत्यस्मिन् ब्रह्मसूत्रे आत्रेयोऽयं निर्दिष्टः पूर्वमीमांसासूत्रे तस्य वारत्रयं नामोल्लेखः कृतो यथा "फलमात्रेयो निर्देशात्", "मुख्यानन्तर्यमात्रेयः", "निर्देशाद्वा" त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः" इत्यादिषु त्रिषु सूत्रेषु। ५.२.१८ अन्तर्गते सूत्रे नारिष्ठोमहोमसम्बन्धेन आत्रेयः कथयति यत् यज्ञे प्रधानयागानन्तरं विकृतियागः करणीयो वेदविहितत्वादिति।

कार्ष्णाजिनिः- महत्त्वपूर्णाचार्येषु मीमांसकेषु अन्यतमो भवति आचार्यः कार्ष्णाजिनिः। जैमिनिना तस्य सूत्रे द्विवारमस्य आचार्यस्य नामोल्लेखः कृतः यथा "क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजिनिः" (४.३.५७) "सकृदिज्यां कामुकायनः परिमाणविरोधात्" इति द्वयोः सूत्रयोः। सूत्रे जैमिनेः अस्याचार्यस्य पूर्वपक्षत्वेन नामोल्लेखः कृतः। आचार्यः जैमिनिः अत्यन्तविनयपूर्वकं कार्ष्णाजिन्याचार्यमतस्योपरि स्वसिद्धान्तं प्रकटयति। आचार्यस्य उत्तरमीमांसायां ब्रह्मसूत्रे किञ्च कात्यायनश्रोतसूत्रे नामोल्लेखो दृश्यते।

अन्येऽपि जैमिनिमहर्षेः पूर्ववर्तिकालिका: प्रसिद्धा आचार्याः आसन् तेषां केवलं नामोल्लेखः क्रियते ते यथा- आश्मरथ्यः, आलेखनः, ऐतिशायनः, कामुकायनः, लावुकायनः इत्याचार्याः।

"जैमिन्युत्तरकालिका: आचार्याः"

भगवान् उपवर्षः-

देशः- उपवर्षस्य देशविषये उपयुक्तं प्रमाणं न प्राप्यते।

कालनिर्णयः- भगवतः उपवर्षस्य काल उपयुक्तप्रमाणेन निर्णेतुं शक्यते। शबरस्वामी २०० ईशाब्दे उपवर्षम् उल्लेखितवान्। अतः स समयः उपवर्षस्य समय इति निर्णेतुं शक्यते।

कृतिः- भगवान् उपवर्षः आसीत् शङ्करस्वामिनः पुत्रः पाणिनिमहर्षेः गुरोः भ्राता। अनेन पूर्वमीमांसायाः वृत्तिः विलिखिता। शबरस्वामिनः किञ्च शंकराचार्यस्य भाष्ये तस्य नाम पुनः पुनः श्रूयते। भगवान् उपवर्ष एव जैमिनीयसूत्रस्य प्रथमो व्याख्याकर्ता। भगवान् आसीत् तस्य उपाधिः तद्भगवद्पादः शङ्कराचार्योऽपि ब्रह्मसूत्रस्य देवताधिकरणे प्रकटितवान्। आदिव्याख्याकर्ता उपवर्षस्य स्वजीवनविषयः अद्यापि विवादस्पदोऽस्ति। श्रीकुप्स्वामिशास्त्रिगलमहोदयस्य मते अपि च श्रीभाष्यतत्त्वटीकानुसारेण बोधायनः एवञ्च उपवर्ष एक एव। किन्तु डा. एस्-कृष्णस्वामि-अयङ्गारमहोदयः एतत् मतं न समर्थयतीति।

कारणं हि प्रपञ्चहृदये अपि च उत्तरमीमांसासूत्रे पृथग्रूपेण उपवर्षस्य तथा बोधायनस्य नामोल्लेखः प्राप्यते। एतेन प्रमाणितं भवति यत् उपवर्षो बोधायनः उभौ अपि भिन्नाचार्यौ इति।

भवदासः-

देशः- आचार्यस्य स्वदेशविषये उपयुक्तं प्रमाणं न प्राप्यते।

कालनिर्णयः- कालक्रमानुसारेण उपवर्षस्य पश्चात् भवदासस्य स्थानमस्ति। भवदासस्य कालविषये निश्चितप्रमाणं नास्ति। तथापि प्रपञ्चहृदये' इति ग्रन्थस्याधारेण तस्य कालः उपवर्षस्यानन्तरं शबरस्वामिनः पूर्वं भवितुमर्हति।

कृतिः- मीमांसादर्शनस्य लब्धप्रतिष्ठापको भवदासः मीमांसशास्त्रस्योपरि वृत्तिम् अलिखत्। स्वयं कुमारिलभट्टोऽपि तस्य श्लोकवार्तिके भवदासम् उल्लेखितवान् -

"प्रदर्शनार्थमित्येके केचिन्नानार्थवाचिनः।

समुदायादवच्छिद्य भवदासेन कल्पितात्"।।

किञ्च पार्थसारथिमिश्रः श्लोकवार्तिकस्य टीकायां तस्य नामोल्लिखितवान् यत्- "केषाञ्चित् भवदासादीनां वृत्त्यन्तरेषु" इति।

भर्तृमित्रः- वार्तिककारस्य कुमारिलभट्टस्य पूर्वं भर्तृमित्रस्य नामोल्लेखः आवश्यकोऽस्ति। कारणं हि कुमारिलभट्टः तस्य मतम् उल्लिख्य तिरस्कृतवान्। आचार्यस्य पार्थसारथिमिश्रस्य मते भर्तृमित्रः पूर्वमीमांसासिद्धान्ते बहु अपसिद्धान्तं चकार यद् नास्तिकसिद्धान्त इव प्रतिभाति।पार्थसारथिमिश्रस्य मते भर्तृमित्रो मीमांसाया उपरि न्यायरत्नाकर इति टीकां व्यारचयामास। तदेव स प्रकटयति यत्- "मीमांसायाश्चिरन्तनानि भर्तृमित्रादिना रचितानि व्याख्यानानि विद्यन्ते" इति।

आचार्यकुमारिलभट्टः-

देशः- तस्य निवासस्थानविषये विदुषां मतपार्थक्यं परिलक्ष्यते। एकस्य मते तस्य निवासः प्रयागः अन्येषां मते च स दक्षिणभारतीयः। केषाञ्चित् मते तस्य निवासः आसीत् मिथिलाप्रदेश इति। अपरेषां मते तस्य जन्मस्थानमुत्कलसीमान्ते जयमङ्गलनामकः कश्चन ग्रामः।

कालः- समीक्षायां एस. वि. पण्डितस्य एवञ्च के. वि. पाठकस्य च मते कुमारिलः ७०० ईशाब्दे आसीत्। किन्तु आधुनिकैतिहासकानां मते तस्य समयः ६४०-७०० ईशाब्दः पर्यन्तमिति।

कृतिः- भाष्यकाराणामनन्तरं मीमांसादर्शनस्य व्याख्याकाराणां दीर्घपरम्परायां सर्वाधिकः

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

अम्लानप्रतिभासम्पन्नः आचार्यप्रभाकरमिश्रगुरुः आचार्यः कुमारिलभट्टः। येन कारणेन श्रौतदर्शनस्य मीमांसादर्शनस्य च प्रसिद्धिः उत्तरोत्तरवृद्धिः जाता। कुमारिलभट्टो नितान्तो मेधावी विद्वान् लोकविश्रुतशास्त्रार्थी चासीत्। तस्य प्रतिभायाम् अभिभूताः जनाः तं पार्वतीपुत्रकुमारषडाननस्य अवतारं कथयन्ति स्म। स आन्धतैत्तिरीयशाखायाः अध्येता आसीत्। कुमारिलो मीमांसादर्शनस्य आचार्यः' इति विद्वद्भिः आख्यायते। किंवदन्ति अस्ति यत् कुमारिलभट्टो प्राक् बौद्धः आसीत् परं श्रोत्रियो ब्राह्मणः सन् प्रसिद्धो मीमांसकः सञ्जातः। तस्मिन् काले बौद्धधर्मस्य प्रभाव एतावान् जातो यत् वैदिकधर्मो विलुप्तप्राय आसीत्। तस्मिन् काले कुमारिलः नूतनतया वैदिकधर्मं संरक्षितवान्। अतो वैदिकधर्मस्य संरक्षककर्ता कुमारिलभट्टो भारतीयेतिहासे स्मरणीयोऽस्ति। काचन कथा श्रूयते यत् स बौद्धभिक्षकवेशं धृत्वा तत्कालिनः बौद्धाचार्यस्य सकाशात् बौद्धधर्मं शिक्षितवान् एवञ्च स्वप्रोढप्रज्ञया गुरून् अन्यान् पराजितवान्। प्रवीनगुरौ पराजये स अनुशोचनाग्रस्थः प्रायश्चित्तनिमित्तं तुषानले स्वशरीरं दग्धं चकार। एतादृशी आसीत् तस्य गुरुभक्तिः शास्त्रं प्रति श्रद्धा च। स बौद्धतार्किकस्य धर्मकीर्तेः वयसःकनिष्ठशङ्कराचार्यस्य वयसःज्येष्ठः समसामयिकश्चासीत्। शङ्कराचार्यः त्रिवेणीतीरे प्राणत्यागव्रतिना कुमारिलेन साकं साक्षात् कृतवान् किञ्च तस्य परामर्शेन तस्य शिष्यं मण्डनमिश्रं शास्त्रार्थविचारे पराजितवान्। तस्य शिष्याश्चासन् आचार्यप्रभाकरमिश्रः, उम्बेको, रेवणः। उम्बेको भवभूतिः इति कथ्यते। कुमारिलः शाबरभाष्यस्योपरि वार्तिकव्याख्यानं प्रणीतवान्। सा व्याख्या त्रिविधा वर्तते। प्रथमाध्याये प्रथमपादे व्याख्यानस्य नाम भवति श्लोकवार्तिकः। श्लोकं विना एकं वाक्यमपि नास्ति अतः श्लोकवार्तिकः इत्युच्यते। प्रथमाध्यायस्य द्वितीयपादतः तृतीयाध्याये अष्टमपादः पर्यन्तं व्याख्यानं भवति तन्त्रवार्तिकः' अवशिष्टपादाः अर्थात् चतुर्थाध्यायस्य प्रथमपादतः द्वादशाध्यायस्य चतुर्थपादः पर्यन्तं वार्तिकस्य नाम टुप्टीका' इति। न्यायरत्नाकरो, न्यायसुधा, तन्त्ररहस्यमित्यादिषु ग्रन्थेषु तत्कृतस्य बृहट्टीका इति ग्रन्थस्योल्लेखः प्राप्यते। मोनियर् विलियम्स प्रमुखाः मान्याः बृहट्टीका' इति प्रभाकरमिश्रस्य कीर्तिः मन्यन्ते। किन्तु शाबरभाष्यस्योपरि बृहट्टीका कुमारिलस्यैव। गोल्डस्टुकरस्य मते मानवकल्पसूत्रस्योपरि तैत्तिरीयशाखात्मकं व्याख्यानं कुमारिलस्यैव। आचार्यः कुमारिलः श्लोकवार्तिके भाष्यकारमतापेक्षया अधिकं स्वमतं प्रकटितवान्। अस्मिन् ग्रन्थे सविस्तरेण बौद्धमतस्य खण्डनमस्ति चेदपि स्थले स्थले चार्वाकन्यायवैशषिकानां खण्डनं विद्यते। किञ्च अस्मिन् ग्रन्थे दार्शनिकरीत्या स्वतःप्रामाण्यं परतःप्रामाण्यं इत्यस्मिन् विषये प्रसिद्धालोचना विद्यते। तन्त्रवार्तिके प्रधानतः मीमांसाशास्त्रस्य मतं खण्डितं कुत्रचित् मतान्तरस्य निराकरणमस्तीति।

प्रभाकरमिश्रः-

देशः- आचार्यप्रभाकरमिश्रस्य स्वदेशविषये यथायथं प्रमाणं न प्राप्यते।

कालः- प्रायशः कुमारिलभट्टप्रभाकरयोः तन्त्रार्थनिर्णये विवादो भवति स्म। एतस्मात् कारणात् निर्धारणं कर्तुं शक्यते यत् उभौ अपि समकालिनौ इति। पण्डितकूप्पुस्वामिशास्त्रिणः मते प्रभाकरः कुमारिलभट्टस्य वयस:कनिष्ठः, समसामयिकः। तस्य मते कुमारिलभट्टस्य समयः ६००-६६० ईशाब्दं पर्यन्तमिति। किञ्च प्रभाकरस्य समयः ६१०-६९० ईशाब्दः। अन्येन कारणेन प्रभाकरः कुमारिलभट्टात् वयसा ज्येष्ठोऽपि वक्तुं शक्यते। प्रभाकरः श्लोकवार्तिकरचनायाः पूर्वे बृहती नामकं निबन्धनं रचयामास। किन्तु तत्र कुमारिलभट्टस्य खण्डनं न विद्यते। परन्तु भाविनिकाले कुमारिलेन बृहती इत्यत्र बहु मतं खण्डितमस्ति। कुमारिलभाषापेक्षया प्रभाकरस्य भाषारीतिः अत्यन्ता सरला प्राचीना च प्रायः शाबरभाष्यस्य अनुरूपा इति। डा. गङ्गानाथ-झा महोदयस्य मते प्रभाकरः ६००-६५० ईशाब्दे आसीत्।

आचार्यस्य कृतयः- महान् प्रतिभाशाली, स्वतन्त्रो प्रसिद्धमीमांसाभाष्यव्याख्याकारोऽस्ति आचार्यः प्रभाकरमिश्रः। स कुमारिलभट्टस्य शिष्येषु अन्यतमः अतिबुद्धिमान् आसीत्। प्रभाकरस्य गुरुमतमिति प्रसिद्धो वर्तते। तस्य कारणं तावत्- आचार्यकुमारिल एकदा शिष्यान् बोधनार्थं रहस्यपूर्णं पदच्छेदं -"तत्र तु नोक्तम् अत्रापि नोक्तमितिपुनरुक्तम्" इति व्याख्यां कर्तुं प्रयत्नं कृतवान्, किन्तु कर्तुम् अशक्तः सन् गृहं प्रत्यागतः। किन्तु शिष्यः प्रभाकरस्तस्य समाधानं चकार। स समाधानम् एकस्मिन् पत्रे लिखित्वा गृहे गुरौ अनुपस्थितौ गुरुमात्रे प्रदत्तवान्। यदा आचार्यकुमारिलः गृहम् आगतवान् तदा सर्वं दृष्ट्वा अवगतवान्। किञ्च तेन प्रभाकरस्य एतादृशी गुरुभक्तिः दृष्ट्वा तस्मै गुरु इत्युपाधिः प्रदत्ता। ततः आरभ्य स गुरु इति नाम्नि प्रसिद्धो जातः एवञ्च तस्य मतं गुरुमतमिति। स शाबरभाष्यस्योपरि टीकाद्वयं रचयामास, एका लघ्वी यत् विवरणमिति नाम्नापि प्रसिद्धमस्ति। अपरा च बृहती' यद् निबन्धनमिति नाम्ना प्रसिद्धमस्ति। मिताक्षरा, श्राद्धविवेक इत्यादिषु धर्मशास्त्रेषु प्रभाकरस्य सिद्धान्तः दृश्यते। गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणौ उदयनाचार्यस्य कुसुमाञ्जलौ इत्यत्रापि गुरुमतखण्डनस्य प्रयासो दृश्यते। प्रभाकरस्य कश्चन सिद्धान्तो बौद्धसिद्धान्तस्य समीपमस्ति अतः श्रीहर्षेण स बुद्धबन्ध इत्यभिधीयते।

पार्थसारथिमिश्रः- देशः- पार्थसारथिमिश्रस्य निवास आसीत् मिथिला नगरी। स मैथिलीयो ब्राह्मण आसीत्। तस्य पिता आसीत् यज्ञात्मा।

कालः- पण्डितानां मते तस्य समय आसीत् १०५० ईशाब्दः। केषाञ्चित् मते पार्थसारथिमिश्रो

दशमशतकस्य पूर्ववर्ती आसीत्।

कृतिः- मीमांसकेषु अन्यतमोऽस्ति आचार्यः पार्थसारथिमिश्रः। स एतावत् दृढतया प्रभाकरमतं खण्डितवान् यस्य उद्धारः अद्यापि केनापि कर्तुं न शक्यते। तस्य मीमांसाशास्त्रस्य चत्वारः ग्रन्था उपलभ्यन्ते। प्रथमं तावत् तन्त्ररत्नः। अत्र जैमिनीयसूत्रस्य अतिविस्तृतिः व्याख्या वर्तते। द्वितीयं तावत् भाट्टमतस्य प्रकरणग्रन्थो न्यायरत्नमाला। मीमांसायाः द्वादशाध्यायेन साकं प्रभाकरमतस्य अत्यन्तविरुद्धत्वात् खण्डनपरकम् एनं ग्रन्थं रचितवान्। तस्य तृतीयग्रन्थः तावत् शास्त्रदीपिका' अस्मिन् ग्रन्थे अधिकरणनिरूपणस्य प्रारम्भो दृश्यते। अतः स ग्रन्थः अधिकरणव्यवस्थापक इत्युच्यते। आचार्यपार्थसारथिमिश्रः प्रकरणं, सूत्राशयं संगृह्य एनं ग्रन्थं निर्मितवान्। तस्य चतुर्थो ग्रन्थोऽस्ति न्यायरत्नाकरः '। ग्रन्थोऽयं श्लोकवार्तिकस्योपरि टीकात्मकः ग्रन्थः। शास्त्रदीपिकायाः प्रारम्भे तेन प्रोक्तं यत्-

"न्यायाभासतमश्छन्नशास्त्रतत्त्वार्थदर्शिकाम्।
कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम्"।। इति।

किञ्च शास्त्रान्तरेषु अपि आचार्यपार्थसारथिमिश्रस्य नामोल्लेखः प्राप्यते।

मण्डनमिश्रः-

देशः- प्रसिद्धेषु मीमांसकेषु अन्यतमो भवति मण्डनमिश्रः। स मैथिलीयो ब्राह्मण आसीत्। तस्य देश आसीत् मिथिलाप्रदेशः इति।

कालः- मण्डनमिश्रस्य काल नवमशतकमिति कुप्पुस्वामिशास्त्रिणः अभिमतम्।

कृतिः- कुमारिलभट्टस्य बहुसंख्यकशिष्येषु अन्यतमः प्रतिभासम्पन्नः आसीत् मण्डनमिश्रः। एष मण्डनमिश्रो नैष्कर्म्यसिद्धिकर्ता सुरेश्वराचार्यः इति विदुषामभिप्रायः। तस्य नामान्तरमस्ति विश्वेश्वरः। भगवता शंकराचार्येण साकं मण्डनमिश्रः वादे पराजयं प्राप्तवान्। पराजये प्राप्ते पूर्वप्रतीज्ञानुसारेण स शङ्कराचार्यं गुरुरूपेण आश्रितवान्। कुमारिलभट्टजामाता पूर्वकाण्डप्रवर्तकः मण्डनमिश्र इति ख्यातः विश्वरूप एव सन्न्यासस्वीकारादनन्तरं सुरेश्वर इति प्रसिद्ध इति साम्प्रदायिका वदन्ति। जागोपमहोदयेन नैष्कर्म्यसिद्धिभूमिकायां मण्डनमिश्रसुरेश्वरविश्वरूपाणामैक्यमङ्गीक्रियते। सप्तदशशतकीयेन बालकृष्णानन्दसरस्वत्या कृते शारीरकमीमांसाभाष्यवार्तिके त्रयाणामैक्येवोपवर्णितम्।विद्यारण्यैः विवरणप्रमेयसंग्रहे बृहदारण्यकवार्तिकादुद्धरणं दत्तं तत्रापि विश्वरूपशब्देन सुरेश्वरो निर्दिष्टः। दासगुप्तमहोदयस्तु सुरेश्वरविश्वरूपावभिन्नौ मण्डनमिश्रस्त्वन्य इति वदति। म.म. कुप्पुस्वामिनः सुरेश्वरब्रह्मसिद्धिकारयोस्सिद्धान्तगतभेदमुपवर्ण्य ब्रह्मसिद्धिकारः सुरेश्वरादन्य इति प्रतिपादयन्ति। संक्षेपशारीरकः कर्ता सर्वज्ञात्मा सुरेश्वराचार्यस्य शिष्यः इति प्रसिद्धिः। मण्डनमिश्रः अत्यन्तो बुद्धिमान् स्वतन्त्रप्रज्ञश्चासीत्। श्रीमद्भगवद्पादशङ्कराचार्यस्य शिष्यः

पद्मपादाचार्यतोटकहस्तामलकचार्याणां सतीर्थश्चासीत् एषः सुरेश्वराचार्यः। पूर्वमीमांसायाम् उत्तरमीमांसायां तस्य महती कीर्तिः वर्तते। मीमांसाशास्त्रस्योपरि ग्रन्थोऽपि तेन विरचितः। भावनाविवेकः, विधिविवेकः, विभ्रमविवेकः इति त्रयो ग्रन्थाः तेन विरचिताः। तेन इष्टसाधनाविधिः स्वीक्रियते। स कुमारिलभट्टस्य शब्दभावनां, प्रभाकरस्य नियोगविध्यर्थं खण्डितवान् एवञ्च इष्टसाधना विध्यर्थ इति प्रतिष्ठापितवान्। शृंगेरीमठस्य गुरुपम्परायां स मठाधीश आसीत्। तस्य अद्वैतशास्त्रे महती कीर्तिः विद्यते। स जैमिनीयसूत्राणां श्लोकबद्धां संक्षिप्तव्याख्यां रचयामास।

आचार्यवाचस्पतिमिश्रः-

देशः- वाचस्पतिमिश्रस्य जन्मस्थानविषये संशयः किञ्च पण्डितानाम् एतस्मिन् विषये मतभेदोऽपि दृश्यते। केषाञ्चित् मते तस्य देशो नेपालस्य भामा नामकः प्रदेशः। विदुषामेवम् अभिप्रायोऽस्ति यत् स स्वदेशं स्मरणाय ब्रह्मसूत्रभाष्यटीकायाः नाम भामती इति प्रदत्तवान्। अपि च सोऽयं वाचस्पतिमिश्रः मिश्रान्तनामसम्बन्धात् मुरारिमिश्रपार्थसारथिमिश्रवत् मैथिल इति ज्ञायते।

कालनिर्णयः- सः ८४१ ईशाब्दे न्यायसूचीनिबन्धं विरचितवान्। अतः तस्य समयः ८४१ ईशावीयः इति।

कृतिः- सर्वेषु शास्त्रेषु लब्धप्रतिष्ठापकः षड्दर्शिनीटीकाकृत् मण्डनमिश्रमतानुसारी आसीत् आचार्यवाचस्पतिमिश्रः। आचार्येण वाचस्पतिमिश्रेण मण्डनमिश्रस्य विधिवेवक इति ग्रन्थस्योपरि न्यायकणिका इति टीकां रचयामास। तत्त्वबिन्दुः इत्यस्मिन् ग्रन्थे विभिन्नानां सम्प्रदायानां शाब्दबोधप्रक्रिया तेन आलोचिता। किञ्च स्वयं भाट्टमतम् अनुसृतवान्। सर्वेस्मिन् दर्शनशास्त्रेषु तस्य महती कीर्तिः विद्यते एवं पूर्वमीमांसाशास्त्रेऽपि।

शालिकनाथमिश्रः-

देशः- आचार्यशालिकनाथमिश्रस्य प्रदेश आसीत् बङ्गप्रदेश इति।

कालः- तस्य समय आसीत् नवमं शतकमिति।

कृतिः- शालिकनाथाचार्यस्य अपरं नाम आसीत् शालिकनाथः शारिकनाथो वा। शालिकनाथ आसीत् बङ्गीयो मण्डनमिश्रस्य परवर्तिकालिक: मीमांसकः। तस्य मतात् ऋते प्रभाकरस्य मतं स्पष्टं न भवति। शालिकनाथो मण्डनमिश्रस्य मतं खण्डितवान्। किञ्च वाचस्पतिमिश्रः शालिकनाथस्य मतं खण्डितवान्। शालिकनाथः प्रभाकरस्य बृहती इत्यस्योपरि ऋजुविमलापञ्चिका इति ग्रन्थम् एवञ्च लघ्वी इत्यस्योपरि दीपशिखापञ्चिका इति ग्रन्थं विरचितवान। मीमांसापरिशिष्टो नामक इति ग्रन्थस्तस्यैव कीर्तिः इति विद्वद्भिः अनुमन्यते।

तस्य गुरुमतप्रतिपादके प्रकरणपञ्चिका इत्यस्मिन् नामके प्रकरणे ग्रन्थे शास्त्रमुखं, नीतिपथः, नयवीथिः इत्यादयः नानाप्रकरणविषया आलोचिताः सन्ति। ग्रन्थेऽस्मिन् चतुर्दश प्रकरणानि समुलभ्यन्ते।

इतोऽपि मीमांसकाचार्याणां सारणीमाध्यमेन संक्षिप्तरूपेण परिचयः कार्यते-

जैमिन्युत्तरवर्तिनां आचार्याणां नामानि	आचार्याणां देशः/कालः	आचार्याणां कृतयः
१.देवस्वामी	तस्य कालोऽस्ति आनुमानिकः १००० ईशाब्दः।	स शाबरभाष्यस्योपरि टीकां किञ्च जैमिनीयसंकर्षकाण्डस्योपरि भाष्यं विरचितवान्।
२.सुचरितमिश्रः	आचार्योऽयं द्वादशशतके आसीत्।	सुचरितमिश्रेण श्लोकवार्तिकस्योपरि काशिका नाम्नी काचन व्याख्या विरचिता। अपि च विधिविचारः इति ग्रन्थस्य रचयिता।
३.भवदेवभट्टः	पि.वि.काणे महोदयस्य मते आचार्यः ११०० शतके आसीत्।	स मीमांसायाः तन्त्रवार्तिकस्योपरि तौतातिमतविलासः‘ इति टीकापरकग्रन्थं विरचितवान्।
४.सोमेश्वरभट्टः	आचार्योऽयं ११०० शतके आसीत्।	तेन तन्त्रवार्तिकस्योपरि न्यायसुधा इति टीका विरचिता। तस्य अपरग्रन्थोऽस्ति तन्त्रसारः इति।
५.चिदानन्दपण्डितः	चिदानन्दपण्डितः प्रसिद्धो मीमांसकः चतुर्दश शतके आसीत्। तस्य निवास आसीत् दक्षिणभारतप्रदेशः इति।	चिदानन्दो नीतितत्त्वाविर्भावः इति ग्रन्थं रचितवान्। स सर्वत्र कुमारिलमतम् अनुसृतवान्।
६.रघुनाथभट्टः	रघुनाथभट्टः षोडशशतके प्रथमार्धे आसीत्। एषः बङ्गीयमीमांसकेषु अन्यतमः। तस्य निवासो बङ्गप्रदेशः।	स मीमांसाशास्त्रस्य षट् प्रमाणानि अवलम्ब्य प्रमाणरत्न इति ग्रन्थं विरचितवान्। रघुनाथो भाट्टमीमांसकः आसीत्।
७.नारायणभट्टः	तस्य समय आसीत् १५६०-१६५६ ईशाब्दः पर्यन्तम्। तस्य निवास	स भाट्टमते मीमांसायाः ग्रन्थद्वयं विरचितवान्। तन्त्रवार्तिकस्योपरि

	आसीत् केरलप्रदेशः।	तन्त्रवार्तिकनिबन्धनमिति ग्रन्थं रचयामास। तस्य अपरो ग्रन्थोऽस्ति मानमेयोदयः।
८.कमलाकरभट्टः/दादुभट्टः	तस्य काल आसीत् सप्तदश शतकमिति।	स तन्त्रवार्तिकस्योपरि भावार्थः इति टीकां किञ्च शास्त्रदीपिकाया उपरि आलोक इति टीकां विरचितवान्। तस्य स्वतन्त्रग्रन्थोऽस्ति शास्त्रमाला' इति।
९.भवनाथमिश्रः	आचार्योऽयम् एकादश शतके विद्यमान आसीत्।	स जैमिनीयसूत्रस्योपरि नयविवेकः इति स्वतन्त्रव्याख्यां लिखितवान्।
१०.वरदरराजः	अस्याचार्यस्य कालविषये प्रामाणिकतथ्यं नोपलभ्यते। गोदावरीनदीतीरे कस्यचित् ग्रामस्य निवासी आसीत् आचार्योऽयम्।	रघुनाथस्य पुत्रो देवनाथस्य पौत्रो वरदराजः नयविवेकः इत्यस्य मीमांसाग्रन्थस्योपरि दीपिका नाम्नीं टीकां विरचितवान्।
११.गुरुमताचार्यः चण्डूः	तस्य देश आसीत् मिथिला। स द्वादश शतके आसीत्।	स जैमिनीयसूत्रस्योपरि नयरत्नाकरः इति व्याख्यां विरचितवान्।
१२.रामानुजाचार्यः	स गोदावरीनदीतीरे निवासं कृतवान्। तस्य कालः आसीत् अष्टादशशताब्दी।	स भाट्टमते पार्थसारथिमिश्रस्य न्यायरत्नमाला इत्यस्योपरि नायकरत्नः नायरत्नः इति द्वे टीके विरचितवान्।
१३.मुरारिमिश्रः	तस्य समय आसीत् ११५०-१२२० शताब्दी पर्यन्तमिति।	संस्कृते एवं प्रवादवाक्यमस्ति यत् मुरारेस्तृतीयः पन्था इति। स श्रेष्ठमीमांसकेषु अन्यतम आसीत्।तस्य मीमांसाशास्त्रस्योपरि ग्रन्थः विराजते यथा-जैमिनीयसूत्रस्योपरि त्रिवादनीतिनयनः' इति।
१४.माधवाचार्यः	स विजयनगरे महाराजस्य बुक्कस्य राजसभायामासीत्। तस्य समय आसीत्	स शास्त्रदीपिका इति ग्रन्थस्योपरि सुगमेन बोधनार्थं १५०० श्लोकैः न्यायमाला इति ग्रन्थं किञ्च गद्यैः

		जैमिनीयन्यायमालाविस्तरः इति ग्रन्थं रचयामास।
१५.लौगाक्षिभास्करः	आचार्यो भवति षोडशशतकीयः।	तस्य मीमांसाशास्त्रस्योपरि प्रसिद्धो ग्रन्थो भवति अर्थसंग्रहः इति। ग्रन्थस्य सरलाभाषा रीतिश्चासीत् जनप्रियतायाः कारणम्।
१६. नीलकण्ठभट्टः दीक्षितो वा	धरित्र्यां तस्य काल आसीत् सप्तदश शतकमिति।	स दक्षिणभारतस्य मयूखसम्प्रदायस्य प्रवर्तकः आसीत्। तस्य मीमांसाशास्त्रोपरि ग्रन्थोऽस्ति मीमांसान्यायसंग्रहः इति।
१७.गदाधरभट्टाचार्यः	ईशावीयः सप्तदशशतके बङ्गभूमौ प्रख्यातः प्रसिद्धो नैयायिकः आसीत् गदाधरभट्टाचार्यः।	स मीमांसाशास्त्रस्योपरि विधिस्वरूपविचारः इति ग्रन्थं रचयामास।
१८. अन्नभट्टः	काश्यां तस्य निवासस्थलमासीत्। समयश्चासीत् षोडश शताब्दी इति।	प्रसिद्धनैयायिकेषु अन्यतम आसीत् अन्नभट्टः। स तन्त्रवार्तिकस्योपरि सुबोधिनी इति टीकां किञ्च सोमेश्वरविरचितस्य न्यायसुधा इत्यस्योपरि राणकोज्जीवनी राणकफक्किकाव्याख्यां वा रचयामास। अपि च ५४ श्लोकैः राणकभावनाकारिकाविवरणमिति ग्रन्थं विरचितवान्।
१९.उम्बेकभट्टः	तस्य समय आसीत् ६७०-७५० शताब्दी पर्यन्तमिति।	स श्लोकवार्तिकस्योपरि तात्पर्यमिति टीकां रचितवान्।
२०.अनन्तभट्टः	तस्य काल आसीत् सप्तदश शतकमिति।	कमलाकरभट्टस्य पुत्र आसीत् अनन्तभट्टः। स मीमांसाशास्त्रस्योपरि न्यायरहस्यमिति व्याख्यां रचयामास। अपि च पितृदेवरचितायाः शास्त्रमाला इत्यस्योपरि ज्योत्स्ना नाम्नीं वृत्तिं

		विरचितवान्।
२१.आपदेवः	१७ शतकस्य पूर्वार्धभागः। ऐतिहासिकैः अनुमन्यते यत् आपदेवः १६३० ईशाब्दे आसीत्।	मीमांसकस्य अनन्तदेवस्य पुत्र आपदेवः। तस्य विरचितो ग्रन्थोऽस्ति मीमांसान्यायप्रकाशः इति। ग्रन्थोऽयम् आपदेवी इत्यप्यभिधीयते। तस्य अपरो ग्रन्थोस्ति अधिकरणचन्द्रिका इति।
२२.खण्डदेवमिश्रः धीरेन्द्रो वा	शाजहानस्य समये आसीत्। अतः तस्य समयः सप्तदश शतकम्।	एतेनाचार्येण मीमांसाकौस्तभः इति मीमांसाग्रन्थं रचयामास। तस्य द्वितीयग्रन्थः भाट्टदीपिका, किञ्च तृतीयग्रन्थः भाट्टरहस्यम् इति।

उपसंहारः-

एवं बहवः पण्डिताः मीमांसकाः आसन् ये मीमांसाशास्त्रस्योपरि बहून् ग्रन्थान् विरचितवन्तः। ते आचार्याः शास्त्रसंरक्षणाय स्वात्मानं विस्मृत्य समग्रं जीवनमिदं समर्पितवन्तः, किञ्च वैदिकशास्त्रपरम्परां रक्षितवन्तः। येन कारणेन भारतवर्षस्य भिन्नेषु भिन्नेषु स्थानेषु अद्यापि भिन्नाः भिन्नाः शास्त्रपरम्पराः परिलक्ष्यन्ते। एतादृशी आसीत् तेषां शास्त्रं प्रति निष्ठा श्रद्धा च। तस्मात् कारणात् अद्यापि तेषां नामानि इतिहासे उज्ज्वलाक्षरेण दीप्तानि सन्ति। इतिहासस्य प्रवाहगतिः कदापि स्थिरा न भविष्यति। काले काले तस्य प्रवाहगतिः वर्धते। कारणं हि जगत् परिवर्तनशीलमस्ति, परिवर्तनमेव तस्य स्ववैशिष्ट्यमिति। तस्मात् इतिहासस्य परिधिरपि वर्धमानो दृश्यते। अद्य य इतिहासो दृश्यते पञ्चाशतवर्षादनन्तरं तस्य पुनः विवर्तनं भविष्यति। एतदेव इतिहासस्य वैशिष्ट्यम्। प्राचीनकाले पूर्वमीमांसायाः यादृशः प्रभाव आसीत् तदिदानीं किञ्चित् क्षीणा परिदृश्यते। कारणं हि मनुष्यस्य रुचिः सर्वदा समाना न भवति। रुचिभेदात् तेषां परिवर्तनम् ईक्ष्यते। आगामिनि काले पुनः मीमांसायाः विवर्द्धनं भविष्यति। अस्माकं पूर्वजाः शास्त्ररक्षणाय बहु प्रयत्नं कृतवन्तः किञ्च स्वात्मानं समग्रजीवनमिदं शास्त्रस्य कृते समर्पितवन्तः। एतस्मिन् विषये मनुष्यैः तत् चिन्तनीयम्। कारणं हि मनुष्य एव सर्वेषां समाधानकर्ता। अतः मनुष्यैः अमूल्यशास्त्राणां संरक्षणं कर्तव्यमिति।

“परिशीलितग्रन्थसूची (Bibliography)”

R. THANGASWAMI । (1980) । ADVAITA-VEDANTA LITERATURE A BIBLIOGRAPHICAL SURVEY।UNIVERSITY OF MADRAS।

2. आपदेवः। पो० बा०. नं० १००८। मीमांसान्यायप्रकाशः। डा० राधेश्याम चतुर्वेदी (व्याख्या)। वाराणसी, चौखम्बा संस्कृत सीरीज आफिस ।

3. डा० गजाननशास्त्री-मुसलगाँवकर। पो० बा०. नं० १०६१। वाराणसी, चौखम्बा विद्याभवन।

4. प्रो. श्रीमती रञ्जना। १९९९। पूर्व-मीमांसा-विमर्श। लखनऊ, शिवाराधन प्रकाशन।

5. श्रीलौगाक्षिभास्करः। वि० सं० २०७१। अर्थसंग्रहः (अर्थमीमांसा हिन्दीव्याख्योपेतः)। डा० राजेश्वरशास्त्रिमुसलगाँवकरः (व्याख्याकारः)। वाराणसी, चौखम्बा संस्कृत संस्थान।

Sujita-Parāmānikaḥ

सुजित-परामानिकः

Assistant Professor

Netaji Mahavidyalaya, Arambagh, Hooghly -712601

Postal Address

Vill_Telua, P.O_Bhalia, P.S_Arambagh, Dist_Hooghly, Pin_712615

Email Id- sujit.rkmvu@gmail.com

***

विद्यावृत्तिक्षेत्रयोर्निर्णये अवधेयाः अंशाः सहकारिण्यः सरण्यश्च – होराहृदयावलोकनम्

- रामकृष्णपेजत्तायः

शोधसारः –

विद्या वृत्तिश्च मानुषजीवनस्य मुख्यावंशौ । तस्मात् "कस्मिन् क्षेत्रे स्वा विद्या वृत्तिश्च सफला जायेत?" इति जिज्ञासया दैवज्ञमुपसर्पन्तो नैके विलोक्यन्ते लोकाः । अनयोरुभयोः उपजीव्योपजीवकभावोऽप्यस्तीत्यतः सहैव विचारः क्रियते दैवज्ञैः । किञ्च अनयोर्विचारे आवश्यकाः अंशाः होराग्रन्थेषु न एकत्र सम्प्रोक्ताः । सत्यपि कर्माजीवाख्येऽध्याये न तन्मात्रस्य अवलोकनम् अलम् इति विदन्त्येव विदः । तत्र प्रसङ्गान्तरेषु उक्ताः व्यक्ताश्च अंशाः सूक्ष्मं समीक्ष्यन्ते चेदेव फलादेशः समुचितो भवति । तदस्मिन् विषये व्यवस्थितं यथाशास्त्रं निरूपणं न क्वापि विलोकितम् इति हेतोः अत्यावश्यके तत्कर्मणि प्रवर्तते शोधपत्रमिदम् ।

अपि च, आधुनिकाः विद्यावृत्तयो बहुप्रकारा बहुसंख्याकाश्च । यथा यथा कालः पुरः सरति तथा तथा नवीनानां विद्यावृत्तीनाम् आविर्भावोऽपि निभाल्यतेऽस्माभिः । अतो न ताः सर्वा अपि समावेशयितुं शक्याः शास्त्रग्रन्थेषु, कालभेदेन तदसम्भाव्यत्वात् । तथापि सन्ति शास्त्रोल्लिखिताः बहवोंऽशाः, येषामाधारेण अर्वाचीनानामपि विद्यावृत्तीनां कारकत्वविवेकः शक्यः कर्तुम् । परन्त्वाधुनिकेषु ज्यौतिषिकेषु बहवः शास्त्रहृदयमिदमजानन्तः स्वकल्पनाभिरेव अशास्त्रीयानपि कारकत्वसम्बन्धान् प्रकल्प्य मलिनयन्ति शास्त्रसरणिमिति नाप्रत्यक्षं प्रेक्षावताम् । तस्मात् शास्त्रमर्यादामनुल्लङ्घ्य आधुनिकव्यवहारं सङ्गमय्य च विद्यावृत्तिक्षेत्रविचारः कथं कर्तव्य इति प्रपञ्चनमपि अत्र विहितमस्ति । तदनेनापि हेतुना पत्रमिदं भवत्युपादेयम् ।

कुञ्ची-शब्दाः – विद्याविचारः, वृत्तिविचारः, वृत्तिविशेषनिर्णयः ।

प्रस्तावना

जनिमतां जीवनार्थभूतेषु चतुर्षु पुरुषार्थेषु धर्मार्थकामा ऐहिकाः । तेषु च धर्मकामयोरप्यर्थमूलत्वादर्थः प्राधान्यं भजते । वृत्तिरेवार्थार्जने प्रमुखोपायः । गर्भेश्वरोऽपि न तिष्ठति विना वृत्त्या तस्याः पुरुषलक्षणत्वात् । सा च वृत्तिः प्रायेण विद्यायत्ता । अतो वृत्तिं लक्ष्यीकृत्य विद्यायां प्रवृत्तिर्दरीदृश्यते लोके । तस्मात्तयोरुभयोः समन्वयनं विधाय विद्या वृत्तिश्चादेश्ये दैवज्ञेन । वस्तुतः अनयोश्चिन्तनार्थं शास्त्रे प्रदर्शिता उपायाः प्रायेण भिन्नाः । अथाप्यधुनातनं जनमानसं प्रवृत्तिरीतिं चानुसृत्य तयोरुभयोः समन्वयनेन फलादेशो युक्त इति सिद्धान्तयन्ति सिद्धवचसः । केचन ग्रह-भाव-राशीनां मिथो योगविशेषा अपि तादृक्षाः

विद्यन्ते ये विद्यावृत्त्योः क्षेत्रम् अभिव्यञ्जन्ति । अतो ग्रहाणां युति-दृष्टि-अवस्थित्यादीनां सर्वेषाम् अपि फलानि मनसि कार्याणि भवेयुः । काले चास्मिन् बहुप्रकारा विद्यावृत्तयः, तत्र पुनर्बहुशः शाखोपशाखाश्चेति विषयस्य नितान्तविस्तृतत्वात् फलादेशः सावधानत्वमपि अपेक्षते । सर्वमिदं साधु समीक्ष्य शास्त्रञ्चानुसृत्य तत्पथोऽत्र निरूप्यते ।

तत्रादौ विद्याविचारः

अस्याश्चिन्तनं पञ्चमेनेति मिहिरः । तथा चाह –

कल्यस्वविक्रमगृहप्रतिभाक्षतानि[1] - इति ।

वस्तुतोऽत्र पञ्चमभावस्य प्रतिभेति संज्ञा निगदिता । किन्तु तेन प्रज्ञादयोऽपि ग्राह्याः । तदुक्तं प्रश्नमार्गे –

प्रज्ञा प्रतिभा मेधा विवेकशक्तिः पुरातनं पुण्यम् ।
मन्त्रामात्यतनूजाः पञ्चमभात् सौमनस्यमपि चिन्त्यम् ।।[2] इति ।

द्वितीयेनापि विद्याचिन्तनं विहितमस्ति, यथा फलदीपिकायाम् -
वित्तं विद्या स्वान्नपानानि भुक्तिं दक्षाक्ष्यास्यं पत्रिका वाक्कुटुम्बम् ।[3] इति ।
केचित् चतुर्थेनापि विद्याविचारं वाञ्छन्ति । यथाह वैद्यनाथः –
पातालवृद्धिहिबुकक्षितिमातृविद्यायानाम्बुगेहसुखबन्धुचतुष्टयानि ।[4] इति ।

इत्थं द्वितीय-चतुर्थ-पञ्चमभावैर्विद्याचिन्तनं व्यधायि पूर्वाचार्यैः ।[5]
अथ चिन्तनरीतिर्निरूपणीया । अत्रास्ति सोपानद्वयं भावस्य वृद्धिहानित्वम् अनुभवगोचरत्वञ्चेति ।
तत्रादौ वृद्धिहानित्वम् । यो भावः स्वस्वामिना शुभैर्वा युक्तो दृष्टो वा यदि स्यात्तर्हि तद्भावपदार्थस्य वृद्धिर्वाच्या । यदि पापैर्युतस्तर्हि तस्य हानिः । अत्र भाग्याधिपतिः पापोऽपि शुभ इति, अष्टमाधिपतिः शुभोऽपि पाप इति च विशेषोऽवधेयः । अत्र दैवज्ञसमयो यथा –

यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्याभिवृद्धिः ।
पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या प्रश्नतो जन्मतो वा ॥[6] इति ।

---

[1] बृहज्जातकम् ०१-१६

[2] प्रश्नमार्गः १४-१०

[3] फलदीपिका ०१-१०

[4] जातकपारिजातः ०१-४५

[5] एषु द्वितीयपञ्चमावेव मुख्यौ, बहुभिरुक्तत्वात् ।

[6] षट्पञ्चाशिका ०१-२१

अपि च, भाव-भावाधिप-भावकारकाणां बलरहितत्वं, तेषां पापमध्यस्थितिः, पापानां शत्रूणां वा योगदृष्टी, शुभानां मित्राणां वा योगदृष्ट्योरभावः, तेभ्यः चतुर्थ-अष्टम-द्वादश-पञ्चम-नवमेषु पापानां स्थितिः – इत्येतानि लक्षणानि भावहानिकराणि । उक्तेषु द्वित्राणि लक्षणानि दृष्टानि चेत्तद्भावहानिः स्फुटैव । तदाख्यातं प्रश्नमार्गे –

भावाधीशे च भावे सति बलरहिते च ग्रहे कारकाख्ये
पापान्तःस्थे च पापैररिभिरपि समेतेक्षिते नान्यखेटैः ।
पापैस्तद्बन्धुमृत्युव्ययभवनगतैस्तत्त्रिकोणस्थितैर्वा
वाच्या तद्भावहानिः स्फुटमिह भवति द्वित्रिसंवादभावात्॥[7] इति ।

इहान्त उदितं 'स्फुटमिह भवति द्वित्रिसंवादभावात्' इति वचनं सूत्रतुल्यम् । यतोऽयं नयो बहूपयोग्यः । यतः शास्त्रेऽस्मिन् सर्वत्रापि कश्चिदेकं विषयं निर्णेतुं बहवः पन्थानो विधीयन्ते । तत्र सर्वत्राप्ययमेव नियमः श्रयणीयो यद्यत् फलं द्वित्रादिप्रकारैः संवादं भजते तदेवादेश्यमिति । इदमत्रापि मननीयम् । यतः प्रकृतस्य विद्याचिन्तनस्य द्वितीय-चतुर्थ-पञ्चमा भावाः तेषामधिपाश्चेत्यादयो बहवो मार्गाः प्रदर्शिताः ।

इत्थमुक्तो भावानां वृद्धिहानित्वनिर्णयप्रकारः । अथैषामनुभवगोचरत्वं कथं विचिन्त्यमिति विव्रियते । यस्य भावस्य भावाधिपस्य भावकारकस्य वा लग्न-लग्नाधिपयोरन्यतरेण सम्बन्धो वर्तेत तद्भावपदार्थोऽनुभवगोचरतां याति । सम्बन्धश्च युतिदृष्टिकेन्द्रस्थित्यादिरूपः । तथा च शास्त्रसमयः –

यस्य यस्य विलग्नेन सम्बन्धो लग्नपेन वा ।
दृग्योगकेन्द्रगत्याद्यैः स स भावोऽनुभूयते ॥[8]

अथ ग्रहाणां विद्याविशेषकारकत्वं वक्तव्यम् । तदन्ते वृत्त्या सह सन्दृभ्य प्रदर्श्यते ।

अथ वृत्तिविचारः

लग्नचन्द्रसूर्याणां यो बलवत्तमः, तस्माद् दशमाधिपतेर्नवांशाधिपतिः यो ग्रहः, तदाधारेण जातकस्य वृत्तिरादेश्येति निगदन्ति होराविदः[9] । अमुमेवाशयं कल्याणवर्मा किञ्चित् सविशेषमाह यथा –

होरेन्द्वोर्बलयुक्ताद्यो दशमस्तत्स्वभावजं कर्म ।
तत्स्थाधिपपरिवृद्ध्या वृद्धिर्ज्ञेयान्यथा हानिः ।।[10]

---

[7] प्रश्नमार्गः १४-३५

[8] प्रश्नमार्गः १४-१०

[9] भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या – बृ. जा. १०.०१

[10] सारावली ०८-१२

अत्र दशमः दशमस्थः दशमाधिपश्चैषां त्रयाणामाधारेण वृत्तिनिर्णयो विहितः ।[11] असावेव पद्धतिरधुना वृद्धैराद्रियते । अयमाशयो मिहिरस्यापीति साधितमस्ति रुद्रेण यथा – कर्माजीवाध्याये तृतीयपद्ये अन्तिमे पादे 'कर्मेशाध्युषितनवांशकर्मसिद्धिः' इत्यत्र पुनरुक्तिदोषः प्रसजति । तद्वारणाय तत्र कर्म-ईश-अध्युषित-नवांश-शब्दानां कर्म इत्यनेन पदेन पृथक् पृथगन्वयः कार्यः, येन कल्याणवर्मोक्त एवाभिप्रायः अस्य वाक्यस्य सिद्ध्यति । इत्थमसौ पद्धतिर्बहुसम्मतेति निश्चप्रचम् । उक्तैर्लक्षणैर्वृत्तिकारकं ग्रहं (ग्रहान् वा) निर्णीय, तद्ग्रहकृता वृत्तिः सुविचिन्त्यादेश्या ऊहापोहपटुना दैवज्ञेन ।

ग्रहविशेषेण वृत्तिविशेषस्य निर्णयः

तत्र केन ग्रहेण का वृत्तिर्वाच्येति निरूपितमस्ति कर्माजीवप्रकरणे । परन्तु, तावतैव अविरमन् दैवज्ञः दशान्तर्दशादिष्वपि उक्तान् अंशान् युक्त्या सङ्गृह्णीत । सोऽयमर्थः **'अर्कांशे तृणकनकोर्णभेषजाद्यै'**रित्यादिषु मिहिरवचनेषु निवेशितेन आदिपदेन सिद्ध्यति । यथा रवेः **'सौर्यं स्वं नखदन्तचर्मकनकक्रौर्याध्वभूपाहवैः'** इत्याद्युक्तानि धनागममूलानि ग्राह्याणि । सूर्यस्य राजत्वाद् राजकीयवृत्तिः, ताम्राधिपतित्वात् ताम्रवस्तूनां व्यवहारः, पितृकारकत्वात् पितृतः प्राप्ता चेत्याद्या अपि वृत्तयः तेन सिद्ध्यन्ति । तदेवं यो यः पदार्थो विषयो वा येन येन ग्रहेण सम्बद्धः तत्तद्ग्रहस्य वृत्तिकारकत्वे तत्तद्विषयसम्बद्धा वृत्तिः आदेश्या भवति । एवं सर्वेषां ग्रहाणां कर्माजीवे उक्ताः प्रकरणान्तरेषु व्यक्ताश्च विद्यावृत्तयः प्रमुखान् होराग्रन्थानाधृत्य सन्दृश्यन्ते ।

रविः – तृणसंबद्धकर्माणि, सौवर्णानां निर्माणं विक्रयणं वा, ऊर्णापदार्थाः, भेषजसंबद्धम् (वैद्यत्वम्, औषधविक्रेतृत्वं वा), सुगन्धिद्रव्याणां निर्माणं विक्रयणं वा, दन्तसंबद्धम्, क्रौर्यप्रधानं प्रयाणप्रधानं च कर्म, युद्धम् (आरक्षकत्वं सैनिकत्वं वा), ताम्रवस्तूनां मूलपदार्थानां च व्यावहारः, सर्वकारीयवृत्तिः, फलद्रुमाः, मन्त्रजपः, वञ्चना, द्यूतम्, अनृतं चेत्यादीनि । अत्र प्रमाणम् -

> **अर्कांशे तृणकनकोऽर्णभेषजाद्यैः ।**[12]
> **सौर्यं स्वं नखदन्तचर्मकनकक्रौर्याध्वभूपाहवैः ।**[13]
> **फलद्रुमैर्मन्त्रजपैश्च शाठ्याद् द्यूतानृतैः कम्बलभेषजाद्यैः ।**
> **धातुक्रियाद्वा क्षितिपालपूज्याद् जीवत्यसौ पङ्कजवल्लभांशे ।।**[14]

---

[11] अत्र दशमद्रष्टापि योजनीयः इति शास्त्रसमयः ।

[12] बृहज्जातकम् १०-०२

[13] बृहज्जातकम् ०८-१२

[14] फलदीपिका ०५-०२

चन्द्रः – कृषिः, जलजपदार्थानां रक्षणं विक्रयणं वा, जलसम्बद्धकर्मकरणम्, दुग्धादीनां गव्यानां व्यवहारः, पशुरक्षा, पौरोहित्यम्, इक्षुः, वस्त्राणि, पुष्पम्, क्रीडा, तिलाः, अन्नम्, श्रमः, स्त्री –इत्येतदाद्याधृतकर्माणि इत्यादीनि । यथोक्तम् -

चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च ।[15]

इन्दोः प्राप्य दशां फलानि लभते मन्त्रद्विजात्युद्भवा-
नीक्षुक्षीरविकारवस्त्रक्लुसुमक्रीडातिलान्नश्रमैः ।[16]

जलोद्भवानां क्रयविक्रयेण कृषिक्रियागोमहिषीसमुत्थैः ।
तीर्थाटनाद्वा वनिताश्रयाद्वा निशाकरांशे वसनक्रियाद्वा ॥[17]

कुजः – स्वर्णादिधातुपदार्थानां व्यवहारः, अग्निसम्बद्धानां पाक-विद्युद्-यन्त्रविशेष-अग्निशामकदलादीनां कर्माणि, आयुधाधारिताः आरक्षकसैनिकादिवृत्तयः, साहसकर्माणि, शत्रुनिग्रहः, राज-सोदर-भूमि-आविक-आज-सम्बद्धो व्यवहारः, स्वर्णविक्रयः, म्लेच्छाश्रयः, चौर्यम्, पैशुनम् इत्यादीनि । यथोक्तम् -

धात्वग्निप्रहरणसाहसैः कुजांशे ।[18]

भौमस्यारिविमर्दभूपसहजक्षित्याविकाजैर्धनम् ।[19]

भौमांशके धातुरणप्रहारैर्महानसाद् भूमिवशात् सुवर्णात् ।
परोपतापायुधसाहसैर्वा म्लेच्छाश्रयात् सूचकचोरवृत्त्या ॥[20]

बुधः – लिपिः (टङ्कन-मुद्रणादिकम्), गणितम् (C.A.,वित्तकोशादिसम्बद्धश्च), काव्यानां रचना व्याख्यानं वा, शिल्पकर्म, दौत्यम्, अध्यापनम्, युक्तिद्रव्य-स्वर्ण-भूमिसम्बद्धो व्यवहारः, हास्यम्, वाक्प्रधानकर्म, ज्यौतिषम्, वेदाध्ययनम्, जपः, पौरोहित्यं चेत्यादीनि । अत्र अभियुक्तवचनानि यथा -

सौम्यांशे लिपिगणितादिकाव्यशिल्पैः ।[21]

बौध्यां दौत्यसुहृद्गुरुद्विजधनं विद्वत्प्रशंसा यशो-
युक्तिद्रव्यसुवर्णवेसरमहीसौभाग्यसौख्याप्तयः ।[22]

---

15 बृहज्जातकम् १०-०२

16 बृहज्जातकम् ०८-१३

17 फलदीपिका ०५-०३

18 बृहज्जातकम् १०-०२

19 बृहज्जातकम् ०८-१४

20 फलदीपिका ०५-०४

21 बृहज्जातकम् १०-०२

22 बृहज्जातकम् ०८-१५

काव्यागमैर्लेखकलिप्युपायैर्ज्योतिर्गणज्ञानवशाद् बुधांशे ।
परार्थवेदाध्ययनाज्जपाच्च पुरोहितव्याजवशात् प्रवृत्तिः ॥[23]

गुरुः – अध्यापनम्, याजनम्, धर्मकर्माणि, प्रज्ञाप्रधानवृत्तयः (I.A.S., Research etc.), शास्त्राणि, नीतिः, राजसम्बन्धः, रजतम् इत्यादीनि । यथाभिहितं सूरिभिः -

जीवांशे द्विजविबुधाकरादिधर्मैः ।[24]
माहात्म्योद्यममन्त्रनीतिनृपतिस्वाध्याययज्ञैर्धनम् ।[25]
जीवांशके भूसुरदेवतानां समाश्रयाद् भूमिपतिप्रसादात् ।
पुराणशास्त्रागमनीतिमार्गाद् धर्मोपदेशेन कुसीदवृत्त्या ॥[26]

शुक्रः – मणयः, रजतम्, गव्यानि, गीतनृत्यादीनि, सुरभिद्रव्यम्, अन्न-पान-वस्त्राणि, Modeling, Fashion Designing, स्त्री, रत्नानि, उपभोगसाधनानि, वाणिज्यम् (M.B.A. etc.), कृषिः, अमात्यत्वम्, कवित्वम् इत्यादीनि । तदुक्तं यथा -

काव्यांशे मणिरजतादिगोमहिष्यैः ।[27]
शौक्र्यां गीतरतिप्रमोदसुरभिद्रव्यान्नपानाम्बर-
स्त्रीरत्नद्युतिमन्मथोपकरणज्ञानेष्टमित्रागमः ।
कौशल्यं क्रयविक्रये कृषिनिधिप्राप्तिर्धनस्यागमः[28]
स्त्रीसंश्रयाद् गोमहिषीगजाश्वैस्तौर्यत्रिकैर्वा रजतैश्च गन्धैः ।
क्षीराद्यलङ्कारपटीपटाद्यैः शुक्रांशकेऽमात्यगुणैः कवित्वात् ॥[29]

शनिः – श्रमसाध्यकर्माणि (वाहनचालन-पत्रवाहन-भवननिर्माणादीनि), हिंसा, भारवहनम्, नीचकर्माणि, शिल्पम्, सञ्चारप्रधानकर्माणि, कुधान्य-दारुमयवस्तुसम्बद्धं कर्म, राजकीयनेतृत्वम् इत्यादीनि । तथा चोक्तम् -

सौरांशे श्रमवधभारनीचशिल्पैः ।[30]

---

[23] फलदीपिका ०५-०९

[24] बृहज्जातकम् १०-०३

[25] बृहज्जातकम् ०८-१६

[26] फलदीपिका ०५-०६

[27] बृहज्जातकम् १०-०३

[28] बृहज्जातकम् ०८-१७

[29] फलदीपिका ०५-०७

[30] बृहज्जातकम् १०-०३

श्रेणीग्रामपुराधिकारजनिता पूजा कुधान्यागमः ।[31]
शन्यंशके मूलफलैः श्रमेण प्रेष्यैः खलैर्नीचधनैः कुधान्यैः ।
भारोद्वहात् कुत्सितमार्गवृत्त्या शिल्पादिभिर्दारुमयैर्वधाद्यैः ॥[32]

इत्थं प्रदर्शिता ग्रहकृता वृत्तिविशेषाः ।

अत्र वृत्तिनिर्देशावसरे ग्रन्थेषूक्तानां शब्दानां न केवलं वाच्यार्थः, प्रत्युत सङ्केतिता अपि अर्थविशेषाः युक्त्या ग्राह्या इति शास्त्रसमयः । विशिष्य, वाराहहोरागतेषु श्लोकेषु स्थितं प्रत्येकमपि पदं वाक्यं च सूत्ररूपं गृह्णन्ति होराविदः ।[33] अतस्तेषां शब्दानां वाक्यानां च सङ्केतितानपि अर्थान् गृह्णन् आजीविकाम् आदिशेद् दैवज्ञः । यथा – कुजस्य 'साहस'शब्देन आरक्षकत्वं सैनिकत्वम् अमार्गेण धनार्जनं चेत्यादीन्यपि ग्राह्याणि । तदपि दिग्दर्शनार्थं यथास्थानं प्रदर्शितम् । तत्सम्बद्धा अनुक्ता अपि युक्त्या कल्पनीयाः ।
अयमत्र विशेषोऽवधेयो यदधुना भूयिष्ठा नवीना विद्या वृत्तयश्च दरीदृश्यन्ते, यासां कल्पनामात्रमपि शास्त्रप्रणयनकालेषु नासीत् । ता अपि ग्रहाणां कारकत्वयुक्तिमवलम्ब्य सुविविच्यादेष्टव्या ऊहापोहपटुना दैवज्ञेन । यथा – कुजस्याग्निकारकत्वाद् विद्युत्(Electricity)सम्बद्धा वृत्तयो वक्तुं शक्याः । तथैव बुधस्य गणितकारकत्वात् C.A., गाणनिक्यम् (Keeping accounts) इत्यादीनि वाच्यानि । अनयापि धिया तत्र तत्र मया प्रदर्शिताः सन्ति । अनयैव युक्त्याऽनुक्ता अप्यूहनीयाः ।

ग्रहाणां ग्रहान्तरसम्बन्धेन वृत्तिविशेषनिर्णयः

वृत्तिकारकग्रहस्य ग्रहान्तरसम्बन्धाधारेणापि वृत्तिरादेश्या । यथा - कल्प्यतां जातके रविर्वृत्तिकारकः सन् शुक्रयुतोऽस्तीति । रविस्ताम्रकारकः । शुक्रश्च वाणिज्यकारकः । अस्यां स्थितौ ताम्रसम्बन्धिवाणिज्यं शक्यमादेष्टुम् । अत्र प्रमाणम् – **"कथितफलैः परतो विकल्पनीयाः"**[34] । इदमप्यत्र सङ्गृह्योच्यते ।

- रविः चन्द्रयुतश्चेद्यन्त्रकारः अश्मकारो वा, कुजयुतश्चेत् शस्त्रक्रियाभिज्ञो विषवैद्यो वा, बुधयुतश्चेत् संशोधकः, गुरुयुतश्चेद् वैद्यशास्त्रस्य अध्यापकः, शुक्रयुतश्चेत् स्वायत्तचिकित्सालयः, शनियुतश्चेदौषधविक्रयी चैवम् ।

---

31 बृहज्जातकम् ०८-१८

32 फलदीपिका ०५-०८

33 आचार्येण ग्रन्थादौ 'स्वल्पं वृत्तविचित्रमर्थबहुलम्' इत्यभिहितम् इह अनुसन्धेयं सूरिभिः ।

34 बृहज्जातकम् १४-०५ (वस्तुतोऽसौ श्लोकांशो द्विग्रहयोगे पठितः । अथाप्याचार्यवचनसामर्थबहुलत्वाद् युक्तिसत्वे सर्वतोगामित्वाच्चात्रापि शक्यो ग्रहीतुम् ।

- चन्द्रः कुजयुतश्चेन्मद्यविक्रयणेन वेश्याव्यवहारेण कूटव्यवहारैर्वा, बुधयुतश्चेत् (बुद्धिप्रधानाभिः) क्रीडाभिः, गुरुयुतश्चेत् प्राचीनविद्याभिः, शुक्रयुतश्चेत् स्त्रीसम्बद्धवसनप्रसाधनादिव्यवहारेण, शनियुतश्चेत् श्रमकर्मभिश्च जीवनं प्रवर्तयति ।
- कुजो रवियुतश्चेत् स्वकीयेषु विद्युदादि(electrician etc.)विषयेषु सर्वकारीयवृत्तिः, चन्द्रयुतश्चेत् जलसेना (navy) इत्यादि, बुधयुतश्चेत् software engineering, गणितम् इत्यादि, गुरुयुतश्चेत्स्वविषये अध्यापनम्, शुक्रयुतश्चेत्स्वविषयेषु स्वर्णवैद्युतोपकरणादिषु वाणिज्यम्, शनियुतश्चेत् fire service, दौष्ट्यम् इत्यादि ।
- बुधो रवियुतश्चेद्गणिताध्यापनादिषु सर्वकारीयोद्योगः, चन्द्रयुतश्चेत् चेतोहारिवाक्प्रधानाः anchoring इत्यादयः, कुजयुतश्चेत् यन्त्रसम्बद्धाः, गुरुयुतश्चेत् अध्यापनम्, शुक्रयुतश्चेत् सङ्गणकादिविक्रयणं तदाधारितं टङ्कनमुद्रणादिकेन्द्रं वा, शनियुतश्चेद् वार्तिकत्वम् (journalism) इत्यादिकं च वाच्यम् ।
- गुरू रवियुतश्चेत् अध्यापने सर्वकारीयोद्योगः, शैक्षणिक-संशोधनादिसंस्थासु उन्नतपदावाप्तिः वा भवति । चन्द्रादीनां योगेन तत्तद्ग्रहसम्बद्धविषयेष्वध्यापनं योग्यमादेष्टुम् ।
- शुक्रस्य रव्यादिसम्बन्धेन तत्तद्ग्रहसम्बद्धविषयेषु वाणिज्यं वक्तुं शक्यम् । यथा रविसम्बन्धेन औषधविक्रयणम्, कुजसम्बन्धेन वैद्युतयन्त्रोपकरणानां विक्रयणम् इत्यादिकम् ।
- शनी रवियुतश्चेद्धातुकुशलः, चन्द्रयुतश्चेत् कृषिकर्म, कुजयुतश्चेत् दैहिकश्रमसाध्यानि प्रयाणप्रधानानि च कर्माणि, शुक्रयुतश्चेत् स्त्रीजनाश्रयणेन इत्येवमूह्यानि ।

इह द्व्यादिग्रहयोगोक्तानि फलान्यपि युक्तानि अनुसन्धातुम् । यथा रविचन्द्रयोगेऽभिहितं यन्त्रकारत्वम् अश्मकारत्वं च द्विग्रहयोगाध्यायोक्तमेव । अन्या अपि वृत्तयो यथा – रविशनियोगे धातुभाण्डादिसम्बद्धा, कुजबुधयोगे मूलादिस्नेहकूटैर्व्यवहारः, कुजशुक्रयुतौ गोपालनद्यूतप्रवर्तनादिका, बुधगुरुयुतौ रङ्गसम्बद्धा, बुधशुक्रयुतौ वाक्प्रधाना चैवं वृत्तिविकल्पाः ऊह्याः ।

दशमत्वापन्नराशिवशाद् वृत्तिनिर्णयः

प्रत्येकं राशेः जन्मलग्नत्वे जन्मराशित्वे च[35] यानि फलान्यभिहितानि तानि तस्य तस्य राशेः तदधिपतेः चन्द्रस्य च प्रकृतिं समाश्रितानि सन्ति । तदिदं राशिप्रकृतिवशाद् आदेष्टव्यानां

---

35 चन्द्रराशिशीलाध्यायो द्रष्टव्यः

फलानां वितर्के महदानुकूल्यं विधत्ते । यथा दशमभावो मेषराशिश्चेत् तादृशी वृत्तिः वाच्या यत्र नित्यसञ्चारो नियतः ।[36] तथा च राशीनां सञ्चारप्रदेशानाश्रित्यापि वृत्तिप्रदेशश्चिन्त्यः । यथा – दशमस्तुलाराशिश्चेद् वाणिज्यबहुले देशे वृत्तिः । अथैवं प्राप्ताः काश्चन वृत्तीरत्र सन्दृभ्यन्ते -

- **मेषः** - उपवनम्, कृषिः, सेवावृत्तिः, स्फटिक-सूर्यकान्तशिला-सम्बद्धव्यवहारः, योद्धृत्वम्, शस्त्रचिकित्सा, आरक्षकत्वम्, शिरःसम्बद्धरोगज्ञत्वम्, पशुवैद्यत्वम्, लोहखनिजसम्बद्धकर्माणि च ।
- **वृषभः** - वाहनानि, चतुष्पाज्जन्तवः, ग्रामकृषिसम्बद्धकार्याणि, धान्यादिसङ्ग्रहः, वित्तकोषः, धनव्यवहारः, गीतम्, आभरणम् इत्यादिसम्बद्धकर्माणि ।
- **मिथुनः** - सङ्गणकम्, गणितम्, लेखनम्, चित्रकला, वीणादिवादनं सङ्गीतं वा, अमत्रनिर्माणम्, वाणिज्यम्, द्यूतक्रीडा, विलास-सुरतादिसम्बद्धवस्तूनि – इत्येतैः सम्बद्धानि कर्माणि ।
- **कर्कटः** - स्त्रीसम्बद्धम्, मुक्ताफलम्, जलजन्यानि समुद्रजन्यानि वा वस्तूनि, सस्यशास्त्रम्, प्राणिशास्त्रम्, क्षीरस्य तद्विकाराणां च व्यवहारः, शाकफलसंबद्धं वाणिज्यम्, भोजनालयः चेत्यादिकम् ।
- **सिंहः** - प्रभुत्वम्, गाम्भीर्यम्, अरण्योत्पन्न-प्राणिचर्मजन्य-पदार्थसम्बद्धव्यवहारः, अरण्याधिकारः, काष्ठ-खनिजव्यवहारः, सेनानायकत्वम् – इत्यादिकम् ।
- **कन्या** - मणिमालादिरचना, गीत-शिल्प-चित्रादिकलासु नैपुण्यम्, देशान्तरगमनम्, मित्रसहिततया वाणिज्येन धनागमः, अध्यापनम्, लिपिकत्वम्, लेखनम्, गणना, भाषान्तरणम्, पत्रिकाक्षेत्रम्, संशोधनम्, रूपाजीवत्वम् (modeling), law, गाणनिक्यम् (accounts) इत्यादिकम् ।
- **तुला** - वाणिज्यम्, गोपालना, मूलवस्तूनि, नानापदार्थसङ्ग्रहः, कलाप्रवृत्तिः, विलासगृहाणि, न्यायालयसम्बद्धाः lawyer इत्यादयो वृत्तयः – इत्यादिकम् ।
- **वृश्चिकः** - रहस्यभेदिकानां C.B.I., C.O.D. इत्यादीनां वृत्तीनां प्राप्तिः, प्रच्छन्नपापखलत्वम्, विषवैद्यत्वम्, विषवस्तूनि, समुद्रोत्पन्नानि, रहस्यवार्ताहरो गूढचारो वा – इत्यादिकम् ।
- **धनुः** - राजा, मन्त्री, आरक्षकः, वनपालकः, दार्शनिकः, पुरोहितः, वाक्पटुः, दण्डाधिकारी, कविः – इत्यादिकम् ।

[36] वृत्तातामृदृगुण्णशाकलघुभुक्षिप्रप्रसादोऽटनः – बृहज्जातकम् 16-1

- **मकरः** - वन्यपदार्थाः, उद्यानिर्माणपालनादिकम्, भूगर्भशास्त्रम्, समुद्रोत्पन्नपदार्थाः, भोजनालयः, विहारस्थलानि, कृषिः, गव्यपदार्थाः, नौका, सूक्ष्मदृष्टिमुख्यानि, धर्मध्वजत्वम् – इत्याद्याधारितम् ।
- **कुम्भः** - भारवहनम्, श्रमसाध्यं कर्म, नियुद्धादिकम्, चौर्यम्, अग्निशस्त्रसम्बद्धकार्यम्, सञ्चारप्रधानं कर्म – इत्यादिकम् ।
- **मीनः** - विदेशप्रयाणम्, समुद्रोत्पन्नानि, तैलव्यवहारः, मनोरञ्जनकेन्द्राणि, पौरोहित्यम्, आरक्षकः, जलवस्त्रादिसम्बद्धकार्याणि, पाण्डित्यम्, अध्यापनम्, रत्नादिव्यवहारः, नृत्यसङ्गीतादिकलाः – इत्यादिकम् ।

तदिदं राशीनां सञ्चारस्थानं राशिशीलं चेत्यादीनाधृत्य सङ्गृहीतम्, यथाभिहितम् आदौ । दशमराशिनापि कर्म वक्तव्यमिति सारावल्यादिवचनम् ईदृशमेव चिन्तनपथं बोधयतीति निश्चिन्वते निपुणाः । दशमराशेः कारकाधिष्ठितराशेर्वा चरादिस्वभावेन दूरादिदेशा निर्देष्टव्याः । यथा – चरराशिश्चेद् दूरप्रदेशे, स्थिरराशिश्चेत् स्वदेशे, उभयराशिश्चेन्न दूरे न च समीपे इति ।

योगविशेषवशाद् वृत्तिनिर्णयः

जातके विद्यमानानां योगविशेषाणाम् आधारेणापि वृत्तिनिर्णयः शास्त्रसम्मत एव । तदर्थं बहूनां योगविशेषाणां फलेषु अर्थस्रोतः वृत्तिक्षेत्रं च निर्दिष्टं पर्यालोच्यं सुधीभिः । तत्र दिङ्मात्रं कतिपयानि प्रदर्श्यन्ते –

- यत्किञ्चिद्राजयोगवान् जातकः कस्यचिद् भूभागस्य संस्थायाः गणादीनां वा नेतृत्वं वक्ष्यति ।
- रुचकयोगे जातकः सेनानीः भवितुम् अर्हति । शशयोगे तु जनप्रतिनिधिः सेनानीर्वा जायेत ।
- भास्करयोगे जातो गणितज्ञः सङ्गीतादिकलाकुशलो वा भवेत् ।
- मरुद्योगे जातो वाणिज्यक्षेत्रे परं प्रकर्षम् अञ्चति ।
- खड्गयोगे समुत्पन्नः पराक्रमप्रधानां वृत्तिं विन्दति ।
- हलयोगे समुत्पन्नः कृषिकर्मणा जीवति ।

द्वित्रादीनां ग्रहाणां वृत्तिकारकत्वं संवादचिन्तनं च

अनेनाध्ययनेनैतत् फलति यद् दशमभावः, दशमाधिपतिः, दशमाधिपतेर्नवांशाधिपतिः, तेषां मिथः सम्बन्धो ग्रहान्तरसम्बन्धो राशिसम्बन्धश्च, ग्रहाणां विभिन्नेषु प्रकरणेषु उक्तानि नानाकारकत्वानि, विद्यासम्बद्धाः भावाः, योगविशेषाः,

दशाविशेषाः, गोचरफलं चैतान् सर्वानप्यंशान् परिशील्य बलाबलादिकं विविच्य च या तावद् उक्तैः द्वित्रादिभिरंशैः सिद्धा स्यात् सा वृत्तिरादेश्येति । यतः संवादचिन्तनमेव मूलशिला फलादेशस्य ।[37] परमेतन्न सुकरम् । बहुषु प्रसङ्गेषु द्वित्रादीनां वृत्तीनाम् आदेश्यत्वं समापतति । तादृशप्रसङ्गेषु अमी मार्गाः शरणं दैवज्ञस्य –

- द्वित्रादयो ग्रहाः वृत्तिकारकाः प्राप्ताश्चेत् तेषु बलवत्तमग्रहाधारेण वृत्तिर्विनिर्देश्या । तदन्ये ग्रहा उपेक्षामर्हन्ति ।
- दशाभेदेन वृत्तिभेदोऽपि निर्देष्टुं शक्यः । जनानां विविधास्ववस्थासु वृत्तिपरिवर्तनस्य दृष्टत्वात्, **'स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः'**[38] इति वचनप्रामाण्याच्च ।
- वृत्तिकारका धनकारका वा ग्रहा बहवः सन्ति चेदेकस्मिन्नेव काले द्वित्रादयो वृत्तयो निर्देष्टुं शक्याः । तादृश्या अपि स्थितेर्लोके बहुशो दृष्टत्वात् ।
- वृत्तिकारको ग्रहः प्रबलश्चेत् तदुक्तासु उत्कृष्टा, मध्यबलश्चेत् मध्यमा, अल्पबलश्चेत् अधमा च वृत्तिः प्राप्यते तज्जनिमता । अथ चेदबलस्तर्हि तदुक्ता वृत्तिः स्वप्नचिन्तास्वेव वृत्तिर्न तु वास्तवजीवने । यथोक्तं मिहिरेण – **परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः** ।
- वृत्तिकारकः प्रबलश्चेद् अयत्नेन, मध्यबलश्चेन्मध्यमयत्नेन, अल्पबलश्चेद् यत्नाधिक्येन च धनावाप्तिः इत्यपि विवेचनीयम् । यथाह मन्त्रेश्वरः - '**अंशेशे बलवत्ययत्नधनसम्प्राप्तिं बलोनेंऽशपे स्वल्पं प्रोक्तफलं वदेत्**[39] इति ।

उपसंहारः

इत्थं विस्तरेण प्रदर्शिताः विद्यावृत्तिक्षेत्रयोः निर्णये शास्त्रोपदिष्टाः नानोपायाः । तथा च, वृत्तिकारकग्रहः, तस्य ग्रहान्तरसम्बन्धः राशिसम्बन्धः तस्य विभिन्नेषु प्रकरणेषु उक्तानि नानाकारकत्वानि, योगविशेषाः, दशाविशेषाः, गोचरफलम् – इत्येतान् सर्वानपि अंशान् सावधानं परिशील्य या विद्या वृत्तिश्च बहुभिरंशैः सिद्धा बलवती च स्यात् सैवादेश्या धीमता दैवज्ञेन इति युक्तियुक्तम् इह उपपादितम् । यानि यानि नवानि वृत्तिक्षेत्राणि समाजे समुत्पद्यन्ते तेषां कः कारकत्वसम्बन्धो युक्ततर इत्यपि विचारयता भाव्यं दैवज्ञेन इत्यपि अनेन सिद्धम् । तदनेन शास्त्रसरणेरनुल्लङ्घनेनैव फलादेशस्य तत्तत्कालार्हत्वं संसिध्यतीति शम् ।

---

[37] द्वित्रिसंवादतः स्पष्टम् – प्रश्नमार्गः

[38] बृहज्जातकम् ०८-२३

[39] फलदीपिका ०५-०९

सन्दर्भग्रन्थसूची -

- Bṛhajjātakam of Varahamihira, Pandit Kedaradatta Joshi, (2013), Motilal Banarsidass Pvt. Ltd
- Jātakapārijātaḥ of Vaidyanatha, Kapilesvara Sastri, (2008), Chaukhambha Sanskrit Sansthan, Varanasi
- Sārāvalī of Kalyāṇavarmā, Muralidhara Chaturvedi, (2007), Motilal Banarsidass Pvt. Ltd
- Praśnamārga, Kabyadi Shrinivasa Acharya, (1996), Jyotirvijnana Prakashana, Udupi
- Ṣaṭpañcāśikā, V Subrahmanya Shastri, (1978), Sree Mallikarjuna Press, Bangalore
- Phaladīpikā, Gopesh Kumar Ojha, (2015), Astha Prakashan, Varanasi
- Bṛhat-pārāśara-horāśāstram, Satyendra Mishra, Chowkhamba Sanskrit Series, Varanasi
- Acharya Lokamani Dahal, (2012), भारतीयज्योतिःशास्त्रस्येतिहासः, Chaukhamba Surabharati Prakashan, Varanasi
- Raman B.V., (1995 fifth edition), How to Judge a Horoscope (Volume I & II), Motilal Banarsidass Pvt. Ltd
- Col A.K. Gour & Uday Kant Mishra, (2014), Introduction to Astrology, Alpha Publication, New Delhi
- M. Ramakrishna Bhat, (2017, 7th reprint), Fundamentals of Astrology, Motilal Banarsidass Pvt. Ltd

Dr. Ramakrishna Pejathaya

Associate Professor

School of Ethics Governance Culture & Social Systems

Chinmaya Vishwavidyapeeth

Veliyanad, Ernakulam – 682313

Email: Ramakrishna.pejathaya@cvv.ac.in

***

विभिन्नालङ्कारिकमतानुसारं शब्दशक्तिमूलध्वनेरनुशीलनम्

- डा. एम्. सुदर्शनचिपळूणकरः

शोधसारः –

संलक्ष्यक्रमव्यङ्ग्यध्वनिस्तावत् शब्दशक्तिमूलः अर्थशक्तिमूलश्चेति द्विधा विभक्तः । तत्र च शब्दशक्तिमूलध्वनिविचारे बहुषु आलङ्कारिकेषु मतवैभिन्यं विद्यते । अतः लेखेऽस्मिन् विभिन्नानाम् आलङ्कारिकाणां मतानि आकलय्य शब्दशक्तिमूलध्वनिः निरूपितो विद्यते । तत्रापि मुख्यतया आनन्दवर्धनः, मम्मटः, अप्पय्यदीक्षितः, पण्डितराजः जगन्नाथः इत्येतेषां मतान्यत्र निरूपितानि ।

कुञ्ची-शब्दाः – संलक्ष्यक्रमव्यङ्ग्यध्वनिः, शब्दशक्तिमूलध्वनिः, आनन्दवर्धनः, मम्मटः, अप्पय्यदीक्षितः, पण्डितराजः जगन्नाथः ।

यत्र वाच्यापेक्षया व्यङ्ग्यार्थः चारुतरः प्रतीयते तत्र चायं काव्यप्रकारः ध्वनिनाम्ना व्यपदिश्यते । स चायं ध्वनिः अविवक्षितवाच्यः विवक्षितान्यपरवाच्यश्चेति द्विविधः । विवक्षितान्यपरवाच्यश्च संलक्ष्यक्रमः असंलक्ष्यक्रमश्चेति द्विविधः । संलक्ष्यक्रमः पुनः शब्दार्थशक्तिमूलत्वात् द्वेधा व्यवस्थितः । तत्र चोक्तम् आनन्दवर्धनेन –

क्रमेण प्रतिभात्यात्मा योऽस्यानुस्वानसन्निभः ।
शब्दार्थशक्तिमूलत्वात्सोऽपि द्वेधा व्यवस्थितः[1] ॥ इह्ति ।

प्रकारेऽस्मिन् आदिमः शब्दशक्तिमूलः । तर्हि कोऽयं शब्दशक्तिमूलो ध्वनिः इति चेत् उच्यते आनन्दवर्धनेन –

आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते ।
यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः[2] ॥ इति ।

आक्षेपमर्यादया शब्दशक्त्या यत्र अलङ्कारः प्रतीयते तत्रायं शब्दशक्तिमूलध्वनिः इति तात्पर्यम् । शब्दशक्त्या वस्तुद्वये प्रकाशमाने सति अयं श्लेषः एव न पुनः शब्दशक्तिमूलध्वनिरिति शब्दशक्तिमूलध्वनेः श्लेषालङ्कारात् वैलक्षण्यम् ।

येन ध्वस्तमनोभवेन **बलिजित्कायः पुरा स्त्रीकृतो**
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः[3] ॥

इत्यत्र तु माधवः उमाधवश्च पायादिति अर्थद्वयमपि वाच्यमर्यादया एव प्रतिभासते इत्यस्मात् अयं श्लेष एव न पुनः शब्दशक्तिमूलध्वनिरिति आनन्दवर्धनः । पुनश्च यत्र शब्दशक्त्या वाच्यमेव अलङ्कारान्तरं प्रतिभासते सः श्लेषस्य विषयः । यत्र च शब्दशक्त्या आक्षेपमर्यादया व्यङ्ग्यम् अलङ्कारान्तरं प्रतीयते सः शब्दशक्तिमूलध्वनिः ।

तस्या विनापि हारेण निसर्गादेव हारिणौ ।
जनयामासतुः कस्य विस्मयं न पयोधरौ[4] ॥

इत्यत्र तु विस्मयाख्यः शृङ्गाररसस्य व्यभिचारी **हारेण विनापि हारिणौ** इति साक्षात् विरोधालङ्कारश्च प्रतिभासते इत्यस्मात् विरोधच्छायानुग्राही श्लेष इत्येव मन्तव्यम्, न पुनः ध्वनिः।

श्लाघ्याशेषतनुं सुदर्शनकरः **सर्वाङ्गलीलाजित-**
त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरिः ।
बिभ्राणां मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दध-
त्स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात्[5] ॥

इत्यत्र च व्यतिरेकच्छायानुग्राहिणः श्लेषस्य विषयः। यत्र पुनः सामर्थ्याक्षिप्तम् अलङ्कारान्तरं शब्दशक्त्या प्रकाशते स सर्वः शब्दशक्तिमूलध्वनेर्विषयः। यथा – **“अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिका धवलाट्टहासो महाकालः**[6]**”**

इत्यत्र कुसुमसमयादिशब्दाः प्रकृतम् ऋतुवर्णनप्रसङ्गमभिधया बोधयन्ति । अनन्तरं महाकालादिशब्दैः शिवरूपस्य अर्थान्तरस्य अवगतिः भवति। इयञ्च अर्थावगतिः शब्दशक्त्या आक्षेपमर्यादया भवति इति हेतोः अत्र शब्दशक्तिमूलध्वनिः । प्रसङ्गेऽस्मिन् यद्यपि महाकालशब्दस्य ग्रीष्मर्तुपरकः अर्थः यौगिकः, शिवरूपश्चार्थः रूढः तथापि ऋतुवर्णनप्रस्तावेन अभिधा ग्रीष्मरूपेऽर्थे नियन्त्रिता भवति, अनन्तरम् अर्थान्तरं तु ध्वननव्यापारेण प्रतीयते इति अभिनवगुप्तमतम् । तत्र च तेनोक्तं यथा- " **अत्र ऋतुवर्णनप्रस्तावनियन्त्रिताभिधाशक्तयः, अत एव 'अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी' इति न्यायमपाकुर्वन्तो महाकालप्रभृतयः शब्दाः एतमेवार्थमभिधाय कृतकृत्या एव । तदनन्तरमर्थावगतिर्ध्वननव्यापारादेव शब्दशक्तिमूलत्वात्**[7] " इति।

दत्तानन्दाः प्रजानां **समुचितसमयाकृष्टसृष्टैः पयोभिः**
पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः।
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु[8] ॥

इत्यत्र धेनुरूपस्याप्राकरणिकार्थस्य प्रतीत्या वाक्यस्य असम्बद्धार्थाभिधायित्वं न स्यादिति सूर्यकिरणधेनुरूपयोः प्राकरणिकाप्राकरणिकयोः उपमानोपमेयभावकल्पनात् शब्दशक्तिमूलध्वनेर्विषयः, न श्लेषस्य इति आनन्दवर्धनमतम्।

काव्यप्रकाशकारः आचार्यः मम्मटः काव्यप्रकाशे शब्दशक्तिमूलध्वनिम् अभिधामूलध्वनित्वेन निरूपितवान्। तन्मतानुसारं,

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्[9] ॥

इतीदम् अभिधामूलध्वनेः लक्षणम् । नानार्थकस्य शब्दस्य बहुष्वर्थेषु सत्सु संयोगादिभिः एकस्मिन्नेव अर्थे अभिधा नियन्त्रिता भवति । यच्च अर्थान्तरं प्रतीतं भवति तच्च व्यञ्जनाव्यापरेण इति तात्पर्यम् । यथा –

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
यस्यानुपप्लवगतेः परवारणस्य दानाम्बुसेकसुभगःसततं करोऽभूत्[10] **॥**

इत्यत्र राजरूपः अर्थः प्राकरणिकः, गजरूपश्च अप्राकरणिकः । अत्र च वारणकरादिपदैः गजरूपः अर्थः प्रतीतोऽपि प्रकरणेन राजरूपेऽर्थे एव अभिधा नियन्त्रिता भवति । द्वितीयार्थश्च व्यञ्जनया प्रतीयते । अतोऽत्र शब्दशक्तिमूलध्वनिः ।

नवीनेषु अप्पय्यदीक्षितस्य मतानुसारं तावत् स्थलेऽस्मिन् अर्थद्वयमपि अभिधयैव प्रतीतं भवति । यथा –

असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः[11] **॥**

इत्यत्र चन्द्रोदयवर्णनं प्राकरणिकोऽर्थः, राज्ञः अभ्युदयश्च अप्राकरणिकः । एवञ्च प्राकरणिकः अप्राकरणिश्च अर्थः अभिधयैव बोध्यते इति दीक्षितमतम् । प्रकृते च चन्द्रार्थमात्रेण अन्वयं लभमानानां उदयरक्तकरादिपदानां चन्द्ररूपेऽर्थे अभिधाया नियमनम् । राजरूपेणार्थेन अन्वयं लभमानानां उदयरक्तकरादिपदानां शब्दान्तरसन्निधिवशाच्च राजरूपेऽर्थे अभिधायाः नियमनम् ।

रसगङ्गाधरकारः जगन्नाथोऽपि नानार्थशब्दप्रयोगस्थले शक्तिविषयकः संस्कारः तदुद्बोधकं पदज्ञानं च भवतीति कारणेन अभिधयैव अर्थान्तरस्य बोधो भवतीति निरूपितवान् । अभिधानियन्त्रणस्य अनुभवविरुद्धत्वेनाभ्युपगमात् प्रकरणादिना एकस्मिन्नर्थे अभिधाया नियन्त्रणं न भवतीति एतन्मतम् । अतः योगरूढशब्दप्रयोगस्थले वस्तुतः शब्दशक्तिमूलध्वनिः इति एतन्मतम् । तत्र च रूढ्या कस्यचिदर्थस्य प्रतीतौ यौगिकशक्तिबलेन अर्थान्तरस्य

प्रतीतिर्भवति । सा च अर्थान्तरप्रतीतिः रूढ्या नियन्त्रणात् योगशक्त्या न सिद्ध्यति । तदर्थं व्यञ्जना स्वीकर्तव्येति जगन्नाथमतम् । यथा –

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।
तिष्ठन्ति चपला यत्र स कालः समुपस्थितः[12] **॥**

इत्यत्र ‘यस्मिन् काले विद्युतः प्रोषितभर्तृकाणां कान्तिमपहृत्य मेघैः सह तिष्ठन्ति तादृशः वर्षाकालः समुपस्थितः’ इति प्रकृतार्थः । अनन्तरं च अबलावारिवाहचपलादिभिः योगरूढशब्दैः ‘यस्मिन् काले जारस्त्रियः दुर्बलानां धनमपहृत्य जलवाहकैः पुरुषैः रमन्ते तादृशः ग्रीष्मकालः समुपस्थितः’ इति अर्थान्तरस्य प्रतीतिः व्यञ्जनयैव भवति ।

एवं शब्दशक्तिमूलध्वनिनिरूपणस्थले विभिन्नेषु आलङ्कारिकेषु मतवैभिन्यं विद्यते ।

*****

पादटिप्पण्यः

1. ध्वन्यालोकः 2.20
2. तत्रैव 2.21
3. तत्रैव
4. तत्रैव
5. तत्रैव
6. तत्रैव
7. लोचनव्याख्या/ ध्व. आ.2.21
8. सूर्यशतकम् ९/ ध्व. आ.2.21
9. काव्यप्रकाशः 2.19
10. तत्रैव
11. वृत्तिवार्तिकम् / अभिधाविचारः/ पृ. 415
12. रसगङ्गाधरः / द्वितीयाननम्

आकरग्रन्थसूची

1.ध्वन्यालोकः / आनन्दवर्धनः / चौखम्बा विद्याभवन, वाराणसी

2. काव्यप्रकाशः / मम्मटः / चौखम्बा संस्कृत संस्थान, वाराणसी

3. साहित्यदर्पणः / / विश्वनाथः / चौखम्बा संस्कृत संस्थान, वाराणसी

4. कुवलयानन्दः/ अप्पय्यदीक्षितः / निर्णयसागरप्रेस,मुम्बई

5. वृत्तिवार्तिकम् / अप्पय्यदीक्षितः/ श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः, हैदराबाद्

6. वृत्तिवार्तिकम् / अप्पय्यदीक्षितः/ इन्दुप्रकाशनम्, देहली

7. रसगङ्गाधरः/ जगन्नाथः/ चौखम्बा विद्याभवन, वाराणसी

8. Raghavan V / Studies on some concepts of the Alankara Shastra / The Adyar Library, Adyar

9. History of Classical Sanskrit Literature / M Krishnamachariar/ Tirumala Tirupati Devasthanams Press, Madras

डा. एम्. सुदर्शनचिपळूणकरः

Dr. M. Sudarshan Chiplunkar

Assistant Professor, School of Linguistics and Literary Studies,

Chinmaya Vishwavidyapeeth, Chinmaya Eswar Gurukula Campus, Adi Sankara Marg,

Veliyanad, Ernakulam, Kerala – 682313

Email - chiplunkarsudarshan@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit, Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

वैदिक स्वरों की अवधारणा और उपादेयता

- भूपेन्द्र

शोध सार –

वेद की विभिन्न संहिताओं तथा ब्राह्मणों के अनुशीलन से यह स्पष्ट है कि उदात्त, अनुदात्त और स्वरित धर्मों को भिन्न भिन्न संकेतों और नाम से अभिव्यक्त किया गया है। इस उपक्रम में यह भी देखा जाता है कि एक संहिता अथवा एक परम्परा में जो संकेत उदात्त के लिए प्रयुक्त हुआ है वही दूसरी संहिता अथवा परम्परा में उदात्त, अनुदात्त अथवा स्वरित आदि के लिए प्रयोग किया गया है। वैदिक संहिता में कितने स्वर होते हैं इस विषय को लेकर मतभेद देखने को मिलता है। वैदिक ग्रन्थों में स्वरों की संख्या और उनकी अर्थ निर्धारण में उपयोगिता को लेकर प्रस्तुत् शोधपत्र लिखा गया है।

वैदिक वाङ्गमय में स्वर शब्द की व्यापक अवधारणा है। जो मुखरित होते हैं अथवा उच्च, निम्न तथा तिर्यग् भाग से उच्चारित होते हैं। वे उदात्तादि स्वर कहलाते हैं। ये स्वर वर्ण के धर्म होते हैं। प्रायः सम्पूर्ण वैदिक साहित्य स्वर से युक्त है। वैदिक साहित्य के अन्तर्गत वैदिक संहिता के साथ साथ शतपथ ब्राह्मण, तैत्तिरीयब्राह्मण तथा बृहदारण्यकोपनिषद् आदि भी आ जाते हैं।वैदिक ग्रन्थों मेंऔर उनके सहायक ग्रन्थों में अनेक स्थलों परस्वरों के नाम और उनकी संख्या में भिन्नता देखने को मिलती है। वैदिक स्वरों की संख्या और उनकी अर्थ निर्धारण में उपयोगिता को प्रस्तुत् शोधका विषय बनाया गया है।

वैदिक स्वरों की समझ के बिना वास्तविक वेदार्थ बोध नहीं हो सकता। अतः वेदार्थ बोध के लिए स्वरों का ज्ञान अपरिहार्य विषय है।

कुञ्जी शब्द – उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः ।

वैदिक वाङ्गमय में स्वर शब्द की व्यापक अवधारणा है। जो मुखरित होते हैं अथवा उच्च, निम्न तथा तिर्यग् भाग से उच्चारित होते हैं। वे उदात्तादि स्वर कहलाते हैं।[1] ये स्वर वर्ण के धर्म होते हैं। वैदिक संहिताएं स्वर से युक्त हैं। यहाँ तक कि शतपथ ब्राह्मण एवं तैत्तिरीय तथा बृहदारण्यकोपनिषद् भी स्वरचिह्न से युक्त है। स्वरज्ञान के लिए व्याकरण का ज्ञान अत्यन्त आवश्यक है। व्याकरण के बिना स्वरज्ञान कथमपि संभव नहीं। व्याकरण प्रयोजनों के सन्दर्भ में आचार्य पतंजलि ने रक्षा, ऊह, आगम, लघु, असन्देह की चर्चा की है।[2] वहाँ अन्तिम प्रयोजन की व्याख्या करते हुए आचार्य कहते हैं कि- **असन्देहार्थं चाध्येयं व्याकरणम्।**

---

[1] स्वर्यत उच्चाधस्तिर्यग्भागैरुच्चार्यत इति स्वरः।

[2] रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। महाभाष्य

याज्ञिकाः पठन्ति- स्थूलपृषतीमाग्नि- वारुणीमनड्वाहीमालभेतेति। तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यतीति-यदि पूर्वपदप्रकृति स्वरत्वं ततो बहुव्रीहिः अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति। स्थूलपृषति पद जहां पूर्वपद प्रकृतिस्वर होगा वहाँ बहुव्रीहि समास होगा और जहाँ अन्तोदात्त होगा वहां तत्पुरुष समास होगा। इसका अशय यह है कि स्वरज्ञान के लिए व्याकरण का अध्ययन अत्यन्त आवश्यक है।

साहित्यदर्पणकार वेद में स्वर को विशेषार्थ की प्रतीति का कारण स्वीकार करते हैं।[3] वेंकटमाधव अर्थभेद में स्वरभेद को कारण स्वीकार करते हैं।[4] आचार्य वेंकटमाधव ने ऋग्वेद के लघु भाष्य के प्रत्येक अष्टक में प्रत्येक अध्याय के अन्त में कतिपय श्लोकों का निर्देश करके वेद सम्बन्धी आठ समस्याओं पर विचार किया। इनमें भी सबसे पहले वैदिक स्वर पर विस्तृत व गम्भीरता पूर्वक विचार करते हुए स्वरानुक्रमणी के अन्त में लिखा है-

अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित्।
एवं स्वरैः प्रणीतानां भवन्त्यर्था स्फुटा इति।[5]

अन्धकार में दीपक की सहायता से चलता हुआ पथिक जिस प्रकार स्खलित नहीं होता (गड्ढे आदि में नही गिरता है)। ठीक इसी प्रकार स्वरों की सहायता से किये गए अर्थ स्पष्ट होते हैं।

स्वरों का वर्गीकरण-

मुख्य रूप से वैदिक स्वर तीन हैं। उदात्त, अनुदात्त और स्वरित। परन्तु इन स्वरों के आवान्तर भेद होने से वैदिक स्वरों को एक संख्या में बांध पाना उचित नहीं क्योंकि वैदिक ग्रन्थों में इनकी संख्या भिन्न भिन्न दिखायी गयी है। स्वरों का नाम सुनते ही हमारे मस्तिष्क में ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद संहिता का मुख्यरूप से भान होता है परन्तु हमें यह भी संज्ञान में रखना चाहिए कि संहिताओं के साथ साथ ब्राह्मणग्रन्थ और प्रातिशाख्यादि ग्रन्थों में भी स्वरों का प्रयोग प्राप्त होता है। वैदिक ग्रन्थों में वैदिक स्वर को निम्न प्रकार से दर्शाया गया है-

1- वाजसनेयि प्रातिशाख्य में सामवेद में स्वरों की संख्या सप्त बतायी गयी है।[6]

---

[3] स्वरस्तु वेदविशेषप्रतीतिकृत् न काव्ये इति तस्य विषयो नोदाहृतः।- साहित्य दर्पण, परिच्छेद 2

[4] यदा न तं स्वरं पश्येत् अन्यार्थं नयेत्तदा। स्वरानुक्रमणी

[5] स्वरानुक्रमणी

[6] सप्त। 1/127 सामसु सप्त स्वरानाहुः षड्ज-ऋषभ-गान्धार-मध्यम-पंचम-धैवत-निषादान्। वाजसनेयि प्रातिशाख्य

2- पतंजलि ने अपने महाभाष्य में भी सात स्वरों का विवेचन किया है। सप्त स्वरा भवन्ति-उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रुतिः सप्तमः।[7]

3- नारद-शिक्षा पांच स्वरों को ही स्वीकार करती है। उदात्त, अनुदात्त, स्वरित, प्रचित और निघात।[8] नारद शिक्षा ने अनुदात्त तथा निघात को एक साथ पढा है अतः निघात से तात्पर्य एसे अनुदात्त से है जो उदात्त तथा स्वरित के परे रहने पर एकश्रुति न होकर अनुदात्त ही बना रहता है। इसे अष्टाध्यायी अनुदात्ततर या सन्नतर कहती है। जैसे- **अग्निः पूर्वेभिऋर्षिभिः**[9] में **ऋषिभिः** शब्द आद्युदात्त के परे रहते **भिस्** विभक्ति को एकश्रुति **स्वरितात्संहितायामनुदात्तानाम्**[10] सूत्र से प्राप्त है, वह न होकर **उदात्तस्वरितपरस्य सन्नतरः**[11] सूत्र द्वारा अनुदात्ततर हो जाता है।

अनुदात्त के पश्चात् आने वाले स्वरित का उदाहरण- **मरुतः क्व सुविता**[12] में 'क्व' शब्द स्वरित के परे रहते अनुदात्त 'तः' को उपयुक्त नियमानुसार एकश्रुति नहीं होती अपितु अनुदात्ततर हो जाता है।

इस प्रकार निघात शब्द से नारद शिक्षा पाणिनीय अनुदात्ततर स्वर को ही स्वीकार करती है। निघात शब्द से प्रचित अथवा एकश्रुति का ग्रहण नही हो सकता क्योंकि नारद शिक्षा अलग से प्रचित की सत्ता स्वीकार करती है।

4- तैत्तिरीय प्रातिशाख्य चार स्वरों की ही सत्ता स्वीकार करता है। उदात्त, अनुदात्त, स्वरित और प्रचय। परन्तु तैत्तिरीय प्रातिशाख्य में इनके नाम भिन्न हैं। उदात्त के लिए द्वितीय, अनुदात्त के लिए मन्द्र, स्वरित के लिए तृतीय तथा प्रचय के लिए चतुर्थ शब्द का प्रयोग किय गया है। तैत्तिरीय प्रातिशाख्य में उल्लेख मिलता है कि मन्द्र, चतुर्थ, तृतीय तथा द्वितीय ये चार स्वर ही तैत्तिरीयक है।[13] इन चारों में जो द्वितीय है वही उदात्त है, जो मन्द्र है वही अनुदात्त है, जो तृतीय और चतुर्थ है वही क्रमशः स्वरित तथा प्रचित है।[14]

---

[7] महाभाष्य0 1/2/33

[8] उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा। निघातश्चेति विज्ञेयः स्वरभेदस्तु पंचधा।। नारदीय शिक्षा 7/19

[9] ऋग्वेद 1,1,2

[10] अष्टाध्यायी । 1,2,38

[11] अष्टाध्यायी। 1,2,40

[12] ऋग्वेद 1,38,3

[13] मन्द्रादयो द्वितीयान्ताश्चत्वारस्तैत्तिरीयकाः। तैत्तिरीय प्रातिशाख्य 23,15

[14] द्वितयान्मन्द्रस्तैत्तिज्ञरीयाणां तृतीयचतुर्थावनन्तरं तच्च तुर्यममित्याचक्षते। तैत्तिरीय प्रातिशाख्य 23,16

5- पाणिनीय शिक्षा भी उदात्तादि स्वरों के स्थानों का वर्णन करती हुई चार स्वरों अर्थात् उदात्त, अनुदात्त, स्वरित तथा प्रचय को मान्यता देती है। शिक्षा के अनुसार अनुदात्त को हृदय में समझना चाहिए, उदात्त को मूर्धा में, स्वरित को कर्णमूल में तथा सभी प्रचयों को मुख में समझना चाहिए। [15]

इस प्रकार पाणिनीय शिक्षा में भी उदात्त, अनुदात्त, स्वरित और प्रचय इन चार स्वरों के स्वीकारा गया है।

6- वेद की विभिन्न संहिताओं में तीन स्वरों की ही सत्ता मानी गयी है। उदात्त, अनुदात्त और स्वरित। शुक्ल यजुर्वेद की माध्यन्दिन और काण्व इन दोनों संहिताओं में तीन स्वरों का ही विवेचन है। माध्यन्दिन और काण्व इन दोनों संहिताओं से सम्बन्धित वाजसनेयि प्रातिशाख्य सूत्र **त्रीन्** द्वारा उदात्त, अनुदात्त तथा स्वरित इन तीन स्वरों का ही निर्देश करता हैं। ऋग्वेद की शाकल तथा अथर्ववेद की शौनक संहिता तथा ऋग्वेद प्रातिशाख्य में भी उपर्युक्त तीन स्वरों का ही विवेचन किया गया है।[16]

7- तैत्तिरीय प्रातिशाख्य में तीन स्वरों का भी उल्लेख मिलता है। द्वितीय, प्रथम तथा कृष्ट। इनको प्रातिशाख्य आह्वारक स्वर मानता है।[17]

8- वाजसनेयि प्रातिशाख्य यजुर्वेद में दो स्वरों को स्वीकार करता है। उदात्त और अनुदात्त।[18] उव्वट द्वौ सूत्र की व्याख्या करते हुए लिखते हैं- **किमविशेषेण यजुर्वेदे त्रीन्स्वरानाहुः। नेत्युच्यते द्वौ स्वरावुदात्तानुदात्तौ भाषिकलक्षितौ शतपथ ब्राह्मणे। उदात्तानुदात्तौ द्वावेव स्वरौ यजुर्वेद इत्यन्ये।**[19] उपर्युक्त व्याख्या से स्पष्ट है कि शतपथ ब्राह्मण में भी दो ही स्वर होते हैं। कुछ अन्य लोगों के मतानुसार यजुर्वेद में भी दो ही स्वर उदात्त तथा अनुदात्त होते हैं जिसका वर्णन उपर्युक्त द्वौ सूत्र की व्याख्या में उव्वट ने किया।

9- कुछ वैदिक ग्रन्थों में एक स्वर का ही उल्लेख मिलता है। वाजसनेयि प्रातिशाख्य इस एक स्वर को **एकम्। 1,130** सूत्र द्वारा निर्दिष्ट करता है।[20]

---

[15] अनुदात्तज्ञो हृदि ज्ञेयो मूधर्न्युदात्त उदाहृतः, स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः। 48 पाणिनीय शिक्षा

[16] उदात्तज्ञश्चानुदात्तज्ञश्च स्वरितश्च त्रयः स्वराः। आयामविश्रम्भाक्षेपैस्त उच्यन्ते। ऋग्वेद प्रातिशाख्य 3,1

[17] द्वितीयप्रथमकृष्टास्त्रय आह्वारक स्वराः। तैत्तिरीय प्रातिशाख्य 23,14

[18] द्वौ 1,129 वाजसनेयिप्रातिशाख्य

[19] वाजसनेयिप्रातिशाख्य

[20] वाजसनेयिप्रातिशाख्य

वेदार्थ में स्वर की उपयोगिता-

वेदार्थ में स्वरों की उपयोगिता को निम्न उदाहरण के माध्यम से समझा जा सकता है। जैसे- **'भ्रातृव्यस्य वधाय'** इस मन्त्र में **भ्रातृव्य** पद है जिसका लौकिक भाषा में भतीजा और शत्रु ये दो अर्थ प्रसिद्ध हैं। यह शंकास्पद है क्योंकि कौन सा अर्थ यहाँ ग्रहण होना चाहिए। ऐसी स्थिति में स्वरशास्त्र ही यहाँ पर सत्यार्थप्रतिपत्ति में समर्थ है। स्वरप्रक्रिया के अवलोकन से सरलतया अर्थनिर्णय होता है। यथा-भ्रातृव्य पद के लिए पाणिनीय अष्टक में **भ्रातुर्व्यत् च**[21] सूत्र से अपत्यर्थक **व्यत्** प्रत्यय होता है। **व्यत्** प्रत्यय **तित्** होने के कारण **तित् स्वरितम्**[22] सूत्र से स्वरित है अतः इससे उत्पन्न होने वाला भ्रातृव्य पद भतीजा अर्थ का द्योतक है।
आचार्य दूसरा अर्थ भी वहीं लिखते हैं **- व्यन् सपत्ने**[23] सूत्र से भ्रातृपद से सपत्न (अमित्र) अर्थ में **व्यन्** प्रत्यय होता है। **व्यन्** प्रत्यय से भी भ्रातृव्य शब्द ही बनता है परन्तु यहाँ प्रत्यय **नित्** होने से **ञ्नित्यादिर्नित्यम्**[24] सूत्र से आद्युदात्त करके भ्रातृव्य शब्द सिद्ध होता है। अब वेदवाक्य **भ्रातृव्यस्य वधाय**[25] को ध्यान से देखकर पता चलता है कि भ्रातृव्य पद पर आद्युदात्त(उदात्त का चिह्न नहीं होता) है अतः आद्युदात्त होने से शत्रु अर्थ है। भ्रातृव्यस्य वधाय वेदवाक्य में स्वरज्ञाता ही साध्वर्थ करने में समर्थ है।

इस प्रकार से हम कह सकते हैं कि सम्यक् वेदार्थ प्रतिपत्ति के लिए स्वरों का ज्ञान अत्यन्त आवश्यक है। इनके बिना वेदमन्त्रों के मूल अर्थ तक नही पहुंचा जा सकता। भाषाविज्ञान भी इस बात पर प्रमुखता से बल देता है कि बलाघात से शब्द के अर्थ में अन्तर उत्पन्न हो जाता है। अतः भाषा के समग्र अध्ययन के लिए वैदिक स्वरों का ज्ञान अत्यन्त आवश्यक है।

भूपेन्द्र
शोध-छात्र
दिल्ली विश्वविद्यालय
119 gautm nagar new delhi 110049
Rahulnagyan47@gmail.com

***

---

[21] अष्टाध्यायी 4/1/144

[22] अष्टाध्यायी 6/1/179

[23] अष्टाध्यायी 4/1/145

[24] अष्टाध्यायी 6/1/194

[25] शुक्ल यजुर्वेद 1/18

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

व्याकरणशास्त्रे मांसाहार-पशुबलि-विधान-भ्रान्तिनिवारणम्

- जयकृष्णः शर्मा

शोधसारः

सर्वशास्त्रावगमाय व्याकरणशास्त्रस्य महत्त्वम् अनितरसाधारणं वरिवर्तीति वेत्त्यखिलं संस्कृतजगत्। सर्वासां विद्यानाम् आसादनं व्याकरणेन सुलभतया एव जायते। तत्रापि सौलभ्येन न्यूने एव काले न्यूनेन च श्रमेण महतो हि विद्याविषयस्य ग्राहकं त्रिमुनिव्याकरणं सुदीर्घात् कालात् एतावत् पर्यन्तम् अनारतं भजते वैशिष्ट्यं लोके। महान्तः अस्माकम् ऋषयस्त्रय एते। अमीषाम् अस्मदृषीणां विलक्षणा तीक्ष्णा दैवी च बुद्धिरासीत् तत्रैव चित्तेषु तेषां महती काचित् करुणा महान् हि कश्चन च अहिंसाभावः अधितिष्ठति स्म। इत्थमेव अन्ये वा ऋषयो भवेयुः शब्दविद्यापारावारीणा वा मुनयः, सर्वेऽपीमे सर्वस्य मानवभूतस्य मानवेतरभूतस्य वा ऐहिकाय पारलौकिकाय च सर्वविधाय श्रेयसे एव तपश्चक्रुः। परन्तु चेतसि खिन्नता का जायते नाम यन्मानवहिताय ऋषिभिस्तज्जीवितमेवादायि तन्मानवः अद्य ऋषिनिर्दिष्टं पन्थानं नान्वगच्छन् विपरीत एव विनाशस्य पथि बम्भ्रम्यमाणो दृश्यते, न केवले विषमपथे सञ्चलनम् अपितु स्वभोगपूर्त्यर्थं ऋषिवचांसि अन्यथा कृत्वा ऋषिभिःप्रायविरुद्धस्य सिद्धान्तस्य प्रमाणीकरणम् अपि स्वार्थिकस्य मानवस्य प्रवृत्तिरिव अस्ति जाता। एतादृशविरुद्धाचरणेषु अन्यतरत्वं भजते मांसाहारसमर्थनं पशुबलिविधानं च। तदिदम् उभयम् अपि हिंसापरमेव इति सुतरां नास्मदृषीणाम् एतदर्थम् अनुज्ञाऽऽज्ञा वा अर्हति भवितुम्। **आत्मनो न प्रतिकूलं परेषाम् आचरेमे**त्येव ऋषिभिः वयं आदिष्टाः। परन्तु जिह्वालोलस्य मांसाद्यनिष्टभक्षणपरस्य मानवस्य एव प्रवृत्तिं वीक्ष्य तत्र तत्र प्रसङ्गेषु ऋषिभिः तन्मांसभक्षणस्य तत्पशुबल्यादिविधानस्य दृष्टान्तत्वेन उल्लेखः कृतः दृश्यते। एतादृगुल्लेखो व्याकरणस्य त्रिमुनि अपि कृतो वर्तते। तानिमानुल्लेखान् पुरस्कृत्य कतिपये आमिषस्य भक्षकाः आमिषभक्षणं पशुबल्यादिहिंसां च धर्मस्य चक्षुषा पश्यन्ति, यच्च खेदाय अखिलजगतो विनाशाय च। अत एतेषु एव व्याकरणशास्त्रस्य उल्लेखेषु कतिपयान् उल्लेखान् आदाय अत्र लेखे तावत् अर्थगतसङ्गत्यर्थं, मिथ्यात्वभ्रान्तिच्छेदनार्थं याथार्थ्यप्रतिपादनाय च प्रयतिष्यामहे।

कुञ्ची-शब्दाः – 'पशुना रुद्रं यजते', 'अग्नये छागस्य वपायाः मेदसः प्रेष्य', 'अग्नये छागस्य वपायाः मेदसः अनुब्रूहि' ।

प्रत्याहाराह्निके गोमांसविक्रयणप्रक्षेपप्रसङ्गः –

एओङ् ऐऔच्[1] इत्यनयोः सूत्रयोः व्याख्यावसरे एकारादीनां सन्ध्यक्षराणां वर्णानाम् एकदेशग्रहणं कार्यं वा न वा इति कश्चन विचारः सविस्तरं महाभाष्यकृता कृतो वर्तते। तत्र वर्णैकदेशाः वर्णग्रहणेन यदि गृह्येरन् तर्हि के के दोषाः समुपस्थिताः भवन्ति इति तान् दोषान् समुपस्थाप्य परिहाराणां कथनवेलायां **नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु**[2] इति किञ्चन समाधानवार्तिकं पठ्यते। वार्तिके अत्र सिद्धान्तिना कतिपये दृष्टान्ता उपस्थाप्यान्ते। सिद्धान्तिनः दृष्टान्तेषु अन्यतमः कश्चन दृष्टान्तः एवं भवति – ``**यथा तर्हि तैलं न विक्रेतव्यम्" ``मांसं न विक्रेतव्यम्" इति व्यपवृक्तं च न विक्रीयते। अव्यपवृक्तं च गावः सर्षपाश्च विक्रीयन्ते** इति। दृष्टान्तस्य अस्य अर्थः भवति यत् तैलस्य विक्रयणं न कर्तव्यम्, मांसस्य अपि विक्रयणं न कर्तव्यम् अपितु तैलं येषु भवति तेषां सर्षपाणाम् एव विक्रयणं कर्तव्यम्। एवमेव मांसस्य विक्रयणं न कर्तव्यम् अपितु येषु गोषु मांसं भवति ते गावः एव विक्रेतव्याः इत्यर्थः। अर्थात् तैलस्य क्रयणाय कश्चन आयाति यदि तर्हि तस्मै साक्षात् सर्षपाः एव दातव्याः, सः स्वयं तेषां निष्पीडनं कृत्वा तेभ्यः तैलं प्राप्नुयात्। एवमेव कश्चन मांसस्य क्रयणाय यदि आयाति तर्हि तस्मै मांसं न दातव्यम् अपितु साक्षात् गावः एव दातव्याः, सः स्वयं तेभ्यः गोभ्यः मांसं प्राप्नुयात् इति।

इत्येवं रीत्या भाष्यस्य दृष्टान्तम् एनं दृष्ट्वा गोमांसभक्षणस्य इच्छुकः अत्र कथयति यत् पश्य भो! महाभाष्यकारस्य काले अपि मांसार्थं गवां विक्रयणं क्रियते स्म अतः गोमांसस्य भक्षणं लोके आसीत् एव अतः गोमांसं भक्षणीयम् इति। अत्र उच्यते – महाभाष्यस्य प्रथमस्य व्याख्यातुः भगवतः भर्तृहरेः काले प्रकृते दृष्टान्तभाष्ये **मांसं न विक्रेतव्यम्** इति पाठः नासीत् इति तदीयां महाभाष्यस्य प्रसिद्धां व्याख्यां महाभाष्यदीपिकां दृष्ट्वा ज्ञायते। तत्र इति अस्य दृष्टान्तस्य व्याख्यानस्य अवसरे भर्तृहरेः वचांसि इत्थं भवन्ति – **यथा तर्हि घृतं तैलम् इति। एतदुक्तं भवति – न संभवमात्रात् प्रतिपत्तिर्युक्ता । सत्यपि घृततैलसंभवे, घृतरूपस्य गोशब्देनानभिधानात्। तैलरूपस्य च सर्षपशब्देनानभिधानात् तयोर्विक्रयो भवति**[3] इति। अत्र व्याख्यायां स्पष्टं ज्ञायमानम् अस्ति यत् भर्तृहरिणा तैलशब्दस्य सम्बन्धः सर्षपशब्देन स्थापितः वर्तते घृतशब्दस्य सम्बन्धः च गोशब्देन स्थापितः वर्तते। यदि महाभाष्यस्य दृष्टान्तस्य मूले

[1] महर्षिः पतञ्जलिः (व्याख्याता – पं.युधिष्ठिरो मीमांसकः), संस्करण -२००८, व्याकरणमहाभाष्यम्, प्रथमः भागः, पृष्ठ संख्या - १२५, प्र.सू.सं.३/४, रेवली, सोनीपत - हरायाणा, रामलालकपूर ट्रस्ट्।

[2] महर्षिः पतञ्जलिः (व्याख्याता – पं.युधिष्ठिरो मीमांसकः), संस्करण -२००८, व्याकरणमहाभाष्यम्, प्रथमः भागः, पृष्ठ संख्या - १४१, वा.सं.९, रेवली, सोनीपत - हरयाणा, रामलालकपूर ट्रस्ट्।

[3] भर्तृहरिः (सम्पादकः – G.B.Palsule), संस्करण -१९८८, महाभाष्यदीपिका, Fascicule-V, आ.२, पृष्ठ संख्या - १२५, पृ.सं.२४, भण्डारकर ओरियेण्टल् रीसर्च् इंस्टिच्यूट् पूना, महाराष्ट्रम्।

अत्र **मांसं न विक्रेतव्यम्** इति पाठः एव स्यात् तर्हि व्याख्यात्रा भर्तृहरिणा कुतः गोघृतयोः मिथः अन्वयः प्रदर्श्येत, तैलमांसयोः ननु प्रदर्श्येत अन्वयः, परं न तथा तेन व्याख्यातम्। अनेन ज्ञायते यत् महाभाष्यस्य पाठे अपि क्वचित् पाठभेदम् आश्रित्य मांसविक्रयादिसङ्कीर्तनपरैः इष्टसिद्धेः पूर्त्यर्थं कैश्चित् यत्तं स्यादेव अतः एव पाठभ्रष्टता एतादृक्षेषु प्रसङ्गेषु असकृत् दृश्यते तत्र तत्र ग्रन्थेषु। एतं च मांसशब्दयुक्तं पाठभेदं महाभाष्यग्रन्थस्य अन्यः कश्चन सम्पादकः भार्गवशास्त्री अपि उट्टङ्कयति[4] घृतशब्देन युक्तम् एव च मूलं पाठं स्वीकरोति। अतः **``मांसं न विक्रेतव्यम्''** इत्येव पाठस्य सङ्गतिः अत्र ज्ञातव्या। प्रसङ्गे अत्र अग्रे भर्तृहरिणा उक्तं यत् `एवं हि सम्भवमात्रे गोविक्रयी मांसविक्रय्यपि स्यात्' इति। तदिदं वाक्यं तु घृतस्य निदर्शनम् आदौ गृहीत्वा ततः मांसादावपि विक्रयणसम्भवः पश्चात् उक्तः वर्तते। यदि मूले मांसशब्दः स्यात् तर्हि आदौ मांसनिदर्शनं प्रदाय पश्चात् घृतनिदर्शनं दद्यात् व्याख्याता परन्तु तेन प्रधानतया आदौ घृतनिदर्शनम् एव प्रादायि, तेनापि अयं विषयः स्पष्टः भवति यत् भाष्यमूले घृतशब्दयुक्तः पाठ एव अस्ति इति। किञ्च यदीह भर्तृहरिव्याख्यायां पश्चात् मांसनिदर्शनस्य सम्भवम् आशङ्क्य मांसशब्दयुक्तः मूलपाठः कैश्चित् अङ्गीक्रियमाणः अस्ति तर्हि अपि अनेन मांसाहारावगमः एव ध्वनितः भवति इत्यपि नापादनीयं, तत् कुतः इति चेत् गा हत्वा एव तेषां मांसस्य विक्रयणं क्रियेत इति न खलु आवश्यकम्, गोः आयुष्यसमाप्तौ अपि तद्दिवङ्गतेः परम् अपि चर्मकारादयः विभिन्नवस्तूनां निर्माणाय तेषां मांसस्य विक्रयणं खलु शक्नुवन्ति कर्तुम्। अतः भक्षणाय गोमांसः तदा स्म विक्रीयते स्म इति योऽयं विचारः स तु न ऋषिग्रन्थात् अस्मात् ध्वनयितव्य इति काचित् मतिः। विषये अस्मिन् ईषदिङ्गितेन भाष्यस्य प्रकृतव्याख्यानस्थले एव अस्मादृशानाम् अध्येतॄणां ध्यानाकर्षणं महामहोपाध्यायेन पण्डितयुधिष्ठिरमीमांसकवर्येण कृतं वर्तते।

व्याकरणमहाभाष्ये पशुबलिविधानपरकस्य वाक्यस्य समन्वयनम् –

महाभाष्ये सम्प्रदानसञ्ज्ञाविधायकानां सूत्राणाम् प्रथमस्य सूत्रस्य[5] अयं प्रसङ्गः वर्तते। तत्र हि **कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा**[6] इति किञ्चन आक्षेपवार्तिकं पठ्यते। `पशुना रुद्रं यजते' इति हि तस्य वार्तिकस्य उदाहरणं प्रस्तूयते तत्र। प्रकृते भवति पशुः कर्म।

[4] महर्षिः पतञ्जलिः (सम्पादकः – भार्गवशास्त्री), संस्करण -१९८७, व्याकरणमहाभाष्यम्, प्रथमः भागः, पृष्ठ संख्या - ११९, स.वा.४५, पा.टि.सं. - ५, देहली, चौखम्बा-संस्कृत-प्रतिष्ठानम्।

[5] ब्रह्मदत्तो जिज्ञासुः (व्याख्याता), अष्टाध्यायी-प्रथमावृत्तिः, नवमं संस्करणम्, (२००५), रेवली, रामलाल कपूर ट्रस्ट्, सोनीपत – हरयाणा, प्रथमः भागः, पृ.सं. ११९, सू.सं. १.४.३२

[6] महर्षिः पतञ्जलिः (सम्पादकः – भार्गवशास्त्री), संस्करण -१९८७, व्याकरणमहाभाष्यम्, द्वितीयः भागः, पृष्ठ संख्या - २५७, आ.वा.१०६, देहली, चौखम्बा-संस्कृत-प्रतिष्ठानम्।

रुद्रः तु सम्प्रदानं भवति। वार्तिकेन कर्मणः पशोः करणत्वं सम्प्रदानस्य च रुद्रस्य कर्मत्वं विधीयते। ततः पशुना इति तृतीतान्तं रुद्रम् इति च द्वितीयान्तं श्रूयते क्रमशः करणत्वात् कर्मत्वात् च। पशुं रुद्राय ददाति इति अर्थः उदाहरणस्य भवति। अत्र हि वार्तिकं सोदाहारणं व्याख्याय ततः पशुबलेः विधानम् आचक्षाणः भाष्यकारः कथयति यत् **अग्नौ किल पशुः प्रक्षिप्यते तद्रुद्रायोपाह्रियत इति** इति कथयति। तदिदं भाष्यकारीयं वचनं दृष्ट्वा बहवो हि वैदिकाः वैयाकरणाः सन्तः अपि प्रबलतया पशुबलेः विधानस्य समर्थनं कुर्वन्ति। न केवलं समर्थनम् एव कुर्वन्ति अपितु स्वयं स्वीयाभ्यां पाणिभ्याम् इदं कर्म कुर्वन्ति अपि मोक्षप्राप्त्यर्थम्। तदिदं तु अयुक्तम्। कुतः इति कथयामः - सर्वादौ अस्माकं आर्षानुयायिनाम् **आत्मनः प्रतिकूलानि न परेषां समाचरेत्** इति महत् एव मूल्यं प्रमाणं भवति। यां पीडां वयं स्वयं सोढुम् एव न शक्नुमः तां पीडां अन्यस्मै प्राणिने कथं वा दद्याम इति। अधर्म एव हि सः। किञ्च वेदरक्षाम् पुरस्कृत्य त्रिमुनि व्याकरणस्य कार्यम् अस्ति शब्दानाम् अन्वाख्यानम्। भाष्यकारस्य समये यज्ञे अवैदिकस्य पशुबलेः विधानस्य आरम्भः जातः स्यादेव निश्चयेन अत एव सः पशुबलिसम्बद्धस्य कर्मणः करणत्वेन सम्प्रदानस्य च कर्मत्वेन श्रूयमाणस्य प्रयोगस्य प्रकृतवार्तिकेन अन्वाख्यानम् अकार्षीत्। व्याकरणं तु प्रयुक्तानां शब्दानाम् अन्वाख्यानं करोति। एवञ्च यथा तत्समये विधानं श्रुतं शब्दानां भाष्यकारेण तथा तेषाम् अन्वाख्यानव्यस्था अपि कृता। एतेन भाष्यकारेण पशुबल्यर्थं स्वीया सम्मतिः प्रकटिता इति तु वक्तुं न युज्यते खलु, यतः अवैदिकस्य कर्मणः उपदेशः ऋषिणा कथं वा कर्तुं शक्यते, न सुतरां कर्तुं शक्यते इत्यर्थः। पशुबलिः नासीत् इति वक्तुम् अभिप्रायः न, परन्तु वेदासम्मतम् इदं कर्म अर्वाचीनतां भजमानम् अतिप्राचीनं वैदिककाले नासीत् इति विदुषः तत्र अनेकस्य अभिमतं वर्तते। तदिदं वैदिकं कर्म कुतः न इत्यत्र किं प्रमाणम् इति चेत् अस्मिन् विषये पण्डितयुधिष्ठिरमीमांसकवर्यः अस्माकं ध्यानाकर्षणं करोति तदीयमहाभाष्यव्याख्यायाम्[7]। प्रकृतवार्तिकस्य एव व्याख्यानावसरे सः चरकचिकित्सास्थानस्य इदम् उद्धरणं (१९.४) ददाति **आदिकाले खलु यज्ञेषु पशवः समालभनीयाः बभूवुः, नालम्भनाय प्रक्रियन्ते स्म** इति। अत्र वाक्ये समालभनं नाम केवलः स्पर्शः इति, नालम्भनाय अर्थात् न मारणाय कर्तनाय वा। तत्रैव अग्रिमम् उद्धरणं तत्र महाभारतस्य शान्तिपर्वणः (३३७.४) उद्ध्रियते, तदेवम् –

बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः।
अजसंज्ञानि बीजानि छागं नो हन्तुमर्हथ॥

पद्ये अत्र साक्षात् उक्तम् अस्ति यत् यागे बीजैः एव यष्टव्यम्। पुरातनानि बीजानि अजसंज्ञानि भवन्ति येभ्यः सस्योत्पत्तिः न भवति तैः बीजैः एव यागः कर्तव्यः, छागस्य हननं न कर्तुं

---

[7] महर्षिः पतञ्जलिः (व्याख्याता – पं.युधिष्ठिरो मीमांसकः), संस्करण -२००८, व्याकरणमहाभाष्यम्, द्वितीयः भागः, पृष्ठ संख्या - ४४९, रेवली, सोनीपत - हरायाणा, रामलालकपूर ट्रस्ट्।

शक्यते इति। तद्वेदविरुद्धम् इति। अतः चरकमहाभारतादीनां वचोभिः अपि इदं ज्ञायते यत् पशुबलेः विधानं वैदिकं नास्ति प्रत्युत वेदे पशुहननस्य निषेधः एव उक्तः अस्ति तद्यथा –

यदि नो गां हिंसीः यद्यश्वं यदि वा पूरुषम्।
तं त्वा सीसेन विध्यामो यथा नोऽसो विरहाः ॥[8]

अर्थात् यदि कश्चन असाकं गवाश्वछागादीन् पशून् हन्ति तर्हि वयं तं जनं सीसाख्यस्य पदार्थस्य गोलिकया मारयेम इति। एवं तर्हि एतावति वेदस्य उपदेशे सति न महाभाष्यकारः अपि वेदविरुद्धस्य पशोः हननस्य उपदेशं शक्नोति कर्तुम्। वार्तिकस्थम् उदाहरणं तु तेन तदानीन्तने लोके जायमानम् अवैदिकं पशुबलिविधानं दृष्ट्वा एव प्रदत्तं तदपि शब्दान्वाख्यानदृष्ट्वा न तु विधानदृष्ट्या इति अस्माकम् अभिमतम्।

अग्नये छागस्य वपायाः मेदसः प्रेष्य अनुब्रूहि वा इत्युदाहरणस्य अर्थसङ्गतिः –

पाणिनेराचार्यस्य अष्टाध्याय्याः विभक्तिविधानकाण्डे **प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने**[9] इति सूत्रं पठ्यते कर्मणः षष्ठ्याः विधानपरकम्। देवतासम्प्रदाने अर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविषः वाचकात् शब्दात् षष्ठी विभक्तिः भवति इति सूत्रस्य अस्य अर्थः। **`अग्नये छागस्य वपायाः मेदसः प्रेष्य'** इति **`अग्नये छागस्य वपायाः मेदसः अनुब्रूहि'** इति उदाहरणद्वयम् अत्र उदाह्रियते। उदाहरणद्वयम् इदं यजुर्वेदे[10] काण्वश्रौत[11]सूत्रादिषु च प्राप्यते। प्रकृते मैत्रावरुणं प्रति अध्वर्युकृतकः एषः सम्प्रैषः भवति यत् हे मैत्रावरुण! अग्न्युद्देश्येन प्रदास्यमानं छागसम्बद्धि यत् हविः तत् वापाख्यं मेदोरूपं प्रेष्य इति। एवमेव पुरतः अनुवाक्यया प्रकाशय इति मैत्रावरुणं प्रति कथयन् अध्वर्युः अग्नये छागस्य वपायाः मेदसः अनुब्रूहि इति ब्रुवा धातुना युक्तं वाक्यान्तरं प्रयुङ्के। प्रकृते कैश्चित् छागस्य अर्थः छागक्षीर इति न स्वीकृत्य छागाख्यः पशुः एव इति गृह्यते। ततः वपायाः मेदसः च मांसम् इति अर्थः स्वीक्रियते। **मेदश्शब्देन वस्त्रखण्डतुल्यः मांसविशेष उच्यते**[12] इति कथयति कश्चित् सिद्धान्तकौमुद्याः व्याख्याता। वस्तुतः अत्र छागस्य मांसादिकस्य अर्थः यागादिषु पशोः हननं कृत्वा तदङ्गैः आहुतिदानं कुर्वन्ति ये तैः स्वीक्रियते। पशुयागविषये अस्ति तत्र विवादः महान् कश्चन। तद्विषये लेखान्ते

---

8 अथ.वे. १.१६.४

9 ब्रह्मदत्तो जिज्ञासुः (व्याख्याता), अष्टाध्यायी-प्रथमावृत्तिः, नवमं संस्करणम्, (२००५), रेवली, रामलाल कपूर ट्रस्ट्, सोनीपत – हरयाणा, प्रथमः भागः, पृ.सं. २३३, सू.सं. २.३.६१

10 यजुर्वेदभाष्यम्, (भाष्यकारः – स्वामी दयानन्दसरस्वती), यजुर्वेदः, द्वितीयं संस्करणम्, (संवत्सरः – १९६१), वैदिकयन्त्रालयः – अजमेर, राजस्थानम् ,तृतीयः भागः - पृष्ठ संख्या ,६६, मं.सं. – ४१

11 काण्वश्रौतसूत्रम् – ६.६.२०/२३

12 वासुदेवो दीक्षितः (व्याख्याता), वैयाकरणसिद्धान्तकौमुदी – बालमनोरमा, एकादशं संस्करणम् (२०१०), मोतीलाल बनारसीदास – बंग्लो रोड्, जवाहरनगर-देहली , प्रथमः भागः - पृष्ठ संख्या , ६८२, सूत्रसंख्या –६२१

उपसंहारकथनसमये कथयिष्यामः। अधुना प्रकृते प्रकारान्तरेण मन्त्रार्थस्य सङ्गतिविषये विमर्शः क्रियते। `छागस्य वपायाः मेदस...' इत्यादिमन्त्रांशे छागस्य अर्थः `छागाख्यस्य पशोः' इत्यर्थः न अपितु `छागस्य क्षीरस्य' इति अर्थः वर्तते। स कुत इति चेत् तत्र छाग्याः इदम् इत्यस्मिन् अर्थे छागी इति जातिवाचकात् शब्दात् अणि[13], अढे तद्धिते अणि परतः भस्य छागीशब्दस्य पुंवत्त्वे [14] ङीषो निवृत्त्या निष्पन्नस्य तद्धितान्तस्य छागशब्दस्य क्षीरविशेषणतया नपुंसके षष्ठ्यन्तम् छागस्य इति मन्त्रे विद्यमानस्य पदस्य व्युत्पत्तिः ज्ञेया। सोऽयम् एतादृशि अर्थे छागशब्दस्य प्रयोगः चरके अपि दृश्यते तद्यथा –

छागं कषायमधुरं शीतं ग्राहि पयो लघु।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम्॥[15]

छागं पयः अर्थात् छागस्य क्षीरं शीतं, ग्राहि, लघु, कषायमधुरं, रक्तपित्तातिसारघ्नं क्षयकासज्वरापहं च भवति इति श्लोकस्य अर्थः। अतः सूत्रोदाहृते मन्त्रान्शे अपि छागस्य इति पदस्य अर्थः छाग्याः क्षीरस्य इति ज्ञातव्यः। ननु जिज्ञासा जायेत यत् छागस्य इत्यस्य अर्थः छाग्याः क्षीरम् इति चेत् तर्हि वपायाः इत्यस्य कः अर्थः तत्र ग्राह्यः कश्च मेदसः इति। इति चेत् क्षीरस्य क्वथनात् परं क्षीरस्य उपरि यः स्थूलः पदार्थः श्वेतवर्णीयः तिष्ठति सः पदार्थः वपा इति ज्ञेयम्। वपा इत्यस्य शब्दस्य मांसभेदविशेष एव ग्राह्यः इति नास्ति। वेदे तावत् भिन्नार्थे अपि वपाशब्दस्य प्रयोगः व्याख्यातः दृश्यते। तद्यथा तैत्तिरीयसंहितायां[16], तैत्तिरीयब्राह्मणे[17] शतपथब्राह्मणे[18] च पुत्तिकायाः वाल्मीकस्य कृते अपि वपा इति शब्दस्य व्यवहारः कृतः दृश्यते। प्रकृते तु छागस्य वपायाः मेदसः इति एतेषु शब्देषु कार्यकारणभावसम्बन्धं पुरस्कृत्य वपार्थः ग्राह्यः। वपायाः कारणम् अत्र क्षीरम् स्वीक्रियमाणम् अस्ति इत्यतः वपा क्वथिते क्षीरे उत्पद्यमानः क्षीरापेक्षया स्थूलः कश्चन पदार्थः भवति। अपि च ञिमिदा स्नेहने इति धातोः निष्पन्नस्य मेदसः अर्थः वपायां विद्यमाना स्निग्धता अर्थात् स्नेहविशेषः भवति। ततः छाग्याः क्षीरस्य वपायाः यः अतीव स्निग्धः भागः अस्ति तेन यज्ञः कर्तव्यः इति ज्ञातं भवति न तु मांसेन। यदि तु छागस्य छाग्याः क्षीरम् इति अर्थः न स्वीक्रियेत, छागाख्यः पशुः इत्येव अर्थः स्वीक्रियेत तर्हि तु पशोः छागस्य कारणत्वात् कार्यरूपिणी वपा अत्र मांसभेदविशेषत्वेन एव गृह्येत। परन्तु पशून् पाहि[19] इत्याद्युद्घोषेन यत्र वेदः पशूनां रक्षणाय कथयति तत्रैव तेषां हननं

---

[13] ब्रह्मदत्तो जिज्ञासुः (व्याख्याता), अष्टाध्यायी-प्रथमावृत्तिः, नवमं संस्करणम्, (२००५), रेवली, रामलाल कपूर ट्रस्ट्, सोनीपत – हरयाणा, द्वितीयः भागः, पृ.सं. १९९, सू.सं. ४.३.११९

[14] भट्टोजिदीक्षितः (ग्रन्थस्य कर्ता), वैयाकरणसिद्धान्तकौमुदी, षष्ठं संस्करणम्, (२००६), मोतीलाल बनारसीदास – बंग्लो रोड्, जवाहरनगर- देहली , द्वितीयः भागः, पृ.सं. १४४, वा.सं. ३९२८

[15] चरकसंहिता, सूत्रस्थानम्, अन्नपानविध्यध्यायः – २७, श्लो.सं - २२२

[16] तै.सं. ५.१.२.५

[17] तै.ब्रा. १.१.३.४

[18] शत.ब्रा. ६.३.३.५

[19] य.वे. १.१

कथं शक्यम् उपदेष्टुम् इत्यतः विरोधोक्तेः परिहाराय नूनम् एव तत्र क्षीराद्यर्थपरा सङ्गतिः कर्तव्या एव। प्रमाणितश्च छागस्य क्षीराद्यर्थः सविस्तारं मीमांसादर्शनस्य व्याख्यायां[20] पण्डितयुधिष्ठिरमीमांसकवर्येण।

अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यशूकरः –

व्याकरणमहाभाष्यस्य पस्पशायां शब्दानाम् अनुशासनं कर्तव्यम् अथवा अपशब्दानाम् अनुशासनं कर्तव्यम् इति पृष्ट्वा उक्तं यत् उभयोः कस्यचित् एकस्य अनुशासनं कर्तव्यं, तेन अवशिष्टस्य स्वत एव अनुशासनं कृतं भविष्यति इति कश्चन विषयः उत्थाप्यते। तत्र दृष्टान्तपरतया कथयति भाष्यकारः यत् यथा ग्रामस्य कुक्कुटः न भक्षणीयः इति नियमः क्रियते, एतेन नियमेन एव स्पष्टं भवति यत् वनस्य कुक्कुटः खादितुं शक्यते इति। एवमेव सूकरस्य विषये अपि। पञ्च पञ्च नखाः भक्ष्याः[21] इति नियमेन अवगम्यते यत् येषां पञ्च नखाः न सन्ति तेषां प्राणिनां भक्षणं न कर्तव्यम् इति। भाष्यस्य एतत् स्थलं दृष्ट्वा मांसाहारिणः तावत् एतं विधिवाक्यं मत्त्वा मांसाहारस्य विधानं ऋषिणा निर्दिष्टम् इति कथयन्ति। वस्तुतः वाक्यम् इदं न विधिवाक्यम् अपितु नियमवाक्यम् अस्ति तेभ्यः ये निषिद्धस्य मांसाहारस्य प्रवृत्तौ आत्मानं व्यापारितवन्तो भवन्ति। मांसाहारः निषिद्धः कुत इत्यत्र अस्माकं वेदादिशास्त्राणाम् उपदेश एव प्रमाणं भवति। तद्यथा स्वयम् अथर्ववेदः –

य आमं मांसमदन्ति पौरुषेयञ्च ये क्रविः।
गर्भान् खादन्ति केशवास्तानितो नाशयामि॥[22]

अर्थात् ये कामिनः जनाः अपक्वं मांसम् अथवा पुरुषैः सम्पादितं मांसम् गर्भान् अर्थात् अण्डानि च खादन्ति तान् जान् अस्मात् वर्मानात् लोकात् नाशयामि इति वेदो भगवान् कथयति। महाभाष्यकारेण तु तत्समये अपि वेदविरुद्धां मासाहारप्रवृत्तिं पुरस्कृत्य शब्दस्य वा अपशब्दस्य वा अनुशासनस्य प्रसङ्गे तत्र दृष्टान्तमात्रम् एव स्वीकृतम्। कथञ्चित् अपि प्रकृतस्थले एषां वाक्यानां विधानबुद्धिः न कर्तव्या वेदविरुद्धत्वात्।

एवमेव पस्पशाह्निके मुख्यप्रयोजनानां कथनसमये स्वरभेदात् पदे बहुव्रीहिसमासः वा तत्पुरुषसमासः वा इति अर्थस्य निश्चयं कृत्वा सन्देहेन विना शब्दार्थेषु प्रवर्तनाय व्याकरणं

---

[20] पण्डितो युधिष्ठिरो मीमांसकः, (व्याख्याता - आर्षमतविमर्शिनी), मीमांसादर्शनम्, तृतीयं संस्करणम्, (१९९०), सू.सं.२.१.५.२०, रेवली, रामलाल कपूर ट्रस्ट्, सोनीपत – हरयाणा, प्रथमः भागः, पृ.सं. २३३, सू.सं. २.३.६१

[21] पण्डितो युधिष्ठिरो मीमांसकः, (व्याख्याता), व्याकरणमहाभाष्यम्, तृतीयं संस्करणम्, (वि.सं.१९६५), आ.१, रेवली, रामलाल कपूर ट्रस्ट्, सोनीपत – हरयाणा, प्रथमः भागः, पृ.सं. ३७

[22] अथर्ववेदः।

पठनीयम् इति वदन् भाष्यकारः स्थूलपृषतीमाग्नीवारुणीमनड्वाहीमालभेत[23] इति उदाहरणं स्वीकृत्य विवृणोति। प्रकृते उदाहरणे आलभेत इत्यस्य मारयेत् इत्यर्थं स्वीकुर्वन्ति केचित्। वस्तुतः तथा नास्ति। अत्र प्रसङ्गे महाभाष्यस्य व्याख्यातृषु अन्यतमः पण्डितुधिष्ठिरमीमांसकवर्यः प्रतिपादयति यत् उदाहरणे प्रयुक्तस्य आङ्पूर्वकस्य लभधातोः मारणार्थः नास्ति अपितु स्पर्शार्थः अस्ति। आङ्पूर्वकः नुमा सहितः लभधातुः यः तस्य एव मारणार्थः भवति इति। अयं विषयः चरकसंहितायाः विमानस्थाने एकस्मिन् एव वाक्ये प्रयुक्तस्य अनुमः सनुमः च धातोः दर्शनेन ज्ञायते। तत्र हि **आदिकाले पशवः समालभनीया बभूवुः, नालम्बनाय प्रक्रियन्ते स्म** इति वाक्यं वर्तते। वाक्यस्य अर्थः भवति यत् आदिकाले यज्ञादौ पशवः स्पर्शनीयाः भवन्ति स्म न तु मारणाय इति। स्पर्शमात्रं कृत्वा ते पशवः त्यज्यन्ते स्म। परन्तु उत्तवर्तिनि काले मानवस्य मांसाहारिण्या प्रवृत्त्या यागादिरूपः पवित्रः धर्मः अपि दूषितः पशुबलिव्याजेन। अतः सुतरां भाष्यस्य अस्मात् उदाहराणात् अपि नायं ग्राह्यः अर्थः यत् पुरा गोः अपि कर्तनं क्रियते स्मातः अधुना अपि गवादीन् पशून् मारयित्वा खादेम इति। अपि च सूत्रकारेण पाणिनिना आचार्येण उक्तेषु **शूलोखाद्यत्, श्राणामांसौदनाट्टिठन्, शूलात्पाके, क्रव्ये च** इत्येषु अनुशासनेषु अपि शब्दान्वाख्यानस्य एव दृक् स्थापनीया न तु विधानस्य इति लेखे प्रतिपादितेन अभिप्रायेण ज्ञातव्यं सर्वत्र।

अयि लेखस्य पाठकाः! पशुयागः अवैदिकः इति प्रतिपादयितुं न मे अभिप्रायः सुतराम् अपि परन्तु पशूनां यागेषु स्पर्शनपरकं प्रयोजनम् आदाय एव समन्वयनम् अस्माभिः कर्तव्यम् इत्येव अभिप्रैतुम् अत्र यत्तं व्याकरणशास्त्रगतान् प्रसङ्गान् आदाय। पशूनां मारणं यागेषु न सर्वथा कर्तव्यम् इति पक्षस्य पोषकाः अभिमानिनः बहवः सन्ति धरण्याम्। वैष्णवसम्प्रदायाभिमानिनः तु न कथञ्चित् अपि पशूनां मारणं सहन्ते। स्वामी दयानन्दसरस्वती महोदयहस्तु तदीये सत्यार्थप्रकाशग्रन्थे एतावत् अवादीत् यत् यदि यज्ञे पशोः हननं कृत्वा आहुतिदानेन स्वर्गः लभ्यते तर्हि यज्ञस्य कर्ता किमर्थं गौरवभूते अस्मिन् कर्मणि पतित्वा कालं नाशयति, कुतो न स्वयमेव आत्मानं स्वान् च गृहीत्वा यज्ञकुण्डे कूर्दनं विधाय मोक्षस्य प्राप्तिं सपद्येव न करोति इति। यदि न तथा शक्नोति शरीरपीडायाः भिया तर्हि अन्यस्मै प्राणिने अपि सा पीडा किमर्थं देया इति। वस्तुतः अस्मिन् निर्दोषस्य प्राणिनः हननकर्मणि न सुतरां मानवमूल्यं किमपि पोषितं भवति प्रत्युत दयापरोपकाराख्यानां मूल्यानां हननम् एव अयम्। वस्तुतः स्वर्गप्राप्तिकामाः ये तावत् मांसादिभक्षणस्य पशुबलेः च समर्थनेन रताः विश्वशान्तेः भङ्गाय नक्तन्दिवं तेभ्यः महर्षिः मनुः कथयति यत् एतादृशि भ्रमे मा तिष्ठन्तु इति -

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्।

---

[23] पण्डितो युधिष्ठिरो मीमांसकः, (व्याख्याता), व्याकरणमहाभाष्यम्, तृतीयं संस्करणम्, (वि.सं.१९६५), आ.१, रेवली, रामलाल कपूर ट्रस्ट्, सोनीपत – हरयाणा, प्रथमः भागः, पृ.सं. १२

न च प्राणिवधः स्वर्ग्यः तस्मान्मासं विवर्जयेत्॥[24]

एवं च लेखे अत्र कतिपयान् एव व्याकरणगतान् विचारान् आदाय पूज्यानां ज्येष्ठानाम् आर्याणाम् पदानुकरणं कुर्वता व्याकरणशास्त्रं न कथञ्चित् अपि हिंसासमर्थकम् इति प्रत्यपादि। जानामि यत् इदं पाठम्पाठं करुणार्द्रचित्ताः स्युः नितान्तं तुष्टाः। ये तु तावत् निष्कारणं अतिसरलानां प्राणिनां हनने सन्ति रताः तेभ्यः भगवान् अखिलाण्डेश्वरः दद्यात् कारुण्ययुतं चेत इति प्रार्थये नित्यम्। इति शम्।

सन्दर्भग्रन्थसूची

१. व्याकरणमहाभाष्यम्, महर्षिः पतञ्जलिः, (सम्पादकः –भार्गवशास्त्री), संस्करण -१९८७, देहली, चौखम्बा-संस्कृत-प्रतिष्ठानम्।
२. व्याकरणमहाभाष्यम्, महर्षिः पतञ्जलिः (व्याख्याता – पं.युधिष्ठिरो मीमांसकः), संस्करण –२००८, रेवली, सोनीपत - हरायाणा, रामलालकपूर ट्रस्ट्।
३. महाभाष्यदीपिका, भर्तृहरिः (सम्पादकः – G.B.Palsule), संस्करण - १९८८, Fascicule-V, भण्डारकर ओरियेण्टल् रीसर्च् इंस्टिच्यूट् पूना, महाराष्ट्रम्।
४. यजुर्वेदभाष्यम्, (भाष्यकारः – स्वामी दयानन्दसरस्वती), यजुर्वेदः, द्वितीयं संस्करणम्, (संवत्सरः – १९६१), वैदिकयन्त्रालयः – अजमेर, राजस्थानम्।
५. चरकसंहिता, सूत्रस्थानम्, अन्तर्जालात् पी.डि.एफ् मूलमात्रम्।

सङ्केताक्षरसूचिः

अथ.वे.	अथर्ववेदः,	आ	आह्निकम्
आ.वा.	आक्षेपवार्तिकम्,	तै.सं.	तैत्तिरीयसंहिता
तै.ब्रा.	तैत्तिरीयब्राह्मणम्,	पा.टि.सं.	पादटिप्पणीसंख्या
पृ.सं.	पृष्ठसंख्या,	प्र.सू.सं.	प्रत्याहारसूत्रसंख्या
मं.सं.	मन्त्रसंख्या,	म.स्मृ.	मनुस्मृतिः
य.वे.	यजुर्वेदः,	वा.सं	वार्तिकसंख्या
वि.सं.	विक्रमसंवत्सरः,	शत.ब्रा.	शतपथब्राह्मणम्
स.वा.	समाधानवार्तिकम्,	सू.सं	सूत्रसंख्या

24 म.स्मृ. ५.४८

Dr. Jaya Krishna Sharma
Asst. Professor
School of Vedic Knowledge Systems
Chinmaya Vishwavidyapeeth
Chinmaya Eswar Gurukul
Adi Sankara Nilayam, Adi Shankar Marg,
Veliyanad, Ernakulam (Kochi) - 682313
Kerala, India
Personal Email: jaykrishna.arya@gmail.com
Official Email: jaya.krishna@cvv.ac.in
Website: www.cvv.ac.in/
https://www.cvv.ac.in/faculty-details/dr._jay_krishna_sharma#facpge

***

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 10th Issue / Vol.VI - June 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

शाब्दिकनिकाये शाब्दिकस्य कमलाकरभट्टस्य अवदानम्

- श्रीमन्तभद्रः

शोधसारः -

विभक्त्यर्थप्रकाशाख्यवृत्तिग्रन्थस्य व्याख्यादर्शटिप्पण्याख्यभाष्योपव्याख्यानस्य प्रणेतुः धर्मशास्त्रकारात् कमलाकरभट्टाद् भिन्नस्य इतिहासग्रन्थेषु अप्रसिद्धस्य शाब्दिकस्य कमलाकरभट्टस्य परिचयः प्रस्तूयते। अस्य शाब्दिकचूडामणेः देशकालविषये किमपि तथ्यमितिहासादिग्रन्थेषु नावाप्यते, क्वचिच्च अस्य कृतेः नामोल्लेखमात्रं दृश्यते, क्वचिच्च अयम् अस्मिन् काले स्यात् इति संशयग्रस्ता ऊहा लक्ष्यते। अतः New CatalogusCatalogorum (NCC), विवरणात्मकग्रन्थसूची (Descriptive Catalogue), Encyclopedia of Indian Philosophy इत्यादिग्रन्थान् समाश्रित्य वर्ण्यमानस्य ग्रन्थकारस्य मातृकाश्च आधारीकृत्य देशकालकृतयः प्रस्तूयन्ते।

कुञ्ची-शब्दाः – कमलाकरभट्टः, विभक्त्यर्थप्रकाशः, व्याख्यादर्शटिप्पणी, प्रक्रियाकौमुदीव्याख्या ।

---

१. उपोद्घातः

संस्कृतवाङ्मयोदधिं स्वीयकृतिरत्नैः रत्नगर्भीचक्रुर्नैके ऋषयः, कवयः, शास्त्रकाराः। येषु केचन प्रसिद्धाः, केचन अप्रसिद्धाः। प्रसिद्धिरवश्यं स्वीयकृतिभिर्भवति तथापि यावत् कृतिः मुद्रणालयं प्रविश्य ग्रन्थरूपं न दधाति तावन्न सिद्ध्यति। अधुनापि सन्ति स्वक्षेत्रेषु बहवो धुरन्धरा विपश्चिदपश्चिमाः कृतिमन्तो विद्वांसः, परन्तु ते अद्यापि अप्रसिद्धाः, यतोहि तेषां अधृतमुद्रितग्रन्थरूपाः कृतयः अधुना पर्यन्तं नानामातृकालयेषु मातृकारूपेणैव संरक्षिताः, न प्रकाशिताः। तेषां कृतीनां प्रकाशनाभावात् तेषामपि अप्रसिद्धिः। विद्यते तादृशः कश्चन अप्रसिद्धः लौकिकवैदिकोभयवाङ्मयोपकारकपाणिनीयसम्प्रदायानुसारी महाभाष्ये कृतभूरिपरिश्रमः कमलाकरभट्टाख्यः वैयाकरणः। अस्य शाब्दिकचूडामणेः देशकालविषये किमपि तथ्यमितिहासादिग्रन्थेषु नावाप्यते, क्वचिच्च अस्य कृतेः नामोल्लेखमात्रं दृश्यते,

क्वचिच्च अयम् अस्मिन् काले स्यात् इति संशयग्रस्ता ऊहा लक्ष्यते। अतः New CatalogusCatalogorum (NCC), विवरणात्मकग्रन्थसूची (Descriptive Catalogue), Encyclopedia of Indian Philosophy इत्यादिग्रन्थान् समाश्रित्य वर्ण्यमानस्य ग्रन्थकारस्य मातृकाश्च आधारीकृत्य देशकालकृतयः प्रस्तूयन्ते।

२. कःशाब्दिकः कमलाकरभट्टः?

NCC (३.१६५)ग्रन्थाद् विज्ञायते यत् त्रयः कमलाकरभट्टाः आसन्।

२.१. प्रथमः कमलाकरभट्टः –

त्रिष्वेकः नैयायिकः आख्यातवादाख्यन्यायग्रन्थस्य व्याख्याता इति NCC (२.९)ग्रन्थाद् ज्ञायते किन्तु तद्विषये किमपि तथ्यमन्यत्र नोपलभ्यते, न वा स ग्रन्थः प्रकाशितः इत्यतः अपराभ्याम् अयं भिन्नो न वा इति निर्णेतुं न शक्यते। तथापि दृढतरप्रमाणाभावात् सः अपर एव इति ऊह्यते।

२.२. द्वितीयः कमलाकरभट्टः –

द्वितीयः संस्कृतवाङ्मये सुप्रसिद्धो वाराणसेयः रामकृष्णभट्टसूनुः[1] कमलाकरभट्टः। अस्य च कालः षोडशशतकस्य उत्तरार्धः सप्तदशशतकस्य च पूर्वार्धः इति ऐतिह्यविदः। ग्रन्थरचनाकालस्तु १६१०-१६४० ख्रीष्टाब्दः आसीदिति तत्त्वविद्भिरनुमीयते। अस्य च विदुषः बहुषु शास्त्रेषु अबाधगतिरासीदिति काव्यप्रकाशव्याख्यातो विज्ञायते–

तर्के दुस्तर्कमेधः फणिपतिभणितिः पाणिनीये प्रपञ्चे
न्याये प्रायः प्रगल्भः प्रकटितपटिमा भाट्टशास्त्रप्रघट्टे।
प्राभः प्राभाकरीये पथि प्रथितदुरूहान्तवेदान्तसिन्धुः
श्रौते साहित्यकाव्ये प्रचुरतरगतिर्धर्मशास्त्रेषु यश्च॥[2] इति।

भाउजीसङ्ग्रहे या शान्तिरत्नस्य मातृका विद्यते तस्या अन्ते भट्टकमलाकरस्य द्वाविंशतिकृतीनां सङ्ग्रहो विद्यते–

आदौ निर्णयसिन्धुस्तु वार्तिके टिप्पणी पुनः।
काव्यप्रकाशगा व्याख्या दाने च कमलाकरः॥

---

[1] “श्रीरामकृष्णपितरंनत्वोमाख्यांचमातरम्”– काव्यप्रकाशव्याख्या, UpennMs.Coll 390, item 525.
[2] काव्यप्रकाशव्याख्या, DC ms. No. 433 of 1895-1902.

शान्तिरत्नं ततः पूर्वव्रतयोः कमलाकरः।
ग्रन्थो वेदान्तरत्नं च सभादर्शकुतूहलम्॥
प्रायश्चित्ते रत्नमेकं व्यवहारे तथापरम्।
बह्वृचाह्निकमन्यच्च गोत्रप्रवरदर्पणः॥
रत्नं कर्मविपाकाख्यं कार्तवीर्यस्य पद्धतिः।
सोमप्रयोगः शूद्राणां धर्मो रुद्रस्य पद्धतिः॥
टिप्पणी च तथा शास्त्रदीपिकालोकसंज्ञिता।
मीमांसायां तथा शास्त्रतत्त्वस्य कमलाकरः॥
सर्वतीर्थविधिश्चैव भक्तिरत्नं तथोत्तमम्।
रामकृष्णसुतेनेत्थं कमलाकरशर्मणा।
द्व्यधिका विंशतीनां च ग्रन्थानां रत्नमालिका।
सेवां कर्तुमशक्तेन ह्यर्पिता रामपादयोः॥[3] इति।

एवम् अयं यद्यपि व्याकरणज्ञ आसीत् तथापि व्याकरणग्रन्थान् न लिखितवान्। अयं प्राधान्येन धर्मशास्त्रग्रन्थान् विरचितवान्। अतः अयं धर्मशास्त्रकारः आसीत्।

२.३. तृतीयः कमलाकरभट्टः –

रामचन्द्रसुतः कमलाकरभट्टः[4] अपरः कश्चन आसीदिति NCC (३.१६५)ग्रन्थाद् विज्ञायते। गोलिङ्गोपनामकोऽयं दत्तात्रेयशिष्यः आसीत्। किञ्च महाभाष्यगूढार्थदीपिन्याः कर्तुः सदाशिवस्य गुरुरासीदित्यप्युच्यते। तत्र महाभाष्यगूढार्थदीपिन्याः मातृकायाः पुष्पिकातः एतत्सर्वं स्फुटं विज्ञायते– “इति श्रीमद्गणेशप्रसादप्राप्तसत्प्रज्ञाभासुरविदुरशिरोमणिदत्तात्रेयपूज्यपादशिष्यव्याकरणार्णवकर्णधारगोलिङ्गोपनामककमलाकरदीक्षितचरणसमाराधनसमधिगतमहाभाष्याशयगूढतत्त्वस्य श्रीमत्सकलविद्यानिपुणान्तर्वाणिशिरोमणिमहागुरुनैलकण्ठिभट्टारकपादपरिचर्याध्वस्तसमस्ताज्ञानस्य भट्टसदाशिवस्य कृतौ गूढार्थदीपिन्यामष्टमोऽध्यायः समाप्तिमगात्”[5] इति। एतेनायं वैयाकरणः आसीदिति स्फुटं प्रतीयते। अयमेव शाब्दिकः कमलाकरभट्टः।

३. कमलाकरभट्टस्य देशः

कमलाकरभट्टः स्वीयग्रन्थेषु स्वदेशविषये किमपि न लिलेख इत्यतः अन्यशास्त्रकाराणामिव अस्यापि देशव्यवस्था अन्यकृतोल्लेखाश्रिता अनुमानाधारिता वा।

---

[3]अयंसङ्ग्रहोयद्यपिउपलभ्यमानायांतस्यांमातृकायांनविद्यतेतथापि१९२५ख्रीष्टाब्दे BBRAS इत्यतःप्रकाशितायांवेलङ्करमहोदयेनसम्पादितायांसंस्कृतप्राकृततालिकायांशान्तिरत्नस्यविवरणकालेअयंसङ्ग्रहोलक्ष्यते।
[4]“श्रीगोलिङ्गोपपदोरामचन्द्रतनूद्भवः”– विभक्त्यर्थप्रकाशः, DC, BORI, पृष्ठम्– ३००।
[5]DC, Skt. Col., मातृकाङ्कः– २६; DC, BORI, मातृकाङ्कः– ५९।

कमलाकरग्रन्थानां मातृकाणां पुष्पिकायामुत्तरपुष्पिकायामपि देशविषयकं किमपि तथ्यं नोपलभ्यते। तथापि कमलाकरभट्टशिष्यः सदाशिवः कमलाकरभट्टं गूढार्थदीपिनीग्रन्थे उदलिखत् इत्यतः सदाशिवस्य देशनिर्णयेन अस्यापि देशः व्यवस्थापितो भवेत्। किन्तु सदाशिवग्रन्थेऽपि देशो नोल्लिखितः। सदाशिवः स्वग्रन्थे यथा कमलाकरभट्टं गुरुरूपेण उदलेखीत् तथा नैलकण्ठिभट्टारकमपि महागुरुरूपेण अस्मरदिति पूर्वमेव दर्शितम्। तत्र 'नैलकण्ठि'शब्दप्रयोगात् नीलकण्ठस्यापत्यम् अथवा नीलकण्ठस्य शिष्यः अस्य सदाशिवस्य गुरुरासीदिति बुध्यते।

बलदेवोपाध्यायस्तु 'संस्कृत-वाङ्मय का बृहद् इतिहास' इति ग्रन्थे सदाशिवः नीलकण्ठात्मजः[6] इत्यवदत्।एवम् Encyclopaedia of Indian Philosophy इतिग्रन्थेऽपि उच्यते, "This Sadasiva, the author of a commentary, Gudharthadipani, on the Mahabhasya, was a son of NilakanthaDiksita[7]" इति। युधिष्ठिरमीमांसकस्तु 'नैलकण्ठि'शब्दं कमलाकरस्य विशेषणं स्वीकृत्य कमलाकरः नीलकण्ठस्य पुत्रः, सदाशिवश्च कमलाकरस्य भ्रातेति अभिप्रैति। तेन सदाशिवोऽपि नीलकण्ठस्यापत्यमिति लभ्यते। आद्यमतद्वये सदाशिवः कथं नीलकण्ठस्य पुत्रः इति व्याख्यानं न दृश्यते। तत्र कारणद्वयं भवितुमर्हति। 'नैलकण्ठि'शब्दप्रयोगात् सदाशिवः नीलकण्ठस्य पुत्रः इत्येकम्। 'नैलकण्ठि'शब्दः कमलाकरस्य विशेषणमिति द्वितीयम्। परन्तु पुष्पिकायाः पाठेन 'नैलकण्ठि'शब्दः सदाशिवस्य विशेषणं भवितुं नार्हति इति स्फुटं प्रतीयते। अतः प्रथमकारणं न युज्यते। एवञ्च मीमांसकमहोदयस्य सरणिमाश्रित्यैव सर्वाणि मतानि इति मन्यते। तत्र कमलाकरः नीलकण्ठस्य पुत्रः भवति चेत्विभक्त्यर्थप्रकाशस्यान्ते "गोलिङ्गोपपदः श्रीमान् रामचन्द्रतनूद्भवः" इतिग्रन्थः न संगच्छते। अथवा सदाशिवगुरुः कमलाकरो भिन्नः, विभक्त्यर्थप्रकाशकर्ता च भिन्नः इति वक्तव्यम्। परन्तु गोलिङ्गोपपदसाम्यं वर्तते। किञ्च विभक्त्यर्थप्रकाशकर्ता व्याख्यादर्शटिप्पण्याख्यभाष्यव्याख्यानमपि कृतवान् इत्यतः सदाशिवस्य "भाष्यविदां मणिं कमलाकरमासाद्य" [8] इति वचनमुपपद्यते।अतः विभक्त्यर्थप्रकाशकर्ता एव सदाशिवस्य गुरुः इति सिध्यति। ततश्च तस्य विशेषणं नैलकण्ठिः

---

[6] (२००१)।संस्कृत-वाङ्मयकाबृहद्इतिहास (पञ्चदशखण्ड)।उपाध्यायः, बलदेवः (प्रधानसम्पादकः); पाण्डेयः, गोपालदत्तः (सम्पा.)।पृ.- १५३।लखनऊ : उत्तरप्रदेशसंस्कृतसंस्थान।

[7] यद्यपिअत्रनीलकण्ठदीक्षितस्यपुत्रःइतिलिखितंवर्तते, तथापिअस्मिन्ग्रन्थेनीलकण्ठवाजपेयीएवनीलकण्ठदीक्षितनाम्नागृह्यते, यतोहिअस्मिन्एवग्रन्थेनीलकण्ठवाजपेयिनःदेशकालकृतयःनीलकण्ठदीक्षितनाम्नाप्रदत्ताःसन्ति।द्रष्टव्यम्– Encyclopedia of Indian Philosophy (Vol. - V), पृष्ठम्– ३७३

[8] "पितुरभ्यर्णमभ्यस्यभाष्यंभाष्यविदांमणिम्।/ कमलाकरमासाद्यव्याधत्तेदंसदाशिवः॥"– DC, BORI, मातृकाङ्कः– ५९

भवितुं नार्हति अपि तु स भिन्न एव जनः यस्मात् सदाशिवः अध्यगीष्ट। तेन सदाशिवः नीलकण्ठस्य पुत्रः इति बलदेवाचार्यादीनां व्याख्यानं चिन्त्यमेव। किञ्च कमलाकरभट्टः सदाशिवस्य भ्राता आसीदित्यत्रापि प्रमाणं नास्ति इति धेयम्।

अधुना प्रश्नो भवति कोऽयं नैलकण्ठिरिति। NCC इत्यादिग्रन्थेषु इदं नाम एव न लक्ष्यते। नैलकण्ठिशब्दात् नीलकण्ठस्यापत्यम् इति तथ्यमात्रं लभ्यते। NCC-ग्रन्थे नीलकण्ठाः बहवः सन्ति। तथापि तेषु द्वौ नीलकण्ठौ प्रसिद्धौ। तौ हि नीलकण्ठदीक्षितः नीलकण्ठवाजपेयी च। नीलकण्ठदीक्षितः १६३७ क्रैस्ताब्दे नीलकण्ठविजयं रचयामासेति स्वयमेवोक्तवान् –

अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुस्सहस्रेषु।
कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम्॥ (नीलकण्ठविजयः-१.१०) इति।

४७३८ कलिवर्षेषु अर्थात् १६३७ क्रैस्ताब्देषु अयं ग्रथितः। तदुक्तं रामचन्द्रमिश्रेण – “एतस्य ‘नीलकण्ठविजयचम्पू’नामकस्यकाव्यस्यग्रन्थान्तरस्यरचनाकालः१६३७ई. मन्यते”[9]इति।

अपरः भाष्यतत्त्वविवेकस्य रचयिता रामचन्द्रमहेन्द्रपौत्रः वरदेश्वरसुतः ज्ञानेन्द्रसरस्वतीशिष्यः नीलकण्ठवाजपेयी । युधिष्ठिरमीमांसकेन संस्कृतव्याकरणशास्त्रकाइतिहास इति ग्रन्थे तस्य कालः वैक्रमाब्दयोः १५७५-१६२५ (ई. १५१८-१५६८) इत्यनयोर्मध्ये[10] इति उदीरितम्।

तत्र सदाशिवगुरोः गोलिङ्गोपपदकमलाकरविरचितस्य विभक्त्यर्थप्रकाशस्य उत्तरपुष्पिकायामयं श्लोको लभ्यते–

शाके शशाङ्कधरशक्र१४११मिते नभस्य-
कृष्णाष्टमीशनिदिने शिव(...) समाप्तिम्।
निन्ये विभक्तिजमिदं कमलाकराख्यैः
संग्रंथितं लिपित अर्थमनन्तसूनुः॥

अस्मात् श्लोकाद् ज्ञायते यत् १४११ शकाब्दे अर्थात् १४८९ क्रैस्ताब्दे विभक्त्यर्थप्रकाशग्रन्थस्य समाप्तिर्जातेति। अतः सदाशिवः पञ्चदशशतकस्य उत्तरार्धे

[9]मिश्रः, रामचन्द्रः। (२ह्०१०)।संस्कृतसाहित्येतिहासः।पृ-७५।वाराणसी : चौखम्बाविद्याभवन।
[10] मीमांसकः, युधिष्ठिरः। (१९६३)।संस्कृतव्याकरण-शास्त्रकाइतिहास (प्रथमभाग)।पृ-३८२।अजमेर : भारतीयप्राच्यविद्याप्रतिष्ठान।

षोडशशतकस्य पूर्वार्धे वा स्यात्। यद्यपि सदाशिवकृतेःगूढार्थदीपिन्याःमातृकायाःपुष्पिकायाम्–

अङ्काष्टौतिथियुक्शाके प्लवङ्गे कार्त्तिके सिते।
चतुर्दशमिने(?) दस्ने(?) लिखितं भाष्यटिप्पणम्॥[11] इति लिखितं वर्तते।

अङ्कः=९, अष्टौ=८, तिथिः=१५इति। तत्र अङ्कस्यवामागतिरिति न्यायेन१५८९शकाब्दः अर्थात् १६६७ख्रीष्टाब्दः इतिलभ्यते। गूढार्थदीपिन्याः संस्कृतमहाविद्यालयस्थमातृकायाः पुष्पिकायां पुनः– "शकेरसेन्दुबाणाग्निमितआश्विने"[12] इति पाठः। ततश्चरसः=६, इन्दुः=१, बाणः=५, अग्निः=३ इति लभ्यते, ततश्च अङ्कस्य वामागतिरिति न्यायेन ३५१६ शकाब्दः इति लभ्यते, तस्य असम्भवात्युग्मस्य वामागतिः क्रियते, ततश्च १६३५ शकाब्दः अर्थात् १७१३ख्रीष्टाब्दः इति लभ्यते। तथापि तौ कालौ प्रतिलिपीकरणस्य इति अनुमीयते इति न दोषः।

एवं सप्तदशशतकस्य पूर्वार्धे उत्पन्नस्य नीलकण्ठदीक्षितस्य पुत्रो वा शिष्यो वा पञ्चदशशतकोत्पन्नकमलाकरभट्टस्य शिष्यस्य सदाशिवस्य गुरुः भवितुं नार्हति । अतः नीलकण्ठपदेन नीलकण्ठदीक्षितस्य न ग्रहणमिति सिद्धम्। परं षोडशशतकस्य पूर्वार्धे उत्पन्नस्य नीलकण्ठवाजपेयिनः पुत्रः सदाशिवस्य गुरुरिति कथनं यद्यपि पूर्णतया न युज्यते तथापि वाजपेयिनः शिष्यः सदाशिवस्य गुरुरासीद् इति तु अवश्यं वक्तुं शक्यते। नीलकण्ठः वाजपेयी च अम्बलपुजाप्रदेशस्थस्य पुराटं-तिरुनाळ्-देवनारायणस्य आस्थाने आसीत् इति ऐतिह्यविदः[13]। स प्रदेशः केरले अस्ति इत्यतः नीलकण्ठः केरलनिवासी आसीद् इति सिद्ध्यति। ततः तच्छिष्यः अपि केरलनिवासी आसीद् इति अनुमीयते। एवं केरलनिवासिनः गुरोः नैलकण्ठेः सदाशिवः अधीतवान्। कमलाकराद् अपि सदाशिवः केरले एव अधीतवान् इति कमलाकरोऽपि केरलनिवासी इति अनुमीयते। परन्तु इदम् अनुमानमात्रम्। नीलकण्ठपदेन नीलकण्ठवाजपेयिन एव ग्रहणमित्यत्र दृढं प्रमाणं नास्ति, वाजपेयिनः ग्रहणं भवति चेदपि तस्य शिष्यात् केरले एव अधीतवान् इत्यपि दृढं वक्तुं न पार्यते। यतोहि शिष्यः तद्देशे एव स्यादिति दृढं वक्तुमयोग्यम्। किञ्च अस्माद् केरले अधीतवान् चेद् कमलाकराद् अपि केरले एव अधीतवान् इति मतमपि शङ्काकुलम्।

---

[11]DC, BORI, मातृकाङ्कः– ५९
[12]DC, Skt. Col., मातृकाङ्कः– २६
[13]"Nilakantha was patronized by PuratamTirumal Devanarayana of Ambalappuzha"– Encyclopaedia of Indian Philosophy,Vol.- V, p.- 373

अयं महाराष्ट्रदेशीयः आसीद् इत्यपि अनुमातुं शक्यते। कमलाकरभट्टस्य कमलाकरदीक्षितः इति नामान्तरम् इति सदाशिवग्रन्थात् स्पष्टम्। दीक्षितोपाह्वाः महाराष्ट्रवास्तव्याः भवन्ति, यथा भट्टोजीदीक्षितः तथा चायमिति वक्तुं शक्यते। परन्तु उपाधिसाम्यमात्रं दृढप्रमाणं न भवति, अप्पयदीक्षितादौ व्यभिचारदर्शनात् इति पुनः क्लेशः। 'उत्पातेन ज्ञापिते च' (म.भा.- २.३.१३ वा.- ३) इति वार्तिकस्य उदाहरणरूपेण कमलाकरभट्टः विभक्त्यर्थप्रकाशे भाष्यवचनमुद्धृतवान्–

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्॥ (म.भा.- २.३.१३)इति

"पीता वर्षाय विज्ञेया"इत्यस्य स्थाने "कृष्णा सर्वविनाशाय"[14] इति मुद्रितभाष्ये पठ्यते। मुद्रितभाष्यस्य पाठः वाराणसीस्थपुस्तकेषु उपलभ्यते। परन्तु प्रकृतमातृकायां तथापाठादर्शनात् अयं कमलाकरभट्टः वाराणस्यां नासीत् इति अनुमातुं शक्यते। एतेन वाराणसी समग्रदेशस्यापि विदुषां निवासस्थानमासीद् इति कमलाकरभट्टः वाराणसेयो भवितुमर्हति इति कल्पनापि वार्यते।

तथापि एतावतः प्रकरणात् कमलाकरः दाक्षिणात्यः प्रतीच्यः वा स्यादिति मन्यते।

४. ग्रन्थकर्तुः कालः

कमलाकरविरचितस्य विभक्त्यर्थप्रकाशस्य वृन्दावनशोधसंस्थायाम् उपलब्धायाः मातृकायाः उत्तरपुष्पिकायामयं श्लोको लभ्यते–

शाकेशशाङ्कधरशक्र१४११मितेनभस्य-
कृष्णाष्टमीशनिदिनेशिव(...) समाप्तिम्।
निन्येविभक्तिजमिदंकमलाकराख्यैः
संग्रंथितं लिपितअर्थमनन्तसूनुः॥

अस्माद्श्लोकाद्ज्ञायते यत्शशाङ्कधरशक्रमिते शके विभक्त्यर्थप्रकाशाख्यस्य ग्रन्थस्य समाप्तिरभूत्। शशाङ्कधरः इत्यनेन रुद्रस्य ग्रहणं कार्यम्, एकादशरुद्रस्य प्रसिद्धत्वात्शशाङ्कधरः एकादशसंख्यायां वर्तते इति लभ्यते।शक्रः चतुर्दशसंख्यायां वर्तते इति वाचस्पत्याद्ज्ञायते। एवञ्च शशाङ्कधरः = ११, शक्रः = १४, ततः अङ्कानां वामा गतिरिति न्यायेन युग्मस्य वामाः गतिः क्रियते चेत्१४११इति लभ्यते, लेखकेनापि १४११ इत्युल्लिखितम्। एवञ्च १४११ शकाब्दे अर्थात्१४८९ क्रैस्ताब्दे ग्रन्थमिममररचत्कमलाकरः।

[14]पतञ्जलिः। (१९८८)।व्याकरणमहाभाष्यम् [प्रदीपोद्द्योतोपेतम्] (द्वितीयंखण्डम्)।शास्त्री, भार्गवः (सम्पा.)।पृ.- ४९८।देहली : चौखम्बासंस्कृतप्रतिष्ठान।

एवञ्च पञ्चदशशतकस्य उत्तरार्धे कमलाकरः आसीत् इति सुतरां लभ्यते।एतेन Encyclopedia of Indian Philosophy इतिग्रन्थे प्रतिपादितं भट्टकमलाकरस्य सप्तदशशतकपूर्वार्धभावित्वं खण्डितं भवति इति बोध्यम्।

५. कमलाकरस्य कृतयः

NCC, Encyclopaedia of Indian Philosophy इत्यादिनानाग्रन्थमन्थनेन प्रतीयते यत्कमलाकरस्य त्रयो ग्रन्था आसन् इति। ते हि – विभक्त्यर्थप्रकाशः, व्याख्यादर्शटिप्पणी, प्रक्रियाकौमुदीव्याख्या चेति।विभक्त्यर्थप्रकाशः पाणिनीयसूत्रक्रमाननुसारी स्वतन्त्रग्रन्थः। ग्रन्थोऽयमन्वर्थनामधेयः इति हेतोः नाम्नैव ज्ञायते यत् अस्मिन् ग्रन्थे विभक्तीनामर्थाः प्रतिपादिताः सन्तीति। तत्र यद्यपि 'विभक्तिश्च' (अष्टा.-१.४.१०४) इति सूत्रेण एकविंशतेः सुपां अष्टादशानां तिङां च विभक्तिसंज्ञा विहितेति सुपां तिङां च अर्था इह वर्णिता इति शङ्का स्यात् तथापि "प्रथमादिविभक्तीनां कुर्वेऽर्थानां प्रकाशनम्" इति प्रतिज्ञावाक्येन सा शङ्का दूरमेति । ग्रन्थोऽयं कस्यचिद् वृत्तिग्रन्थस्य व्याख्याभूतो नास्ति, अपि तु साक्षात् पाणिनीयसूत्राणां व्याख्यानपरः। अतोऽयं वृत्तिग्रन्थः इति वक्तुं युज्यते। ग्रन्थेऽस्मिन् प्रथमाविभक्तिः, द्वितीयाविभक्तिः इत्येवंक्रमेण सप्त विभक्तयो वर्णिताः सन्ति। विभक्त्यर्थप्रतिपादकेऽस्मिन् ग्रन्थे विभक्तरर्थप्रतिपादकानि विभक्तिविधायकानि सूत्राणि आदौ समुल्लिख्य तदनु कारकसूत्राणि समुपन्यस्य व्याख्यातानि। सांप्रतं ग्रन्थस्यास्य मातृकाद्वयमुपलभ्यते। एका मातृका भण्डारकर-ओरियेण्टाल-रिसर्च-इन्स्टिट्युट् ग्रन्थालये लभ्यते। अस्यां मातृकायां पत्राणि मध्ये मध्ये लुप्तानि सन्ति। पञ्चमीप्रकरणस्यान्तम् आरभ्य सप्तमीप्रकरणस्य मध्यमं यावत् पत्राणि नैव सन्ति। अर्थात् षष्ठीप्रकरणं पूर्णरूपेण नास्ति। भाषा अपि बहुधा दुष्टा अस्ति। अपरा मातृका वृन्दावनशोधसंस्थायामुपलभ्यते। इयं मातृका पूर्णा विद्यते। अत्र भाषायां दोषाः प्रायेण न सन्ति, केवलं क्वचित् मात्रादिकृतदोषा एव दृश्यन्ते। अयं ग्रन्थः एतावता अप्रकाशितो विद्यते।

व्याख्यादर्शटिप्पणीइत्याख्यः ग्रन्थोऽपि अनेन विरचितः इतिपूर्वमेवोदितम्। व्याख्यादर्शटिप्पण्याः पुष्पिकायां स्पष्टं लिखितं वर्तते– "श्रीगोलिङ्गोपपदकमलाकरभट्टकृतव्याख्यादर्शटिप्पण्यां द्वितीयमाह्निकं समाप्तम्" इति। तत्र ईश्वरानन्दविरचितस्य बृहद्विवरणव्याख्यानस्य व्याख्यानार्थं प्रायेण कमलाकरभट्टेन विरचितेयं व्याख्यादर्शटिप्पणी। परन्तु इयं टिप्पणी द्वितीयाह्निकस्यैव लभ्यते। अन्येषु

आह्निकेषु इयं टिप्पणी लिखिता वर्तते न वा इत्यत्र संशयः जायते। यतो हि ग्रन्थस्यादौ ग्रन्थकृता मङ्गलश्लोकेन मङ्गलवाक्येन वा मङ्गलाचरणं न विहितम्। किञ्च ग्रन्थस्यान्ते पुष्पिकायामेवं पाठः लक्ष्यते– "इति श्रीगोलिङ्गोपपदकमलाकरभट्टकृतव्याख्यादर्शटिप्पण्यां द्वितीयमाह्निकं समाप्तम्" इति।द्वितीयमाह्निकं समाप्तम्इत्युक्तम्। ग्रन्थःसमाप्तः इत्यादिकं किमपि नोक्तवान्। अतः अग्रेऽपि इयं टिप्पणी आसीत् इति कल्पयितुं शक्यते। तथापि अधुना द्वितीयाह्निकस्यैव टिप्पणीलभ्यते। व्याख्यादर्शटिप्पण्याः एका एव मातृका एसियाटिक्-सोसाइटि-ग्रन्थागारे लभ्यते इति NCC (३.१६५) ग्रन्थाद्ज्ञायते। M.Phil. इत्युपाधये रामकृष्णमिशनविवेकानन्दविश्वविद्यालये अस्याः टिप्पण्याः सम्पादनं विहितं वर्तते।

रामचन्द्रविरचितस्य प्रक्रियाकौमुद्याःउपरिकाचनटीकाम् अपि अयं लिखितवान् इति Encyclopedia of Indian Philosophy इतिग्रन्थाद्विज्ञायते। अस्य प्रक्रियाकौमुदीव्याख्याग्रन्थस्य एका एव मातृका अधुना उपलभ्यते। साचमातृकाबरोदा-ओरियेण्टाल-इन्स्टिट्युट्ग्रन्थालयेविलसति। परन्तु सा मातृका असंपूर्णा विद्यते। तत्र आद्यशतपत्राणि न सन्ति। १०१ संख्याकपत्रतः ५३१ संख्याकपत्रपर्यन्तं पत्राणि सन्ति। मध्ये बहूनि पत्राणि लुप्तानि अपि सन्ति। किञ्च मातृकाया दक्षिणदिशः उपरिभागः नष्टप्रायो वर्तते। बरोदामातृकालयस्य विवरणसूच्यां कमलाकरः एव ग्रन्थकारत्वेन निर्दिष्टः वर्तते।तस्मादेवNCC (३.१६०) ग्रन्थेकेनचित्कमलाकरेण इयं टीका रचिता इति निर्दिष्टं वर्तते।कमलाकरभट्टस्यवर्णनकाले च अस्य ग्रन्थस्य उल्लेखोन दृश्यते। अतःअयं ग्रन्थःअस्य नवा इति संशयो वर्तते। Encyclopedia of Indian Philosophy इति ग्रन्थस्य कर्ता अपि अस्मिन्विषये सन्दिहानो वर्तते, तेनापिकोष्ठके प्रश्नचिह्नं स्थापितम् अस्ति। तथापि अयं वैयाकरणः इति कृत्वा भवितुमर्हतिअनेनैव रचितं स्यादिति।

६. उपसंहृतिः

कमलाकरभट्टस्य विभक्त्यर्थप्रकाशः, व्याख्यादर्शटिप्पणी इति ग्रन्थद्वयं दृष्टं वर्तते। अयं कैयटं विशेषेण हरदत्तं चानुसरति। क्वचित् हरदत्तमनुकरोतीत्यपि वक्तुं युज्यते। यथा– 'वसेरश्यर्थस्यप्रतिषेधः' (मा.भा.- १.४.४८वा.- १) इत्यत्र हरदत्तग्रन्थः–"अर्थशब्दो निवृत्तिवचनः, व्यधिकरणे षष्ठ्यौ, अश्यर्थस्य यो वाचकस्तस्येत्यर्थः। भोजननिवृत्तिवाचिन इति यावत्। यद्वा– शीङोऽर्थः श्यर्थः न श्यर्थस्य अस्थानार्थस्येत्यर्थः। स्थानेऽपि हि शीङ् वर्तते– जलाशयमिति। तेन ग्रामे तिष्ठतीत्यत्रार्थे ग्राममुपवसतीति भवति। अस्थानार्थत्वे तु ग्राम उपवसतीति, स तर्हि प्रतिषेधो वक्तव्यः? न वक्तव्यः, कथम्? नात्रोपपूर्वस्य वसेः

ग्रामोऽधिकरणम्, किं तर्हि? अनुपसर्गस्य – ग्रामे वसन् त्रिरात्रमुपवसति। एतदुक्तं भवति– विशिष्टाधारावस्थिततत्वेन निश्चिते देवदत्ते भोजननिवृत्तिविशिष्टकालं प्रतिपादयितुमिदं प्रयुज्यत – ग्राम उपवसतीति, तत्रान्तरङ्गत्वात् प्रतीयमानवसिक्रियापेक्षो ग्रामस्याधिकरणभावः। उपवसनं तु स्वरूपेणैव कालमपेक्षत इति कालेनान्तरङ्गः संबन्धः, ग्रामादिना तु बहिरङ्ग इत्यप्रयुक्तमपि त्रिरात्रादिकं कर्म भवति"[15] इति। तत्र विभक्त्यर्थप्रकाशग्रन्थः–"अर्थशब्दोनिवृत्तिवचनः।व्यधिकरणे षष्ठ्यौ अश्नात्यर्थस्य निवृत्तेर्वाचकस्य वसतेराधारः कर्मनेत्यर्थः। यद्वा शीङोऽर्थःश्यर्थः स्थानम्। जलाशय इति यथा समानाधिकरणषष्ठ्यौ। अस्थानार्थस्येत्यर्थः। ग्रामे उपवसति। वस्तुतस्तु विशिष्टाधारावस्थिततत्वेन निश्चिते देवदत्ते नियतकालां भोजननिवृत्तिं प्रतिपादयितुमिदं प्रयुज्यते। तत्रग्रामस्यान्तरङ्गः केवलेन वसिना संबन्धः। तत्राधारत्वमेव। ग्रामस्य उपवसनं तु स्वरूपेणैव कालमपेक्षते तस्य भवत्येवकर्मत्वम्। तथाचायमर्थः–ग्रामे ह्यसौवसन्द्विरात्रं त्रिरात्रं वा उपवसतीति" इति। सति विरोधे बहुत्र हरदत्तं खण्डितवान् इत्यपि अवलोक्यते। यथा अइउण् इति माहेश्वरसूत्रभाष्यव्याख्यायां व्याख्यादर्शटिप्पण्याम्– "अत्र हरदत्तमिश्रास्तुयदुदीचामातः स्थान इति ज्ञापकतयोदभावितदयुक्तम्" इति। दीर्घपूर्वपक्षरचनायामस्य नैपुण्यमासीदिति ग्रन्थावलोकनेन ज्ञायते। सूत्राणां पदच्छेदे, सूत्रस्थपदानामर्थान्तरप्रदर्शने, न्यासान्तरकल्पने च अस्य कुशलता आसीदित्यपि व्याख्यादर्शटिप्पण्यां स्पष्टम्। सूत्रव्याख्यानेऽपि मौलिकता दृश्यते। यथा स्वं रूपं शब्दस्याशब्दसंज्ञा (अष्टा.-१.१.६८) इतिसूत्रे शब्दस्य इति संज्ञादलं, स्वंरूपम् इति संज्ञिदलम् इति सामान्यतया व्याख्यायते, परन्तुव्याख्यादर्शग्रन्थे रूपमिति संज्ञादलं, शब्दस्य स्वम् इति संज्ञिदलम् इत्याश्रित्य तस्य सूत्रस्य व्याख्यानं दृश्यते। किञ्च महाभाष्यम् अधिकृत्य स्वयं टिप्पणीं रचितवान्, तच्छिष्यः अपि व्याख्यानं लिलेख इत्यतः अयं महाभाष्ये कृतभूरिपरिश्रमः इत्यपि ज्ञायते। विभक्त्यर्थप्रकाशस्य गतिबुद्धिसूत्रे माषेष्वश्वं बध्नातीत्यत्र माषानामिव इत्यस्य स्थाने माखेष्वश्वं बध्नातीत्यत्र माखानामिव इति उभयमातृकायां पाठदर्शनाद् ग्रन्थकारस्यैवायं पाठः इति निश्चित्य अयं यजुर्वेदाध्यायी आसीद् इति मन्यते। एवं महाभाष्ये कृतभूरिपरिश्रमस्यास्य ग्रन्थानां प्रकाशनेन नूतना विचाराः विदुषां दृष्टिगोचरीभविष्यन्ति इति दृढं वक्तुं शक्यते इत्यलमत्यक्षरक्षरणेन॥

---

[15]वामनः; जयादित्यः। (१९८६)।काशिका [न्यास-पदमञ्जरी-भावबोधिनीसहिता] (द्वितीयोभागः)।त्रिपाठी, जयशङ्करः; मालवीयः, सुधाकरः (सम्पा.)।पृ.- १५८।वाराणसी : ताराबुकएजेन्सी।

उपयुक्तमातृकाः–

1. Bhaṭṭa, Kamalākara. Kāvyaprakāśavyākhyā. UpennMs.Coll 390, item 525.
2. Bhaṭṭa, Kamalākara. Vibhaktyarthaprakāśa. BORI. 336 of 1895-1902. BORI. D. II. i. 394.
3. Bhaṭṭa, Kamalākara. Vibhaktyarthaprakāśa. VRI. IV. 12594. Extr. p. 550.
4. Bhaṭṭa, Kamalākara. Vyākhyādarśaṭippaṇī. RASB. VI. 4223-A.

उपयुक्तग्रन्थाः–

1. (1904). The Descriptive Catalogue of Sanskrit College (Vol.- VIII). SastriHrishikesa; Gui, Siva Chandra (ed.). Calcutta : Sanskrit College.
2. (1938). Descriptive Catalogue of the Government Collection of Manuscripts (Vol.- II, Part – I). Belvalkar, Krishna (Comp.). Poona :Bhandarkar Oriental Research Institute.
3. (1966). New CatalogusCatalogorum [An Alphabetical Register of Sanskrit and Allied Works and Authors] (Vol. - II). Raghavan, V. (ed.). Madras : University of Madras.
4. (1967). New CatalogusCatalogorum [An Alphabetical Register of Sanskrit and Allied Works and Authors] (Vol. - III). Raghavan, V. (ed.). Madras : University of Madras.
5. (2006). A Descriptive Catalogue of Sanskrit Manuscripts in the Government Collection (Vol. VI). Shastri, Haraprasad (ed.). Kolkata : The Asiatic Society.
6. (2008). Encyclopedia of Indian Philosophies (Vol.- V). Coward, G. Harold; Raja, K. Kunjunni (ed.). Delhi :MotilalBanarasidass Publishers Private Limited.
7. (२००१)।संस्कृत-वाङ्मयकाबृहद्इतिहास (पञ्चदशखण्ड)।उपाध्यायः, बलदेवः (प्रधानसम्पादकः); पाण्डेयः, गोपालदत्तः (सम्पा.)।लखनऊ : उत्तरप्रदेशसंस्कृतसंस्थान।
8. पतञ्जलिः। (१९८७)।व्याकरणमहाभाष्यम् [प्रदीपोद्द्योतोपेतम्] (प्रथमःखण्डः)।शास्त्री, भार्गवः (सम्पा.)।देहली : चौखम्बासंस्कृतप्रतिष्ठान।
9. पतञ्जलिः। (१९८८)।व्याकरणमहाभाष्यम् [प्रदीपोद्द्योतोपेतम्] (द्वितीयंखण्डम्)।शास्त्री, भार्गवः (सम्पा.)।देहली : चौखम्बासंस्कृतप्रतिष्ठान।
10. पाणिनिः। (२०११)।अष्टाध्यायी।पाण्डेयः, गोपालदत्तः (सम्पा.)।वाराणसी : चौखम्बासुरभारतीप्रकाशन।

11. मिश्रः, रामचन्द्रः। (२०१०)।संस्कृतसाहित्येतिहासः।वाराणसी : चौखम्बाविद्याभवन।
12. मीमांसकः, युधिष्ठिरः। (१९६३)।संस्कृतव्याकरण-शास्त्रकाइतिहास (प्रथमभाग)।अजमेर : भारतीयप्राच्यविद्याप्रतिष्ठान।
13. वामनः; जयादित्यः। (१९८६)।काशिका [न्यास-पदमञ्जरी-भावबोधिनीसहिता] (द्वितीयोभागः)।त्रिपाठी, जयशङ्करः; मालवीयः, सुधाकरः (सम्पा.)।वाराणसी : ताराबुकएजेन्सी।

उपयुक्तशोधबन्धः–

1. भद्रः, श्रीमन्तः। (२०१७)। कमलाकरभट्टविरचिताया व्याख्यादर्शटिप्पण्याः सम्पादनमध्ययनञ्च। बेलुडमठः : रामकृष्णमिशन्विवेकानन्दविश्वविद्यालयः।

लेखकपरिचयः

श्रीमन्तभद्रः
(Srimanta Bhadra)
सहायकाध्यापकः,
संस्कृतविभागः,
राजानरेन्द्रलालखानमहिलामहाविद्यालयः,
मेदिनीपुरम्, पश्चिममेदिनीपुरम्, पश्चिमवङ्गः,
इ-मेलसंकेतः–srimantabhadra@gmail.com

***

श्रीललितासहस्रनामस्तोत्रे श्रीमातुरादिनाममाहात्म्यम्

- अभिषेक-मुखार्जी

शोधसारः

"मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।"[१] इत्येतान्युपनिषद्वाक्यान्यस्माकमैतिह्यरूपेणानुवर्तन्ते संस्कृतौ। अत्र प्रथमं वन्दनन्तु मात्र एवास्ति। भारतीयधर्मसंस्कृतौ सुदूरकालादारभ्य प्राचीनतैका वरिवर्ति । प्रत्येकं जीवने प्राचीनताया निदर्शनरूपेण स्वस्य माता हि वर्तत इत्यनस्वीकार्यम्। जन्मनः प्राग्लग्नाद् मात्रैव स आश्रितः पुष्टश्च। अतो मातरं विना अन्यः कोऽपि तस्य प्राचीनताया दृष्टान्तो भवितुं नार्हति। भारतीयपरम्परायां मातुस्स्थानं सर्वकालेषु सातिशयं समुन्नतम्। भासमहाकवेः सुप्रसिद्धैका वाक् "माता किल मनुष्याणां देवतानां च दैवतम्" इति तस्या गौरवमेवावहति; देवतानामपि माता श्रेष्ठेति सूचयति।

इदानीन्तनः प्रबन्धोऽयं जगन्मातृश्रीललितामातुः प्रथमं नाम "श्रीमाता" इत्यवलम्ब्य यथामति व्याख्यातोऽस्ति

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता॥[२]

कुञ्ची-शब्दाः - श्रीमाता, सर्वसिद्धिदात्री, दुर्गा, श्रीललितादेवी।

श्रोत्रस्य श्रोत्रं मनसो मनो यद्
वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति॥[३]

वाणी यन्न वाचयति किन्तु येन वाणी स्वयं वक्ति तदेव साधकः ब्रह्मणा स्वीकरोति। सन्दर्भेऽस्मिन्नाख्यायिकैका केनोपनिषदन्ते समुपलभ्यते। एकदा देवासुरसंग्रामे देवेभ्यो विजयस्समागतः; एतस्माद्विजयात्तेऽभिमन्यन्ते वयं स्वयं ह्यसुरान् पराजयामह इति। तेषामहंकारं विनाशयितुं स्वयं ब्रह्म यक्षरूपेण तत्र समागतम्। देवा अग्निं प्रथमं प्रेषितवन्तः विज्ञातुं कोऽयं यक्ष इति। यक्षेण पृष्ट अग्निः स्वयं महिमानं व्यनक्ति स हि जातवेदः अग्निः, सम्पूर्णं जगत् प्रज्वालयितुमपि प्रभवति। अग्निदेवस्य सम्मुखे तृणमेकं निर्दिश्य स यक्षो दग्धुमेतद् वक्ति, असमर्थो भूत्वाग्नौ प्रत्यागते सति देवाः पुनो वायुं प्रेरितवन्तः, सोऽपि तथैवागते ते देवा इन्द्रायानुरुन्धते, इन्द्रः यक्षसमीपे आगमनात्पूर्वमेव यक्षोऽन्तर्हितो जातः, पुनस्तस्मिन् स्थान एका सुन्दरी या हेमवती उमा आविर्भूता। इन्द्रेण पृष्टा सोवाच स यक्षो साक्षाद् ब्रह्म आसीत्। अतः स्वयमिन्द्रोऽपि ब्रह्मप्राप्त असमर्थो बभूव। इत्थं भगवत्यामुमायामुक्तायाम् इन्द्रः "स ब्रह्म आसीत्" इति परोक्षतया जज्ञे। अतः ब्रह्मज्ञानाय एक

एव उपायो भवति भगवती उमा। सोमा हि श्रीललितामाता, श्रीमातुस्सहस्रनामसु उमेत्येकम्।

त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता॥[४] इति

वेदान्तिनस्तथा ब्रह्मवादिनः प्रायशो देवदेवीविरोधिनस्तथा भक्त अप्यनुरागवर्जिता भवन्ति। निराकारब्रह्मचिन्तनमेव तेषां साधना। किन्तु प्रायशः सर्वेषां कृते निराकारे मनोनिवेशनं दुस्साध्यम्। अतस्तेषां कृते साकारे मनसस्स्थापना ह्यपेक्षाकृता सरलैव। यद्यपि सर्वेषां मुमुक्षूणां लक्ष्यन्तु "तत्प्राप्तिः एव। अत्र तस्य प्राप्तिरिति तत्प्राप्तिर्यथा भवति तथैव तस्याः प्राप्तिरिति विग्रहेऽपि तत्प्राप्तिरिति भवितुमर्हति। अतः विग्रहा यद्वा भवन्तु सारभूतपदन्त्वेकमेव "तत्प्राप्तिः" इति। शिवमहिम्नस्तोत्रे तदेवास्ति -

"रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥[५] इति।

श्रीमद्भगवद्गीतायामपि भगवतो वाणी

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥[६] इति।

अर्थात् निराकारसाधना नैव तथा सरला; देहाभिमानिनां कृते भक्त्या निजेष्टसाधना हि श्रेयसी। यतो हि भगवदुक्तिः

भक्त्या त्वनन्यया शक्योऽहमेवं विधोऽर्जुन।
ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप॥[७] इति

भगवान् वासुदेवः तथा श्रीललितामातोभौ परस्परमभिन्नौ, पद्मपुराणान्तर्गते पातालखण्डे अस्य प्रामाणिकता दृश्यते, नारदं प्रति भगवदुक्तिः यथा

अहं च **ललिता** देवी पुंरूपा कृष्णविग्रहा।
आवयोरन्तरं नास्ति सत्यं सत्यं हि नारद॥[८] इति

"लल् विलासे" भ्वादिगणीयसेड्धातुरयम्। लल्यते ईप्स्यते इति ललितः ततष्टापि ललितेति निष्पन्ना।

श्रीमातुः सुप्रसिद्धं नाम भवति श्रीललिताम्बा। किन्तु तन्नाम सहस्रनाम्नामन्तेऽन्तिमश्लोके विद्यते। नामेदं श्रीमातुः सहस्रतमं नाम। यथा

श्रीशिवा शिवशक्त्यैक्यरूपिणी **ललिताम्बिका**।
एव श्रीललितादेव्या नाम्नां साहस्रकं जगुः॥[९] इति

अस्य विवक्षा हि पूर्ववर्तिनः नवशताधिकनवनवतिनामानि श्रीमातुः विशेषणरूपेण विलसन्ति।

केषाञ्चिदभिमतमस्ति श्रीमाता तथा ललिताम्बेति द्वयोर्नाम्नोर्यानि नवशताधिकाष्टनवति नामानि सन्ति तान्येव एतयो**रध्याहारो**(अस्पष्टार्थस्य शब्दान्तरेण स्पष्टीकरणम्) भवन्तीति। जगति शब्देषु कोमलतायाः प्रतीको भवति **मातृ** इति शब्दविशेषः। जगन्मातुः ललिताम्बाया आदिविशेषणमस्ति **श्रीमाते**ति। गर्भावस्थायामर्भकाय श्वासप्रदात्री तथा धात्री जन्मनः परञ्च पोषयित्री भवति माता एव। ओमित्यक्षरत्रयात्मकश्शब्दः। कथितमस्ति-

अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः॥[१०]

मकारेण सृष्टिकर्ता ब्रह्मा ज्ञेयः। मातृशब्दस्य **म**कारेण सृष्टितत्त्वमेव ज्ञेयमत्रापि। **म**कारेण साकम् **आ**कारः सृष्टेः निरन्तरतां तथा अभिविधिं[११] सूचयति, । अमरकोषे अस्ति "आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे" इति। अर्थात् सृष्टिचक्रं सदा धावमानमिति सूच्यते। यतो हि जन्मनः परं स्थितितत्त्वानुसारेण विष्णुणा जीवः पुष्टो भवति, लयतत्त्वेन शिवकृता लयः निष्पादितो भवति। जीवात्मनः पुनर्जन्म मकारेण सूचितम्। अनेनैव संसारे जन्ममरणचक्रमावर्त्तितं भवति। मातृशब्दस्थः तृकारस्तारिकाबोधयिता भवति। जन्मनः परं झटिति मरणात् त्राणं तृकारेणैव सूच्यते। अतः अर्भकं जनयित्वा तञ्च रक्षणं या करोति सैव **मातृपदवाच्या**। **मातृ** इति अर्थवदधातुरप्रत्ययः प्रातिपदिकम्(१/२/४५) इति प्रातिपदिकसंज्ञायां ङ्याप्प्रातिपदिकात्(४/१/१), प्रत्ययः(३/१/१), परश्च(३/१/२) चेति सूत्रत्रयसहयोगेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसि भ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्(४/१/२) इति सोः प्राप्तौ सुपः(१/४/१०३), द्व्येकयोर्द्विवचनैकवचने(१/४/२२) चेति सूत्रद्वयेन तस्यैकत्वविवक्षायामेकवचने सोः उपदेशेऽजनुनासिक इत्(९/३/२) इति उकारलोपे ऋदुशनस्पुरदंसोऽनेहसां च(७/१/९४) इति ऋकारस्य अनङादेशे **मातन् स्** इत्यवस्थायाम् अप्-तृन्-तृज्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-णोतृ-प्रशास्तॄणाम्(६/४/११) इत्यनेन उपधायाः दीर्घे च सति **मातान् स्** इति जाते संयोगान्तस्य लोपः(४/२/२३) इति अन्त्यसकारस्य लोपे ततश्च नलोपः प्रातिपदिकान्तस्य(८/२/७) इति नकारलोपे **माते**ति पदं निष्पन्नम्। इतोऽपि जननीवाचकोऽन्यः कश्चिद् **माता**शब्दोऽस्ति। मान्यते पूज्यते इति **माता**। मान् पूजायां+तन् ततष्टापि निपातनात् साधुः। "विश्वेश्वरीं **विश्वमातां** चण्डिकां प्रणमाम्यहम्" इति शिवरहस्ये दुर्गास्तवदर्शनात्।

माधातोः लुटि प्रथमपुरुषैकवचने माता इति रूपमपि भवति। पाणिनीयधातुपाठे त्रिषु गणेषु परिमाणवाचकस्य माधातोः स्थितिर्लक्ष्यते यथा

१. अदादिगणीयः "मा माने" इति धातोः लुटि प्रथमपुरुषैकवचने माता इति;
२. "माङ् माने शब्दे च" इति जुहत्यादिगगणीयधातोः लुटि प्रथमपुरुषैकवचने माता इति;
३. दिवादिगणीय "माङ् माने" इति धातोः लुटि प्रथमपुरुषैकवचने माता इति रूपाणि च भवन्ति।

श्रिञ् सेवायामिति भ्वादिगणीय उभयपदिधातुरयम्। अस्य रूपाणि यथा श्रयति/श्रयते इति। अन्येभ्योऽपि दृश्यते(३/२/१७८) इति सूत्रेण क्विपः विधानावसरे श्रि+क्विबित्यवस्थायां सूत्रान्तर्गतवार्त्तिकेन क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च(वा० २१४७-४८) इत्यनेन दीर्घे **श्री** इति रूपं जातम्। **श्रयति शिवं सा श्रीः**, अथवा **श्रीयते सर्वैः सा देवी इति श्रीः** चेत्येवं विग्रहौ भवितुमर्हतः। **लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया** इत्यमरकोषः।

देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।
सिद्धं सिद्धाधिकाराञ्च श्रीपूर्वं समुदीरयेत्॥

इत्युक्ते देवादीनां नामोच्चारणायोपाधिभेदे च इति वाचस्पतिः।

श्रीः अस्यार्थः **मेदिनीकोषे** प्रतिपादितः यथा **विभूतिः** मतिश्चेति, अधिकारः प्रभा कीर्तिश्चेति **धरण्याम्**, तथा वृद्धि**र्सिद्धि**श्चेति **शब्दरत्नावल्याम्**। एतेषामर्थानां सहयोगेन यथामति श्रीमातेत्यस्यार्थं प्रदर्शयितुं यतिष्ये।

श्रीमाता इत्यत्र त्रयो विग्रहा भवितुमर्हन्ति। यथा

१. **श्रीप्रदायिका माता** इति विग्रहे **शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानमि**ति वार्त्तिकेन शाकपार्थिवादिवत् समासे श्रीमातेति रूपमत्र । शब्दरत्नावलीस्थस्य श्रियः सिद्ध्यर्थस्य सहायको भवति रुद्रयामलस्थः अयं श्लोकः

"यत्र भोगस्तत्र मोक्षो द्वयं कुत्र न सिद्ध्यति।
मम श्रीपादुकाम्भोजे सेवको मोक्षभोगगः॥" इति

श्रीमाता रसमयी एव नैव च कृशमयीति स्पष्टीकर्तुं पुनरुक्तेरावश्यकतैव नास्ति। तस्मिन्नेव सन्दर्भे विदुषां विश्रुतप्रवादो यथा

यत्रास्ति भोगो न च तत्र मोक्षो यत्रास्ति मोक्षो न व तत्र भोगः।
श्रीसुन्दरीसाधकपुङ्गवानां भोगश्च मोक्षश्च करस्थ एव॥ इति

श्रीललितामातैव त्रिपुरसुन्दरी तथा च **सर्वसिद्धिदात्री**। स्तोत्रेऽस्ति **"सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी"**[१२]इति। श्रीब्रह्मपुराणे श्रीसिद्धलक्ष्मीस्तोत्रस्यान्तिमवाक्यं भवति **"सर्वपापहरा लक्ष्मीः सर्वसिद्धिप्रदायिनी"** इति।

वदेत्तत्पुरुषायान्ते विद्महिति पदं ततः।
वक्रतुण्डाय शब्दान्ते धीमहीति समीरयेत्।
तन्नो दन्तिः प्रचोवणा दयादिति वदेत्पुनः।
एषोक्ता मूलगायत्री **सर्वसिद्धिप्रदायिनी**॥[१३]

अपि च

"सरस्वती च सर्वज्ञा **सर्वसिद्धिप्रदायिनी**"[१४] ।

जगन्माता श्रीललितादेवी सनातनी पुरातनी एकरूपादिशक्तिश्च। यथा

महेश्वरी महाकाली महाग्रासा महाशना।
अपर्णा **चण्डिका चण्डमुण्डासुरनिषूदिनी**॥[१५]
..दुर्लभा दुर्गमा **दुर्गा** दुःखहन्त्री सुखप्रदा॥[१६]

इति मातृस्तोत्रे श्रीमातुरेतानि नामान्यवलम्ब्य सुदृढतया कथयितुं प्रभवामो यत् मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशतीस्था वर्णिता या देवी, सा च श्रीललिता च एकैव। सप्तशत्यनुसारम्

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैतत् आप्याय्याते कृत्स्नमलङ्घ्यवीर्ये॥[१७] इति।

सप्तशत्यनुसारं सत्त्वरजस्तमांसीति गुणभेदेन तस्याः स्वरूपभेदोऽपि लक्ष्यते। यथा सत्त्वगुणे सा सरस्वती, रजोगुणे लक्ष्मीः, तमोगुणे च शिववल्लभा दुर्गेति।

२. **श्रियः माता** इति विग्रहे षष्ठी(२/२/८) इति षष्ठीतत्पुरुषविवक्षायां श्रीमाता अस्मभ्यमैहिककामनापुरयित्री भवति। मेदिनीकोषानुसारं श्रियोऽर्थः विभूतिः। “एवाहिते विभूतय इन्द्रमावते”[१८] अस्य मन्त्रांशस्य भाष्ये सायणाचार्यैः “विभूतयः ऐश्वर्यविशेषाः” इति कथितम्। अर्थादणिमाद्यष्टविधैश्वर्याणि **श्री**पदवाच्यानि। सा देवी आर्त्तसाधारणमनुष्याणां सततं सहायिका भवतु इति धिया भगवन्त आचार्यशङ्करवर्याः स्वयं साधारण इति विचार्य भवान्यष्टके “विपत्तौ प्रविष्टः प्रणष्टः सदाहं गतिस्त्वं गतिस्त्वं त्वमेका भवानि” इति स्मरन्ति। श्रीमार्कण्डेयपुराणान्तर्गतार्गलास्तोत्रे देवीमाहात्म्ये सप्तशतीपाठेऽपि कथितमस्ति “रूपं देहि जयं देहि यशो देहि द्विषो जहि” इत्यादि। साधकाभीष्टफलप्रदायिका माता बहुरूपेणाविर्भूता; सैव श्रेयश्च प्रेयश्चोभयात्मिका।
यतो हि **मा** इति धातुः परिमाणवाचकोऽस्ति अतः अष्टविधैश्वर्यणां परिमाणकर्त्री भवति माता। अस्य तात्पर्यार्थो भवति स्वयं हि साधकाय अष्टैश्वर्यं प्रदाय पुनरैश्वर्याणामनित्यतां ज्ञापयित्वा शाश्वतसुखाय तथा कैवल्याय निवृत्तिमार्गं सूचयति अर्थात् साधकाय श्रेयस्करी।

३. **श्रीरेव माता** इति विग्रहेऽत्रोपमानोपमेययोरभेदप्रतीतिर्भवतीति हेतोः रूपककर्मधारयः परञ्च पाणिनिव्याकरणानुसारं तन्नामधेयः कोऽपि समास नास्तीति हेतोरयं मयूरव्यंसकादिष्वेव गृहीतोऽतो मयूरव्यंसकादयश्च(२/१/७२) इत्यनेन मयूरव्यंसकादिवन्निपातनसिद्धः।
श्रीललितास्वरूपकथनावसरे पद्मपुराणस्थपातालखण्डे रासलीलायां देवर्षिनारदाय श्रीकृष्णवाक्यं यथा

“ अहं च ललिता देवी पुंरूपा कृष्णविग्रहा।
आवयोरन्तरं नास्ति सत्यं सत्यं हि नारद॥[१९]

अभेदविवक्षात्र संसूचिता। सहस्रनामान्तिमे च “श्रीशिवा **शिवशक्त्यैक्यरूपिणी** ललिताम्बिका” इत्यनेन शक्तिशक्तिमतोरभेदस्संसूच्यतेऽत्र। अपि च श्रीललितोपाख्याने स्वयं ललिता निगदति **“ममैव पौरुषं रूपं गोपिकाजनमोहनम्”** इति।
तन्त्रराजस्य कथनस्याप्यात्र प्रसिद्धिरस्ति। यथा

कदाचिदाद्या ललिता पुंरूपा कृष्णविग्रहा।
वेणुनादसमारम्भादकरोद्धि वशं जगत्॥ इति

भावनोपनिषद्यपि “सदानन्दपूर्णः स्वात्मेव परदेवता ललिता” ॥२८॥ इति।
दक्षिणामूर्त्तिसंहितायाम्

योषित्पुरुषरूपेण स्फुरन्ति विश्वमातृका।
निःसरन्ति महामन्त्रा महाग्नेर्विस्फुलिङ्गवत्॥ इति

श्रीमातुरेकं नाम अस्ति दक्षिणामूर्त्तिः इति स्तोत्रे “स्वतन्त्रा सर्वतन्त्रेशी **दक्षिणामूर्त्ति**रूपिणी”[२०] इति।
शिवशक्त्योरभेदान्वयनिदर्शनेन श्रीमातू रक्तिमाङ्घ्रिपद्मं स्मारं स्मारञ्च मे दैन्य-प्रबन्धमिमं समापयामि।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
नो चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वापि कथमकृतपुण्यः प्रभवति॥ इति शम्।

पादटिप्पणी

१. तैत्तिरीयोपनिषदि शीक्षावल्ल्याध्याये एकादशानुवाकः
२. श्रीललितासहस्रनामस्तोत्रम्, १
३. केनोपनिषद्, १.२
४. श्रीललितासहस्रनामस्तोत्रम्, १२६
५. शिवमहिम्नस्तोत्रम्, ७
६. श्रीमद्भगवद्गीता, १२/५
७. श्रीमद्भगवद्गीता, ११/५४
८. पद्मपुराणान्तर्गतपातालखण्डे पञ्चसप्ततितमाध्यायः, ४६
९. श्रीललितासहस्रनामस्तोत्रम्,१८९
१०. वाचस्पत्यम्, अकारवर्णने
११. "तेन विना मर्यादा, तत्सहितः अभिविधिः" (सि.कौ)
१२. श्रीललितासहस्रनामस्तोत्रम्,९७
१३. नारदपुराण, पूर्वार्द्ध, अध्याय ६८। १४,१५१६
१४. इति श्रीसरस्वतीसहस्रनामस्तोत्रम्,२२
१५. श्रीललितासहस्रनामस्तोत्रम्,१४५
१६. श्रीललितासहस्रनामस्तोत्रम्,५०
१७. श्रीश्रीसप्तशतीचण्डी,११/४
१८. ऋग्वेदः,१/८/९
१९. पातालखण्डे पञ्चसप्ततितमाध्यायः,४६
२०. श्रीललितासहस्रनामस्तोत्रम्,१४०
२१. सौन्दर्यलहरी,१

सन्दर्भग्रन्थसूची :

१. ललितासहस्रनाम, श्री भारत भूषण, चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली-११०००७.
२. श्रीललितासहस्रनामस्तोत्र, प्रो.गुरुपाद के.हेगडे, कावेरी बुक्स, दिल्ली-११०००२.
३. सौन्दर्यलहरी, डा.सुधाकर मालवीय, चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली-११०००७.

४. उपनिषद् ग्रन्थावली, स्वामी गम्भीरानन्द, उद्बोधन कार्यालय,कलिकाता-७०००३.
५. श्रीश्रीचण्डी, स्वामी जगदीश्वरानन्द, उद्बोधन कार्यालय,कलिकाता-७०००३.
६. अमरकोषः, श्रीभानुजिदीक्षितकृतव्याख्यासुधाख्यया रामाश्रमी'त्यपरनामधेयया व्याख्यया सहितः, चौखम्बा कृष्णदास अकादमी, वाराणसी-२२१००१.

अभिषेक-मुखार्जी
(Abhisek Mukherjee)
शोधच्छात्रः,राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः-517507(आ.प्र.)
abhisekrkmv@gmail.com

***

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit, Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

संस्कृत कोषभाष्यों की व्याख्या पद्धति – अमरकोष की प्रमुख टीकाओं के सन्दर्भ में

– सुहासिनी

शोध सार –

संस्कृत कोषभाष्यकारों द्वारा कोषों के अर्थोद्घटन में प्रयुक्त प्रविधि कोष के अर्थ के स्पष्टीकरण के साथ साथ बहुत ही महत्त्वपूर्ण भाषावैज्ञानिक सामग्री भी उपलब्ध कराती है। संस्कृत में र–ल, ड–ल, स–श, तथा व–ब स्वनों में मुक्तपरिवर्तता(Free Variation) बहुप्रचलित है। यथा वबयोरभेदः, रलयोरभेदः तथा डलयोरभेदः जैसे वचन प्रसिद्ध ही हैं। इस प्रवृति में क्षेत्रीय उच्चारणों का भी योगदान रहा है। यथा बंगाल में व का सर्वत्र ब उच्चारण किया जाना। किन्तु ऐसे वैकल्पिक रूप केवल उन्हीं शब्दों में शुद्ध माने गये हैं जहाँ शिष्टों द्वारा वे भाषा में प्रयुक्त हैं। मुक्तपरिवर्त के रूप में प्रयुक्त ये ध्वनियाँ कहाँ परस्पर परिवर्तनीय नहीं है तथा कहाँ उनमें से किसी एक ध्वनि का प्रयोग है, इसके परिज्ञान में कोषभाष्यों का विशेष महत्त्व है। सर्वानन्द की टीकासर्वस्व में इस विषय में महत्त्वपूर्ण सामग्री प्राप्त होती है। अमरकोश की अपनी टीका के आरम्भ में ही उन्होंने ओष्ठ्यकारिका नामक अपने ग्रन्थ में उन शब्दों की सूची दी है जिनमें ओष्ठ्य बकार का प्रयोग है जिससे उन शब्दों में दन्त्योष्ठ्य वकार के प्रयोग की भ्रान्ति का निराकरण किया जा सके। ऐसे श–ष–स वर्णों से युक्त शब्दों की व्याख्या में उन्होंने सर्वत्र दन्त्यादि, मूर्धन्यषः, तालव्यमध्य आदि कथन के द्वारासाधु उच्चारण का निर्देश किया है। अतः कोषभाष्य संस्कृत शब्दों के क्षेत्रीय एव कालिक संस्करणों, शुद्ध–अशुद्ध प्रयोगों, क्षेत्रीय भाषिक तत्त्वों तथा संस्कृत पर उनके प्रभाव आदि के परिज्ञान के लिये बहुत महत्त्वपूर्ण है। प्रकृत शोधपत्र में इस दृष्टि से अध्ययन प्रस्तुत किया गया है।

